VENÍ SAMHÁRA.

A

DRAMA IN SIX ACTS.

BY

BHATTA NARÁYÁNA.

EDITED

WITH A COMMENTARY

BY

PANDITA TÁRÁ NÁTHA TARKAVÁCHASPATI.

Professor of Grammar, Sanscrit College.

AT THE REQUEST OF BABOO

BHOOVANA CHANDRA VÁSAKA

CALCUTTA:

PRINTED & PUBLISHED BY
BABOO BHOOVANA CHANDRA VÁSAKA
At the Sangbáda Jnánaratnákara Press.
No. 32. Nimtollah Ghaut Street.

1868.

508 By

Digitized by Google

BIBLIOTECA
IMOLA

Digitized by Google

VENÍ SAMHÁRA.

A

DRAMA IN SIX ACTS.

BY

BHATTA NARÁYÁNA.

EDITED

WITH A COMMENTARY

BY

PANDITA TÁRÁ NÁTHA TARKAVÁCHASPATI.

Professor of Grammar, Sanscrit College.

AT THE REQUEST OF BABOO

BHOOVANA CHANDRA VÁSAKA

CALCUTTA :

PRINTED & PUBLISHED BY


BABOO BHOOVANA CHANDRA VASAKA

At the Sangbáda Jnánaratnákara Press.

No. 32. Nimtollah Ghaut Street.

1868.

Digitized by Google



Digitized by Google

AN EXTRACT

FROM

WILSON'S HINDU THEATRE.

CHARACTERS.

Yudhishthira—The elder of the Pándava princes and their king.
Bhíma—The brother of Yudhishthira.
Arjuna.—The third Pándava prince.
Sahadeva.
Nakula. } The two younger Pándava princes, twin brothers.
Krishná.—The friend and ally of the Pándavas.
Dhritaràshtra.—The father of the Kauruva princes, and uncle of the preceding.
Duryodhana.—The elder of the Kaurava princes, the son of Dhritaráshtra.
Karna.—The friend and ally of Duryodhana.
Kripa.—An ally of Duryodhana.
Aswatthàmá.—A martial Brahmin and sage, the son of Drona and nephew of Kripa.
Sanjaya.—The charioteer of Dhritaráshtra.
Sundaraka.—An attendant on Karna.
Charvàka.—A Rákshasa, in the disguise of a holy ascetic.
A Ràkshasa, or male goblin,
The Charioteer of Duryodhana.
Attendant, Soldiers, &c.
Draupadi.—The wife of the Pándavas.
Bhànumati.—The wife of Duryodhana.
Gándhári.—The wife of Dhritaráshtra.
Attendant on Draupadi.
Attendant on Bhánumati.
The mother of Jayadratha, king of Sindhu.
A Ràkshasi. or female goblin.
Attendants.

The *Veni Samhàra* is a drama founded on the *Mahàbhàrat*. The name alludes to an incident described in the latter part of the *Sabhà Parva* of that poem, Draupadi's being dragged by

Digitized by Google

the *veni*, or braid of hair, into the public assembly by the hand of Duhsásana, one of the Kaurava princes, a disgrace that weighed most heavily upon the Pàndavas, and was most bitterly revenged.

The introduction of this play presents a *nàndi* or preliminary benediction of six stanzas: an extravagance introduction by the practice of the best writers, and prohibited by positive rule. Two of these, indeed, are omitted by the commentator, and the last is censured by the author of the *Kàvya Prakàsa*, as inconsistent with the reverence due to Hari and Lakshmì, whose amorous sports it describes in a style suitable to mere mortals alone.

The manager then informs the audience that the play is a novelty, the composition of the poet "Bhatta Nárayana;" also designated by the title *Mriga Rája* or *Sinha*; meaning the same thing, the lion. It is an odd grouping of names, however, and leaves the character and person of the bard rather doubtful, the termination *Sinha* being most correctly applicable to a man of the regal or military caste, whilst *Bhatta* is an adjunct belonging to a Brahman.

The occasion of the performance, which it is usual to mention, is not adverted to, and the manager and actor go off to prepare for an exhibition of song and dance in honor of Krishna's return to the Pándava camp from a visit to the Kaurava princes, as a mediator between the contending chiefs. The business of the play begins with a conversation between Bhìma and Sahadeva, in which the former expresses his refusal to have any share in the negociations instituted by Krishna, and his determination to make no peace with the enemy until the insult offered to Draupadi is avenged. He expresses his resolution, in case the

Digitized by Google

dispute be amicably adjusted, to disclaim all connexion with his own brothers and throw off obedience to Yudhishthira.

Shall I not grind the Kaurava to dust,
Nor drink the blood of arrogant Duhsásana;
Shall not my mace upon the breast descend
Of proud Suyodhana, and crush the wretch,
Because your monarch seek the price of peace?

The price is the demand of five villages or towns, Indraprastha, Tilaprastha, Mansadam, Vṛánávatam, and another: the Mahábhárat gives different names, as Avisthalam, Vrihasthalam, and Mákandi; the fourth is the same. Sahadeva attempts to calm the fury of Bhìma, but in vain; and Draupadi, with her hair still dishevelled, and pining over her ignominious treatment, comes to inflame his resentment. She complains also of a recent affront offered by the queen of Duryodhana, in an injurious comment upon her former exposure, which serves to widen the breach. A messenger now arrives to announce that Krishna's embassy has been unsuccessful, and that he has effected his return only by employing his divine powers against the enemy. All the chiefs are summoned by the trumpet to prepare for the battle.

Draup. Yet ere you go, attend to my request;
Let not my shame so far inflame your wrath
That heedless of your lives, you headlong plunge
Into conflict: the chieftains of the enemy
Are neither rash nor timorous.

Bhím. True, warrior dame.
The sons of Pándu are well skilled to ford
The ocean of fight, amidst whose waves
Floats many a headless corse; and howling monsters,
Gorged with the sanguine beverage, re-echo
The trumpet's sound. Foremost they lead the troops
O'er crashing cars and dying elephants,

Digitized by Google

The fierce encounter of whose ponderous brows
Has strewed the floating field with brains and gore.

The second act commences before day-break, and introduces Bhánumati, the queen of Duryodhana, repeating to her friend and an attendant, a dream, in which she has beheld a *Nakula* or *Mungoose* destroy a hundred snakes. This is very ominous, Nakula being one of the Pándavas, and the sons of Kuru amounting to a hundred. Duryodhana overhears part of her story, and at first imagines the hostile prince is the hero of the vision. He is about to burst upon her full of rage, and when he catches the true import of the tale, he is at first disposed to be alarmed by it, but at last wisely determines to disregard it. For,

By Angirasa 'tis sung;
The aspect of the planets, dreams and signs,
Meteors and portents, are the sports of accident,
And do not move the wise.

Bhánumati offers an *arghya* of sandal and flowers to the rising sun to avert the ill omen, and then the king appears and soothes her. Their dialogue is disturbed by a rising whirlwind, from which they take shelter in a neighbouring pavilion. The mother of Jayadratha, king of Sindhu, then appears, and apprises Duryodhana that Arjuna has vowed, if sunset finds Jayadratha alive, he will sacrifice himself in the flames. His wrath is especially excited by the death of his son Abhimanyu, in which that chieftain had borne a leading part. Duryodhana laughs at her fears and those of his wife, and despises the resentment of the Pándavas. He observes, that this was fully provoked by the treatment which Draupadi received by his command when, in the presence of the court and of the Pándavas, she called out in vain for mercy. Duryodhana then orders his war-chariot and goes forth to the battle.

Digitized by Google

The third act opens with a scene of power, but of bad taste being full of revolting images. A Rákshasi enters, and expatiates on the stores she has provided for her cannibalism and that of her partner; and when he makes his appearance, hungry, thirsty, and wearied, she gives him on the stage a feast of flesh and brains, and a refreshing beverage of blood in the skull of an elephant just slain. It appears from their dialogue, that up to the period of the contest, the following chiefs have fallen : Bhagadatta, Sindhurája, Anghádhipa, Drupada, Bhurisravas, Somadatta, and Báhlika. Ghatotkacha is also slain, and Bhìma is about to avenge his fall, on which account Hirimba, the queen of the Rákshasas and mother of Ghatotkacha, has ordered these goblins to be ready to assist Bhìmsena. whilst engaged in conversation and feeding, this couple see Drona seized by Dhrishtadyumna and slain, and they finally retire before Aswatthámá, the son of Drona, who makes his appearance armed. He is overtaken by his father's charioteer, who tells him of the treachery by which Drona was slain, having been induced to throw away his arms by a false report that his son Aswatthámá had perished, and been then killed at a disadvantage. Aswatthámá's distress is assuaged by his maternal uncle, Kripa, who recommends him to solicit the command of the host from Duryodhana. In the mean time, Karna is represented as filling the mind of the Kuru chief with impressions hostile to Drona and his son, persuading him that Drona only fought to secure Aswatthámá's elevation to imperial dignity, and that he threw away his life, not out of grief, but in dispair at the disappointment of his ambitious schemes. Kripa and Aswatthámá now arrive, and Duryodhana professes to condole with Aswatthámá for his father's lost. Karna sneeringly asks him what he purposes, to which he replies :

Digitized by Google

What is my purpose? Hear it, king of Anga:
Whoever confident in arms is ranked
Amongst the adverse host--whome'er the race
Of proud Pánchála numbers, active youth,
Weak age, or babes unborn, whoe'er beheld
My father's murder, or whoever dares
To cross my path, shall fall before my vengeance.
Dark is my sight with rage, and death himself,
The world's destroyer, should not 'scape my fury.
Pupil of Jamadagnya, Karna, mark me:
Amidst these very plains, the wrath of Ráma,
Roused by a father's death, filled mighty lakes
With Kshetriya blood. Such formidable arms,
Burning for hostile life, I bear, and such
My cause of rage, my father's fall; nor less
Than Ráma's acts shall Drona's son achieve.

Kripa then requests Duryodhana to give the command of the army to Aswatthámá. The king excuses himself on the plea of having promised it to Karna, to whom he transfers his ring accordingly. A violent quarrel ensues between Karna and Aswatthámá, and Duryodhana and Kripa have some difficulty in preventing them from single combat. Aswatthámá at last reproaches Duryodhana with partiality, and refuses to fight for him more. They are disturbed by Bhìma's proclaiming without, that he has at last encountered Dushásana, the insulter of Draupadi, and is about to sacrifice him to his vengeance. Karna instigated by Aswatthámá, foregoes his anger, and is about to resume his arms, when a voice from heaven prevents him. He is obliged, therefore, to remain an idle spectator of the fight, but desires Kripa to assist the king: they go off for that purpose.

The fourth act opens with Duryodhana's being brought in by his charioteer, wounded: Duhsásana has been killed: and

Digitized by Google

the army of the Kauravas put to the rout. On his recovery, the charioteer announces Duhsásana's death, and Duryodhana gives vent to his sorrows. He is joined by Sundaraka, a follower of Karna, who gives in Prákrita a long and tedious account of the conflict between Arjuna and Vrishasena, the son of Karna, the death of the young prince, and his father's distress: he also brings a leaf on which Karna has written to Duryodhana, with an arrow dipped in his own blood, a message for aid. Duryodhana orders his chariot, and prepares to seek the fight again, when he is prevented by the arrival of his parents. Dhritarástra and Gándhárí, who with Sanjaya commence the fifth act.

The old couple and Sanjaya endeavour to prevail upon Duryodhana to sue for peace, but he refuses,

> My fall has Pártha vowed, when he has left
> Me brotherless; and all his brethren slain,
> How shall Duryodhana endure to live?
> Nor will I hear of peace until my mace
> Shall crush and scatter to the wind that foe,
> Remorseless Bhíma, whose ferocious wrath
> Drank my young brother's, brave Duhsásan's blood.

A tumult behind, and the entrance of the king's charioteer, announce the death of Karna. Duryodhana, after expressing his grief, determines to go and avenge him, and mounts the car of Sanjaya for that purpose, when Arjuna and Bhíma arrive in search of him. On finding the seniors there, Arjuna purposes to withdraw; but Bhíma insists on first addressing them, which they do, but in insulting terms.

Arj. Parents, the middle Pándava salutes you,
Who in the battle's front has, victor, slain
The son of Rádhá, he whose pride beheld
The world as grass, and by whose vaunted prowess
Your children hoped to triumph o'er their foes.

Digitized by Google

Bhìm. Bhìma in reverence bows his head to you!
He, who has overthrown the sons of Kuru,
He who, inebriate, has like nectar quaffed
The blood of vile Duhsásana, and soon
Shall lay the proud Duryodhana in dust.

Dhritaráshtra reproaches them for this language, is told they use it not in pride, but in requital of his having witnessed, without interfering to prevent, the oppression and barbarous treatment the Pándavas experienced from his sons. Druyodhana interferes and defies Bhìma, who is equally anxious for the combat; but Arjuna prevents it, and the brothers are called off by a summons from Yudhishthira, who orders the battle to cease for the day and the dead bodies of either party to be burnt. Aswatthámá then enters and is disposed to be reconciled to Duryodhana: but the prince receives his advances coldly, and he withdraws in disgust. Dhritaráshtra sends Sanjaya after him to persuade him to overlook Duryodhana's conduct. Duryodhana mounts his car, and the aged couple seek the tent of Salya, king of Madra.

In the sixth act Panchála brings to Yudishthira and Draupadi an account of Duryodhana's having been discovered concealed in a swamp, and compelled to fight with Bhìmsena, by whom he will be slain. Yudhishthira orders public rejoicings on the occasion. Chàrvàka, a Ràkshasa disguised as a Muni, then enters, requiring rest and water. He tells them that he has seen Arjuna engaged with Duryodhana, Bhìma having been previously slain by the latter, and Krishna forcibly taken away by Ràma, and gives them to understand that Arjuna also has fallen. Draupadi determines to mount the funeral pile, and Yudishthira to put an end to himself, when the Ràkshasa, satisfied

Digitized by Google

with the success of his scheme, which was intended to prevail on this couple to perish, departs. The pile is prepared, and Yudishthira and Draupadi are about to sacrifice themselves, when they are disturbed by a great clamour. Supposing it to precede the approach of Duryodhana, Yudisothira calls for his arms, when Bhìma, his club smeared with blood, rushes in. Draupadi runs away; he catches her by the hair, and is seized by Yudishthira —on which the mistake is discovered. The episode is very absurd and impertinent.

The braid of Draupadi's hair is now again bound up. Arjuna and Váshudeva arrive, and announce that they have heard of the fraud of the Chàrvàka, and Yudishthira adds that the mendicant has been slain by Nakula, on which Krishna expresses great satisfaction. The author has introduced Chárváka, apparently, merely to have a hit at the atheistical sect, possibly intending the Bauddhas.

There is much good writing in this piece, although the style is rather powerful than polished; there is also poetry in the thoughts, but it is the poetry rather of passion than fancy, and the pathos and horror in which it delights are relieved by no brilliancy of illustration: both too are overdone, and the pathos becomes tiresome and the horror disgusting. The chief merit of the drama is individuality of character; the ferocity of Bhìma, the pride of Karna, the fiery but kindly temperament of Aswatthàmá, and the selfish arrogance of Duryodhana, are well delineated. The chief defect of the play is its undramatic construction. The business is clumsily contrived; the situations are ineffective or ludicrous; the scenes are awkwardly put together, and much too considerable a portion of the piece is thrown into narrative for the interest to be successfully


Digitized by Google

supported. With exception of the last defect, the Venì Samhára is calculated to remind us very forcibly of the early attempts of the French and English dramatists.

There is nothing in the play to furnish a clue to its date. It is frequently cited in the Kávya Prakás, the Dasa Rùpaka, and Sáhitya Darpana, to which works it is consequetly anterior. According to tradition, the author, Bhatta Náráyana, was one of the Kanouj Bráhmans invited into Bengal by Adi Sura, from whom the Brahmans of that province are descended : he was of the Sándilya family. Adi Sura is supposed to have reigned three centuries before our era ; but if we may place any dependance on Abulfazl's list of Bengal kings, he was the twenty-second prince in ascent from Belal Sen, who it is well known reigned in the thirteenth century. Assigning then the moderate duration of about three hundred years to these intermidiate princes, and admitting the tradition with respect to Bhatta Náráyana, the Venì Samhára might have been written about the eighth or ninth century : a period not at all incompatible with the comparative harshness of its style and the rudeness of its execution, particularly if we conclude, agreeably to the tradition, that it was amongst the early results of the introduction of Brahminical Literature into Bengal. There are considerable varieties in the manscripts of this drama, and the name is also differently given as the *Venì Samharana* or *Venì Samhàra* : the import is the same, "The Binding of the Braid." There is a commentary on the drama by *Jagaddhara*, entitled *Mahopádhyàyà* implying a teacher ; and *Dharmádhikárika*, which may be merely an honorific epithet, although it should signify a judge or administrator of the law.

Digitized by Google

वेणीसंहारनाटकम् ।



महाकवि श्रीभट्टनारायणप्रणीतम्



गवर्णमेण्ट संस्कृतपाठशालाध्यापक

श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्य

कृतव्याख्यानसहितं

तेनैव संस्कृतम्

कलिकातानगरे

श्रीयुतभुवनचन्द्रवसाकमहोदयस्यप्रार्थनया

तद्द्वारैव संवादरत्नाकरयन्त्रे

१८२४ सम्वत्सरे

प्रकाशितम् ।

Digitized by Google

Digitized by Google

वेणीसंहारनाटकम् ॥



प्रथमाङ्कः ।

नान्दी ।

निषिद्धैरप्येभिर्लुलितमकरन्दो मधुकरैः
करैरिन्दोरन्तःस्फुरित इव संभिन्नमुकुलः ।

---

(१) वाग्देवीं हृदये ध्यात्वा वेणीसंहारनाटकम् ।
व्याख्यायते सुबोधाय श्रीतारानाथशर्म्मणा ॥

रङ्गविघ्नोपशान्त्यर्थं नान्दीमादौ प्रयोजयेदिति बोधितकर्त्तव्यतामाकां नान्दीमुपनिबध्नाति निषिद्धैरित्यादि । निषिद्धैरित्यनेन ये यत्नात्यन्तासङ्गास्ते निवारिता अपि ततो न निवर्त्तन्ते इति ध्वनयता दुर्योधनादयः अत्यन्ताकार्य्यासङ्गा भीष्मादिभिर्निवार्य्यमाणेऽपि नाकार्य्येभ्योविरता इति सूचितम् । लुलितमकरन्दः चालितपुष्परसः न तु आस्वादितमधुकः निवारणेन व्याकुलतया सुखेनास्वादासम्भवात् । इन्दोःकरैरन्तर्मध्ये स्फुरितो लिप्तइव कृतरेखामिन्दुकरैः वाह्यभावस्पर्शः पुष्पोच्चयस्य तत्यन्तमधुस्यन्दिन्नाद्योतनायान्तर्लिप्तत्वमुत्प्रेक्षितम् । संभिन्नमुकुलः विदलित-

Digitized by Google

विधत्तां सिद्धिं नो नयनसुभगामस्य सदसः
प्रकीर्णैः पुष्पाणां हरिचरणयोरञ्जलिरयम् ॥१॥

मुकुलीभावः विकासितदृत्यर्थः अञ्जलिरञ्जलिपरिमाणं पुष्पाणामिति षष्ठी तत्रैव परिमाणेऽन्विता तथाच अञ्जलिपरिमितानि पुष्पाणीति वाक्यार्थः परिमाणपरिमेययोरभेदोपचाराच्च तथा निर्देशः। अतएव च पुष्पाणां प्रकीर्णतामादायैव अञ्जलेः प्रकीर्णत्वसम्भवः यथाश्रुतपक्षे अञ्जलेर्युतसिद्धार्थकतया तस्य प्रकीर्णत्वा सम्भवः। सूत्रधारेण नान्दीकरणसमये सपुष्पाञ्जलिना भवितव्यमिति सूचनाय अयमित्युक्तम् सदसः सदस्थितजनानां नयनसुभगाम् अभिनयदर्शनद्वारा प्रीतिदां सिद्धिमभिनेयसम्पत्तिं विधत्ताम् करोतु कवीनां निरङ्कुशत्वेन कर्तृगतफलाभावेऽपि तङ्॥ प्रार्थनायां लोट्। विधत्तादिति तातङन्तः पाठस्तु समीचीनः। केचित्तु पुष्पाञ्जलिः अयं प्रबन्धस्य एतौ हरिचरणयोः हरिचरणमुद्दिश्य प्रकीर्णः क्षिप्तः अर्पितस्य सिद्धिं विधत्ताम् कुरुतामिति द्विवचनान्ततया व्याकुर्वन्ति। तत्र च प्रबन्धप्रतिपाद्यस्यार्थस्य लुलितमकरन्दादिकतया प्रबन्धस्य तथात्वं दृष्टव्यम्। तथाहि मधुना मदेन कीर्यन्ते दूरं क्षिप्यन्ते इति कराः क्षिप्यमाणा दूरत्यर्थः तैः दुर्योधनादिभिः भीष्मादिभिर्निषिद्धैरपि लुलितस्खालितोभकरन्दइव सारांश ऐश्वर्यं यस्य तथा शत्रुभिः पराभूतोऽपि बन्दुकिरणवत् शुद्धस्वभावः पक्षाच्च पणसमयातिवाहनेन विदलित दैन्यरूपमुकुलीभावस्य नायकस्य इति यथासम्भवं विश्लेषणं योज्यम्।

Digitized by Google

अपि च ।

कालिन्द्याः पुलिनेषु केलिकुपितामुत्सृज्य रासे रसं
गच्छन्तीमनुगच्छतोऽसुकलुषां कंसद्विषो राधिकाम्।
तत्पादप्रतिमानिवेशितपदस्योद्भूतरोमोद्गते-
रुच्चैरुन्नयतः प्रसन्नदयिताद्दृष्टस्य पुष्णातु वः ॥२॥

---

(२) द्वादशचरणात्मकनान्दीरूपस्य विधितृप्तितस्यापपर्यवसानं दूषयन्नाहापिचेत्यादि। केलिकुपितां कौतुकेन कुपितां प्रणयकोपवतीं रासे क्रीडाविशेषे "रासो विदग्धनोच्यास्त क्रीडायामपि गोष्ठ्रामिति"कोषात् रसं रागमुत्सृज्य गच्छन्तीं राधिकामनुगच्छतः तत्प्रकारमाह तत्पादेत्यादि तस्या राधायाः पादयोः प्रतिमासु अङ्केषु निवेशितपदस्य तत्पादाङ्कस्पर्शेनापि कृतार्थम्मन्यमानतया तत्र पददानेऽपि तत्स्पर्शसम्भवाभावया दत्तचरणस्य अतएव पदाङ्कस्पर्शादपि उद्भूतरोमोद्गतेर्जातरोमाञ्चस्य तथारोमोद्गमदर्शनेन च "अयं मय्यत्यन्तानुरक्तः यतो मत्पादाङ्कस्पर्शेनाप्यस्य रोमाञ्चोदयदृति" निश्चित्य प्रसन्नया कृतप्रसादया दयितया दृष्टस्य अतएव अनुनयः सफलः तत्प्रसादनार्थमेवानुनयस्य कर्त्तव्यतया तत्प्रसादे च जाते अनुनयस्य सफलतेतिभावः। अत्र प्रबन्धप्रतिपाद्यानि द्रौपदीकोपरौद्रेण शत्रुवधानन्तरं भीमकृतानुनयस्य सफलत्वं द्रौपदीप्रसादश्चेत्येतानि वस्तूनि सूचितानि ।

Digitized by Google

अपिच ।

दृष्टः सप्रेम देव्या किमिदमिति भयात्सम्भ्रमाच्चासुरीभिः
शान्ताभ्यन्तस्तत्त्वसारैः सकरुणमृषिभिर्विष्णुना सस्मितेन ॥

---

(२) मयेन दैत्यशिल्पिना निर्म्मितं पुरं मयपुरं मध्यपदलोपी समासः त्रिपुरासुरपुरमित्यर्थः तस्य दहने दहनसमये नानाभावेन भवान्यादिभिर्दृष्टः शिवोयुष्मान् पात्वित्यन्वयः । केन केन कथं कथं दृष्टस्तदाह देव्या सप्रेम, "धन्याहं यस्या वल्लभेनेदृशं पुरं दग्धमिति" जात.नुरागसहितम् । असुरीभिः असुरपत्नीभिः किमिदमापतितमिति भयात्, संभ्रमात् "आः कष्टमीदृशस्याप्यसुरनाथस्यायं परिभवः कदाचिदस्मत्स्वामिनामपीदृक् स्यादिति" उद्वेगाच्च। ऋषिभिः सकरुणम्, सदयम् कारुण्ये हेतुंवदन् तान् विशिनष्टि शान्तेत्यादि शान्तमुपशमवत् अन्तः अन्तःकरणं येषां ते तत्त्वमनारोपितरूपं यथार्थं ब्रह्मेति यावत् सारो वेद्यतया प्रधानं येषां ते पश्चात् पुनःकर्म्मधारयः तथा च शान्तान्तःकरणत्वात् तत्त्वप्रधानत्वाच्च तेषां दुःखिदुःखदर्शने दया युक्तैव मैत्रीकरुणामुदितोपेक्षारूपचित्तवृत्तीनां विषयविशेषेषु शान्तात्मनामेवोदयादिति भावः । विष्णुना सस्मितेन "दृष्ट्यामात्रेणैव निबन्धं अल्पस्यापि तस्य दहने जगदीशेनेदृक् प्रयासोऽङ्गीकृतदृतीयावृत्तेरित्यर्थः । प्रबन्धप्रतिपाद्यभारतसंग्रामोऽपि देव्या द्रौपद्या सप्रणयम्, आसुरीभिरसुरप्रकृतिभिः दुर्य्योधनादिवधूभिः भयोद्वेगाभ्याम्, ऋषिभिः नारदादिभिः सकरुणं, दैत्यैर्घटोत्कचा-

आदायास्त्रं सगर्व्वैरुपशमितवधूसम्भ्रमै दैत्यवीरैः
सानन्दं देवताभिर्मयपुरदहने धूर्ज्जटिः पातु युष्मान्॥३॥

दिभिः सगर्व्वैः, इन्द्रेण सानन्दं, कृष्णेन च" मयैव पूर्व्वं निहता धार्त्तराष्ट्रादित्यभिप्रायेण हतानां हननार्थमेषां मुधा उद्योग इति हसता दृष्ट इत्यपि सूचितम् ।

पाठान्तरे नान्दी ।

जयति स नाभिर्जगतां स्वनाभिरम्भोरुहवज्जगद्बीजः ।
दामोदरो निजोदरगह्वरनिविष्टजगदण्डः ॥ १ ॥

अपिच ।

जयति स भगवान् कृष्णः शेते यः शेषभोगशय्यायाम् ।
मध्येपयः पयोधेरपरदृवाम्भोनिधिः कृष्णः ॥ २ ॥

अपिच ।

उत्तिष्ठन्त्या रतान्ते भरमुरगपतौ पाणिनैकेन कृत्वा
धृत्वा चान्येन वासो विगलितकबरीभारमंसे वहन्त्याः ।
भूयस्तत्कालकान्तिद्विगुणितसुरतप्रीतिना शौरिणा वः
शय्यामालिङ्ग्य नीतं वपुरलसलसद्बाहु लक्ष्म्याः पुनातु॥३

(१)नान्द्यन्ते सूत्रधारः ।

(२) श्रवणाञ्जलिपुटपेयंविरचितवान् भारताख्यमृतं यः । तमहमरागमकृष्णं कृष्णद्वैपायनं वन्दे ॥

---

(१) आशीर्वचनसंयुक्ता नित्यं यस्मात् प्रयुज्यते । देवद्विजनृपादीनां तस्मान्नान्दीति कीर्त्तितेत्युक्तलक्षणा । सा चेह द्वादशपदा श्लोकत्रयात्मकत्वात् पदैर्युक्ता द्वादशभिरष्टाभिर्वा पदैरितेत्युक्तेः पदञ्च क्वचित् सुप्तिङन्तरूपं क्वचिच्च श्लोकचरणरूपं यथासम्भवं ग्राह्यम् । एतेन श्रवणाञ्जलिपुटेत्यादि श्लोकानन्तरं नान्द्यन्ते सूत्रधारइति पाठः प्रामादिकएव तथात्वे नान्द्याः षोडशपदत्वापत्तेः । सूत्रधारो वदतीति शेषः एवं सर्वत्र । नान्द्युपकरणादीनि सूत्रमित्यभिधीयते । सूत्रं धारयतीत्यर्थे सूत्रधारोमतो बुधैः ।

(२) रङ्गं प्रसाद्य मधुरैः श्लोकैः काव्यार्थसूचकैः । रूपकस्य कवेराख्यागोत्रादापि स कीर्त्तयेदित्युक्तेः प्रथमं प्रबन्धस्य भारतार्थप्रतिपादकत्वसूचनाय भारतं तत्कर्त्तारञ्च स्तौति श्रवणेत्यादि । आम्नायनकरत्वेन उपदेशद्वारा मोक्षरूपाप्तप्रदत्वेन वा भारतस्याप्ततत्वेन प्रशंसनम् । तत्कर्त्तुश्च सत्वप्रधानतया प्रशंसनमिति द्रष्टव्यम् । अरागम् अरजस्कं रजोरागात्मकं विद्धि कृष्णासक्तसमुद्भवमिति गीतायां रजसो रागात्मकत्वाभिधानात् रागशब्देनात्र रजोगुण एव गृह्यते अकृष्णमकलुषं तमोरहितं तथा चोभयविशेषणाभ्यां रजस्तमोगुणाभ्यामनभिभूतसत्वप्रधानमिति फलितम् अत्र अकृष्णमितिपाठस्तु प्रामादिकः रागस्य कृष्णाहेतुतायां गीतायामुक्तत्वात् रागनिषेधेनैव तन्नि-

Digitized by Google

अलमतिविस्तरेण । [समन्तादवलोक्य तत्-
भवतः(१) परिषद्ग्रेसरान् सर्व्वान् विज्ञापयामि ।]
(२) कुसुमाञ्जलिरयं दूव प्रकीर्य्यते
काव्यबन्ध एषोऽव ।

षेधलाभे तत्कथनस्थानबीजतत्तदोषप्रसक्तत्वात् । भारतप्रशंसया चास्य भारतमूलकत्वं सूचितं तत्सूचनेन च ख्यातवृत्तप्रतिपादकत्वेनाख्याये वक्ष्यमाणनाटकलोपपत्तिरित्याशयः ।

(१) एवं काव्यार्थं सूचयित्वा रङ्गं प्रसादयितुम् विज्ञाप्य-सामाजिकान् समन्तादवलोक्य तानभिमुखीकर्त्तुं विज्ञापनां प्रति जानीते तत्रभवत इत्यादि तत्रभवतो मान्यानित्यर्थः सत्यामेव-प्रतिज्ञायां सभ्यानां तच्छ्रवणे कुतूहलितमिति विज्ञापना प्रतिज्ञातेति भावः ।

(२) प्रतिज्ञातां विज्ञापनामाह कुसुमाञ्जलिरित्यादि रूपकेणानित्यनेनौद्धत्यं परिहृतम् ।

---

(३) [अत्रैव अलमतिप्रसङ्गेन भवन्तः परि-
षद्ग्रेसराः विज्ञाप्यं नः किञ्चिदस्ति । इति
पाठः]

(३) अयं पाठपुस्तकपाठस्तु समीचीनः भवच्छब्दस्य सर्व्वनाम-त्वेनबहुबोधनविभक्त्यन्ततया क्वापि प्रयोगादर्शनात् ।

Digitized by Google

मधुलिह इव मधुबिन्दून्
विरलानपि भजत गुणलेशान् ॥

यदिदं कवेर्मृगराजलक्ष्मणो,(१) भट्टनारायणस्य अभिनवकृतिं वेणीसंहार(२) नामकं

---

(१) कवेराख्यातुमाह मृगराजलक्ष्मण इति मृगराजशब्देन तद्वाच्यार्थवाचकःसिंहशब्दो लक्ष्यते तच्चिह्नस्य सिंहोपाधिकस्येत्यर्थः । वस्तुतः मृगेण शृंगेण राजते इति मृगराजः शृंगधरः तच्छब्देन च तद्वाच्यार्थवाचको द्विजराजशब्दः प्राग्वल्लक्ष्यते तेन द्विजराजोपाधिकस्येत्यर्थः अनेन विप्रगोत्वकथनात् न तदंशे न्यूनता युक्तश्चैतत् शौर्यादिगुणेन क्षत्रियस्यैव सिंहोपाधिसंबन्धसम्भवात् ब्राह्मणस्य तथात्वानौचित्यात् । साक्षात् द्विजराजशब्दमपहाय मृगराजशब्देन व्यपदेशस्तु मृगराजस्य सिंहस्य लक्ष्म जटाधारित्वमिव लक्ष्म जटाधारित्वं यस्येत्यर्थलाभद्योतनायैव कविपक्षे जटाधारित्वं वेदपाठभेदेषु संहितापदक्रमजटाघनेषु जटारूप पाठविशेषस्य धारणात् तथाच जटान्तवेदपाठित्वेन जटाधारित्वलक्ष्मणइत्यर्थलाभः ।

(२) दृश्यकाव्यरूपकस्याख्यामाह वेणीसंहारेति । संहारः संहरणम् संयमनमिति यावत् वेण्या द्रौपदीकेशरचनायाः संहारोयस्मिन् तत् वेणीसंहारम् वेणीसंहारस्य च प्रतिपाद्यतया अन्ये संबन्धात्र विरुध्यते । एतच्च वेणीनामकमपि दर्पणादौ वेण्यामित्याद्यसङ्गतेः तथा च "तदित्यधिकृत्य" अधिकृत्य कृते ग्रन्थे (४,३,१८७, पा० सू०) विहितस्याणः

नाटकं(१)प्रयोक्तुमुद्यता वयं,तत्र च कविपरिश्रमानुरोधाद्वा उदात्तकथावस्तुगौरवाद्वा(२)नवनाटकदर्शनकुतूहलाद्वा भवद्भिरवधानं(३)देयमानमभ्यर्थये ।

'लुबाख्यायिकाभ्यो बहुलमिति" तत्स्वार्थिकेन वा लुपि तद्धितलुपि च प्रकृतिलिङ्गभागितया शकुन्तलावासवदत्तादिवत् स्त्रीत्वात् वेणीतिसिद्धम् शकुन्तलाया एव भारतोपलब्धार्थकत्वेनास्या आख्यायिकारूपत्वम् ।

(१) दृश्यकाव्यस्यानेकविधत्वेऽपि अस्य विशेषरूपत्वमाह नाटकमिति तच्च "नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम् । प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान् । दिव्योऽथ दिव्यादिव्यो वा गुणवानायको मतः । एक एव भवेदङ्गी शृङ्गारोवीर एववे"त्युक्तलक्षणम् । एकेन प्रयोजनेनान्वितानां कथांशानामवान्तरैकप्रयोजनेन संबन्धः सन्धिः स च मुखप्रतिमुखादिभेदेन पञ्चविधत्वेन युक्तमित्यर्थः । अत्र च वीररस एवाङ्गी ।

(२) उदात्तम् औदार्यादिगुणयुक्तं यद्वस्तु नायकस्य कथा तत्र गौरवं श्रद्धातिशयस्तस्मादित्यर्थः ।

(३) अवधानं विषयान्तरपरिहारेण चित्तस्यैकत्र समावेशनम् । कथाश्रवणावधाने हि कवेः क्लेशसाफल्यप्रवणता विषयसौन्दर्यं नववस्तुदर्शनकुतूहलित्वं वा एकैकमपि कारणमिह तु तत्त्रितयमपि समुदितमस्तीत्यवश्यमवधानं देयमितिभावः ।

Digitized by Google

नेपथ्ये । (१) भाव(२)त्वर्यतां त्वर्यताम्, एते खलु आर्यविदुरानुगया पुरुषाः सकलमेव शैलूषजनं व्याहरन्ति * "प्रवर्त्तयन्ताम्" आतोद्यविन्यासादिका विधयः (३) प्रवेशकालः किल तत्रभवतः पाराशर्यनारदतुम्बुरुप्रभृतिभिर्मुनिवृन्दारकैरनुगम्यमानस्य भरतकुलहितकाङ्क्षया स्वयंप्रतिपन्नदौत्यस्य देवकीसूनोर्देवस्य चक्रपाणेर्मन्दाराजदुर्योधनशिविरसंनिवेशं प्रति(४) [प्रस्थातुकामस्येति ।]

सूत्र । आकर्ण्य सानन्दम् । अहो नु खलु (५) भोः भगवता जगदुत्पत्तिस्थितिनिरोध (६) प्रभविष्णुना

---

(१) नेपथ्ये नाट्यशालायां नेपथ्यञ्च विभूषणे रत्नमालोक्तेः । सा च जवनिकान्तर्भूमिरेव ।

(२) भाव विद्वन् भावो विद्वानथावुकदत्यमरोक्तेः ।

(३) विधयः विधानानि ।

(४) शिविरसन्निवेशं सैन्यनिवासस्थानं प्रति भगवतः प्रवेशकाल इति पूर्वेणान्वयः एवमन्वयसम्भवे प्रस्थातुकामस्येत्यधिक पाठकल्पनं व्यर्थम् ।

(५) अहो नु खलु भोरित्यव्ययसमुदायोऽत्यन्ताश्चर्यसूचकः ।

(६) निरोधः विनाशः ।

---

* [परिपन्थिनि इतिक्वचिदधिकः पाठः]

Digitized by Google

विष्णुना अद्यानुष्ठीतमिदं भरतकुलं सकलञ्च राजचक्रम् अनयोः कुरुपाण्डवराजपुत्रयोराहव-कल्पान्तानल (१) प्रशमनहेतुनानेन स्वयं स-न्धिकारिणा कंसारिणा दूतेन। तत् किमिति पारिपार्श्विक(२) नारभ्यसि कुशीलवैः(३) सह सङ्गीतकम्।

प्रविश्य (४) पारिपार्श्विकः। भवतु आरभ्यासि। कतमं समयमाश्रित्य गीयताम्।

सूत्र। नन्वमुमेव चन्द्रातपनच्छन्नकौशेयहंस-कुलसदृच्छदकुमुदपुण्डरीककाशकुसुमपरागधवलि-तगगनदिङ्मण्डलं स्वादुजलजलाशयं शरत्समय-माश्रित्य प्रवर्त्यतां सङ्गीतकम् तथा ह्यस्यां शरदि।

---

(१) आहवं युद्धं कल्पान्तानलदृवेत्युपमितसमासस्तेन तस्य पूर्वपदार्थप्राधान्येन राजपुत्रयोः कल्पान्तानलसदृशाहवप्रश-मनस्य सम्भवः रूपके तु तदन्वयो न सम्भवतीति बोध्यम्।

(२) सूत्रधारस्य पार्श्वे यः प्रकरोत्यमुना सह। काव्यार्थ-सूचनालापं स भवेत् पारिपार्श्विक इतिभरतोक्तलक्षणो नट-विशेषः।

(३) कुशीलवैर्नटैः भरतास्तु कुशीलवा इति भरतोक्तेः।

(४) अपटीक्षेपेण स्वयंप्रवेशे नाट्ये प्रविश्येत्युक्तिः एवं सर्वत्र द्रष्टव्यम्।

Digitized by Google

(१)सत्यश्चा मधुरगिरः प्रसाधिताश्चा मदोद्धतारम्भाः ।
निपतन्ति धार्त्तराष्ट्राः कालवशान्मेदिनीपृष्ठे ॥

पारिपार्श्विकः । सम्भ्रमम् । भाव शान्तं पापं प्रतिहतम् अमङ्गलम् । (२)

सूत्र । सवैलक्ष्यस्मितम् । भारिष शरत्समयवर्णनाशंसया [हंसा धार्त्तराष्ट्रा इति व्यपदिश्यन्ते] तत् किं शान्तं पापं प्रतिहतममङ्गलम् ।

---

(१) श्लेषच्छायोपदेशैश्च समुद्दिष्टं विसर्पति । यत् फलोदयपर्यन्तं तद्बीजमिह कीर्त्तितमिति भरतोक्तफलोदयपर्यन्तं प्रबन्धप्रतिपाद्यमर्थं बीजरूपं श्लेषेण वर्णयति सत्यश्चा इत्यादि । धार्त्तराष्ट्रा हंसविशेषाः धृतराष्ट्रसुताश्च कालवशात् शरत्काहात्म्यात् समयनियोगाच्च मेदिनीपृष्ठे भूमितले निपतन्ति मानस सरसआगच्छन्ति निःशेषेण पतन्ति समूलमुच्छिद्यन्ते चेत्यर्थः विशेषणसाम्येनोभयं दर्शयति सत्यश्चाः शोभनपतत्राः विद्यमानसैन्यादिसहायाश्च मधुरगिरः मधुरशब्दाः मधुरवाणीकाश्च प्रसाधिताशाः भूषिताशेषदिग्विभागाः आयत्तीकृताशेषदिग्जनाश्च मदेन हर्षेण गर्वेण च उद्धतारम्भाः उत्कटव्यापाराः उच्छृङ्खलचरिताश्च ।

(२) शान्तं पापमनिर्देश्येत्युक्तेः न वक्तव्यमित्यर्थः । अवक्तव्यत्वे हेतुमाह प्रतिहतमित्यादि अमङ्गलमशिवं तद्धेतुभूतं वाक्यं प्रतिहतं प्रतिघातेनोच्चारितम् ।

[हंसान् धार्त्तराष्ट्रानिति व्यपदिशामि न धृतराष्ट्रसुतान्]

Digitized by Google

पारि। न खलु जाने(१) अमङ्गलाशंतयाऽस्य वो वचनस्य यत् सत्यं(२) कम्पितमिव मे हृदयम्।

सूत्र। मारिष(३) ननु सर्व्वमेवेदानीं प्रतिहतममङ्गलं स्वयंप्रतिपन्नदौत्येन सन्धिकारिणा कंसारिणा। तथाहि।

(४)निर्व्वाणवैरदहनाः प्रथमादरीणां
नन्दन्तु पाण्डुतनयाः सह माधवेन।

---

(१) न खलु जाने किन्तु जानाम्येव यत् भरद्वर्णनप्रकरणीयतया वचनस्य हंसपरत्वम् न त्वन्यपरत्वम्।

(२) यत्सत्यमितिशब्दसमुदायोऽसम्भावनीयार्थसूचकः असम्भाव्ये तु यत्सत्यमिति भरतोक्तेः। तच्च कम्पनक्रियान्वयि असंभावितमपि हृदयकम्पनं वो वचनस्यामङ्गलार्थस्यापि प्रतिपादनसामर्थ्यात् कम्पितमिवेत्यर्थः।

(३) मारिष आर्य्य आर्य्यस्तु मारिषश्चेत्यमरोक्तेः।

(४) अरीणां शत्रूणां "म्रियते यावदेकोऽपि रिपुस्तावत् कुतः सुख"मित्युक्तेरेकस्यापि सत्त्वे न सुखमित्यतो बहुवचनम्। प्रथमात् माधवेनेत्यर्थात् सन्धिकरणद्वारा शान्तेः प्रापणात्,निर्व्वाणो दाह्यनिष्ठत्तौ दाहकनिष्ठत्तिवत् शान्तिप्रापणेन अरिभावापगमे निःशेषेण निष्ठत्तो वैरदहनो विद्वेषानलो येषां तथाभूताः सन्तः माधवेन सह पाण्डुतनयाः नन्दन्त्वित्यन्वयः। अत्र अरिप्रशमनरूपहेतोरन्वयोपपत्तये पूर्व्वपदार्थप्रधानः वैरं दहनइवेति उप-

रक्तप्रसाधितभुवः क्षतविग्रहाश्च
स्वस्था भवन्तु कुरुराजसुताः सभृत्याः ॥

मितसमासोयाह्यः न तु वैरमेव दहनइति रूपकसमासस्य उत्तरपदार्थप्रधानतया उक्तहेतोरन्वयानुपपत्तेः । वस्तुतः दुःखाभावे सत्येव आनन्दोदयात् तत्प्रदस्य दुःखाभावपरत्वं कल्पनीयं तथा च निर्वाणं निष्टप्तं वैरस्य विद्वेषस्य दहनं तापो येषामित्येव विग्रहः साधीयान् अरिभावप्रशमनेन च तद्विषयकविद्वेषाभावात् तत्कृततापरहितादित्यर्थः । रक्तेन अनुरागेण प्रसाधयेनेत्यर्थः प्रसाधिता आयत्तीकृता भूर्भूस्थलोको यैस्तथाभूताः क्षतो विनिष्टप्तोविग्रहो युद्धं येषां ते तथाभूताः सभृत्याः कुरुराजसुताः स्वस्थाः सुखिनः भवन्तु । पक्षे अरीणां शत्रूणां माधवेन सह स्वैरित्यर्थात् प्रशमात् निवारणात् समूलमुच्छेदात् निर्वाणवैरदहना निष्टप्तविद्वेषजततापाः । रक्तेन रुधिरेण प्रसाधिता अलङ्कृता भूर्येस्ते,तत्र हेतः क्षतविग्रहा विक्षतशरीराःस्वस्थाःस्वर्गस्था भवन्त्वित्यर्थः "सुस्थिते च मृते स्वस्थ" इति कोषः । अत्र श्लिष्टेन वाक्येन प्रकरणप्रतिपाद्यस्यार्थस्याभिधानात् श्लेषगर्भाङ्कास्यं नाटकाङ्गं यथोक्तं भरतेन "ह्यर्थता यत्र वाक्यानां श्लेषेणार्थः प्रतीयते । शब्दभङ्ग्यानुपपत्तोऽपि श्लेषगर्भः स उच्यते इति" । शब्दभङ्ग्या विलक्षणशब्दसन्निवेशेन अनुपपत्तः अप्राकृतः अपिकारात्प्राकृतः अर्थः । दर्पणकृता त्विदं पताकास्थानत्वेनोक्तम् । "वचः सातिशयश्लिष्टं नानावस्तुसमन्वितम् । पताकास्थानमुद्दिष्टमिवि" लक्षयित्वेदमुदाहृतम् ।

Digitized by Google

नेपथ्ये साधिक्षेपम् । आः पाप दुरात्मन् कृथाम-
ङ्गलाराटक शैलूषापसद ।(१)

(२) लाक्षाराटहानलविषान्नसभाप्रवेशैः
प्राणेषु वित्तनिचयेषु च नः प्रहृत्य ।
आकृष्टपाण्डवबधूपरिधानकेशाः
स्वस्था भवन्तु मयि जीवति धार्त्तराष्ट्राः ॥

[सूत्र । आकर्ण्य सभयम् नेपथ्याभिमुखमवलोक्य च(३) ।]
[पारि । आः कुत एतत् ।]

---

(१) शैलूषेषु नटेषु अपसद अधमः तत्संबुद्धौ ।

(२) लाक्षायधानं गृहं लाक्षाराटं विरतिश्रमत्रं विषान्नं मध्यपदलोपी समासः । सभाप्रवेशः द्यूतार्थं सभायां प्रवेशनं, परिधीयते इति परिधानं वसनं कर्म्मणि ल्युट् । इह नाटकीयस्य फलहेतुभूतस्य विषानलादेः सर्वस्य कीर्त्तनात् मयि जीवतीत्यनेन च उत्साहस्य कथनात् स्वस्था भवन्त्वित्यनेन च अवसानस्य कीर्त्तनात् विद्रवं नाम नाटकाङ्गं तदुक्तं भरतेन "नाटकीयफले हेतुभूतस्याध्यक्षकीर्त्तनात् । आफलोदयमुत्साहावसानाभ्यां तु विद्रवमिति" । दर्पणकृता तु "काव्यार्थस्य समुत्पत्तिरुपक्षेपइतीष्यते" इति मुखाङ्गविशेषमुपक्षेपकं लक्षयित्वा एतत् पद्यमुदाहृतम् ।

(३) नेपथ्यस्याभिनेयरूपधारणस्थानस्याभिमुखं द्वारं विलोक्य वदतीति शेषः ।

[सूत्रधारपारिपार्श्विकौ आकर्ण्य] क्वचिदित्येव पाठः ।

Digitized by Google

सूत्र । दृष्ट्वा विलोक्य । अये(१)कथमयं वासुदेव गमनात् कुरुसन्धानमक्ष्यमाणः दृश्युल्लाटतट घटितविकट*भ्रूकुटिना दृष्टिपातेन आपिबन्निव नः सर्व्वान् सहदेवेनानुगम्यमानः क्रुद्धो भीमसेन इत-(२)एवाभिवर्त्तते तन्न युक्तमस्य पुरतः स्थातुम् † निष्क्रान्तौ (३) प्रस्तावना ।(४)

---

(१) अये इति निपातः व्यासङ्गादिनाटकलिताद्यर्थस्य कठादाकलने संभ्रमातिशयमभिधत्ते ।

(२) इतएव इहैव अभिवर्त्तते आभिमुख्येन वर्त्तते आगन्तुमारभतइत्यर्थः ।

(३) निष्क्रान्तौ सूत्रधारपारिपार्श्विकौ तयोरेव पूर्व्वं रङ्गे प्रविष्टत्वात् ।

(४) प्रस्तावना आमुखं पूर्व्वरङ्गइतिवावत् "नटी विदूषको वापि पारिपार्श्विक एव वा । सूत्रधारेण सहिताः संलापं यत्र कुर्व्वते । आमुखं तद्विजानीयात् बुधैः प्रस्तावनोच्यते" । इयञ्च प्रस्तावना कथोद्घातरूपा सूत्रधारवाक्यार्थमादाय भीमसेन पात्रस्य प्रवेशात् यथोक्तं दर्पणे "सूत्रधारस्य वाक्यं वा समादायार्थमेव वा । भवेत् पात्रप्रवेशश्चेत् कथोद्घातस्तदोच्यते" इति । अत्र सूत्रधारेण प्रबन्धप्रतिपाद्यार्थस्य श्लेषेण सूचनेऽपि तद्वा-

---

*[कीनाशतोरणविघूर्णायमानभीषण] क्वचिदधिकपाठः

†[तद्दित आवामन्यत्र गच्छावः । क्वचिदधिकपाठः ।

ततः(१) प्रविशति सहदेवेनानुगम्यमानः क्रुद्धो भीमसेनः ।

भीम । आः पाप दुरात्मन् वृथामङ्गलपाठक शैलूषापसद ! लाक्षाग्रहेत्यादि पुनः पठति ।

सह । सानुनयम् । आर्य्य मर्षय मर्षय अनुमतमेव नो भरतपुत्रस्यास्य वचनम्। पश्य[निर्व्याजवैरदहना इति पठित्वा अन्यथाऽभिनयति । (२)]

भीम । सोपालम्भम् । नखलु (३) नखल्वमङ्गलानि चिन्तयितुमर्हन्ति भवन्तः कौरवाणां, सन्धेयास्ते भ्रातरो युष्माकम् ।

क्यमन्यार्थपरतया संभाव्य भीमरूपपात्रस्य प्रवेश इति बोध्यम् । (१)ततः, प्रवेशसूचनानन्तरम् "असूचितस्य पात्रस्य न च नाट्ये प्रवेशन"मित्युक्तेः अत्र प्रवेशनमित्युक्तेः पटीक्षेपेण स्वयं प्रवेशे तु न सूचनापेक्षेति सूचितम् ।

(२) अन्यथा मरणार्थपरतया सभृत्याः कुरुराजसुताः क्षतजालङ्कृतभूमयः क्षतदेहा हता भवन्त्वेतत्परतयेत्यर्थः । अभिनयति तथार्थबोधकशरीरचेष्टादिना व्यञ्जयति ।

(३) नखलुशब्दोऽत्यन्तनिषेधवाची समुदितो निपातः ।

[यथार्थमेव क्षतजालङ्कृतवसुन्धराः क्षतशरीराश्च सभृत्याः कुरवः स्वर्गस्थाः भवन्त्विति ब्रवीति]

क्षतजालंकृता इत्यादिपञ्चमपाठस्तु स्फुटतादोषदूषितत्वादनादेयः ।

Digitized by Google

सह। सरोषम्। आर्य्ये

धृतराष्ट्रस्य तनयान् हतवैरान् पदेपदे (१)।
राजा न चेन्निषेद्धा स्यात् कः क्षमेत तवानुजः॥

भीम। सरोषम्। एवमिदम् अतएवाद्य प्रभृति भिन्नोऽहं भवद्भ्यः (२)। पक्ष

(३)प्रवृद्धं यद्वैरं मम खलु शिशोरेव कुरुभि
र्न तत्रार्य्यो हेतु र्न भवति किरीटी न च युवाम्।

---

(१) पदेपदे प्रतिस्थानं प्रतिविषयमिति यावत्।

अत्र भेदः संहतिभेदनमिति दर्पणोक्तभेदाख्यं नाटकाङ्गम्।

(३) शिशोरेव शिशुकालमारभ्य सहजमिति यावत् कुरुभिः सह मम यद्वैरं प्रवृद्धमुपचितम्। तत्र तस्य हेतुर्निमित्तमार्य्यो न, युवां नकुलसहदेवौ तस्य हेतू न भवथइति विपरिणामः। उरएव स्खलमाधारो यस्य तमुरःस्थानस्थमित्यर्थः। विरूढं प्रसवकालेऽजातं मात्रभ्यां प्रसूतदेहार्द्धखण्डद्वयं प्रथमं वियुक्तमासीत् ततो जरया राक्षस्या संश्लेषणेन पुनःसंयोजितमित्यर्थः। सन्धिं सन्धिस्थानमिव युष्माभिः क्रियमाणं सन्धिं पणविशेषं साकल्यं च विघटयति वियोजयति अपाकरोतीति यावत् भ्रात्रसाकल्यभङ्गमाशङ्क्याह क्रुधेति वैरजातक्रोधेन, प्राग्उक्तेन संहतिभेदेन च तत्र दोषं न गणये इति भावः। यूयमार्य्यादयः त्वदादिशेषः। पुनर्घटयत असंभावितोत्पादनाय यत्नो हि घटना असंभावितमपि तेषां सन्धिमुत्पादयितुं यतध्वं न तु सेत्स्यतीति भावः। अत्र यूयञ्च कुरुतेति पाठस्तु भग्नप्रक्रमदोषाघातत्वया दर्पणाद्यसम्मततया विवक्षितार्थाप्रतिपादकतया चोपेक्षितः।

Digitized by Google

जरासन्धस्योरःस्थलमिव विरूढं पुनरपि
क्रुधा सन्धिं भीमो विघटयति यूयं घटयत ॥

वह । सानुनयम् । आर्य्य एवमतिसंभृतक्रोधेषु युष्मासु कदाचित् खिद्यते गुरुः ।

भीम । सहासम् । किं नाम? मयि खिद्यते गुरुः !

सामर्षम् । गुरुः खेदमपि जानाति ? पश्य,

(१)तथाभूतां दृष्ट्वा नृपसदसि पञ्चालतनयां,
वने व्याधैः सार्द्धं सुचिरमुषितं वल्कलधरः ।

अत्र च महाभारतीया कथानुसन्धेया सा च सभापर्व्वणि १६ अध्याये "अथ काले महाप्राज्ञ यथासमयमागते प्रजायेतामुभे राजन् शरीरशकले तदा एकाक्षिबाहुचरणे अर्द्धोदरमुखस्थिते। इति ।–ते चतुष्पथनिक्षिप्ते जरानामाथ राक्षसी कर्त्तुकामा सुखवहे शकले सा तु राक्षसी संयोजयामास तदा विधानबलमोदिता ते समानीतमात्रे तु शकले पुरुषर्षभ। एकमूर्त्तिधरो वीरः कुमारः समपद्यत"। इत्युपक्रम्य राक्षे तया ते दत्ते इत्यभिधाय "जरया सन्धितो यस्मात् जरासन्धोभवत्वय"मित्युक्तम् । तत्रैव २३ अध्याये। "बभञ्ज दृष्टं सञ्छिद्य निष्पिष्य च ननाद च । करे गृहीत्वा चरणं द्वेधा चक्रे महाबलः" । इति द्वैधीकरणेन भीमेन हतइत्युक्तम् ।

(१)तथा भूतामनुभूतप्रकारां क्षतकोशाम्बराकर्षणाम् क्षतमतीभेकवस्त्रां धर्षितामित्यर्थः अतिदुःखाकरस्य कथनेऽपि लज्जादायित्वात्त-

विराटस्यावासे स्थितमनुचितारम्भनिभृतं,
गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु ॥
तत् सहदेव निवर्त्तस्व, एवञ्च अतिचिरप्रवृद्धामर्षोद्दीपितस्य भीमस्य वचनात् विज्ञापय राजानम् ।

त्येतेन स्वारितमिति भावः। दृष्ट्वा प्रत्यक्षमुपलभ्य न तु श्रुत्वा, ऋषसदसि ऋषाणां सदसि न तु एकान्ते नाप्यन्येषां क्षुद्राणां समीपे स्वजातीयानां, विशेषतः प्रधानानां, समक्षे अपमाननमतिदुःखकरमिति भावः । पञ्चालानां जनपदानां राजा तस्य तनयामित्यनेनाभिजात्यस्यूचनेनापि दुःखकरत्वं द्योतितम् । एवं कलत्रगतं दुःखं दर्शयित्वा आत्मनि भ्रातृषु च तदाह वने इत्यादि वने न तु ग्रामे, व्याधैः सार्द्धं सह,अथ वा व्याधोपजीविकाधारिभिरस्माभिः सार्द्धम् एकत्रस्थतया सहितैरुषितम् तत्रापि सुचिरम् नात्पकालम्। व्याधैरित्यनेनाजीविकायां दुःखमभिधाय परिधाने तदाह वल्कलधरैरिति । अनुचितानां द्यूतसहायतायाचकतास्त्रीनर्त्तनगवाश्वपालनादीनामारम्भेण अनुष्ठानेन निभृतं गुप्तं यथा स्यादेवं स्थितम् । खिन्ने कलत्रभ्रातृक्लेशं दृष्ट्वा स्वयञ्चानुभूय खेदं प्राप्ते, मयीत्यनेन एवं क्लेशे युष्माकं खेदाभावेऽपि आत्मनोऽसहिष्णुत्वं द्योतितम्। गुरुः खेदम् मनस्तापम् भजति अद्यापि इदानीमपि कुरुषु एवंक्लेशे सदायिष्वपि सेत्यर्थः । तस्य च खेदाभिज्ञत्वे

Digitized by Google

सह । आर्य्य किमिति ।

भीम । एवं विज्ञापय ।

(१)युष्मच्छासनलङ्घनाश्मसि मया मग्नेन नाम स्थितं,
प्राप्ता नाम विगर्हणा स्थितिमतां मध्येऽनुजानामपि ।
क्रोधोल्लासितशोणिताक्षणगदस्योच्छिन्दतः कौरवान्,
अद्यैकं दिवसं ममास्ति न गुरुर्नाहं विधेयस्तव ॥

तेषु विषयेषु अवश्यमेव खेदःस्यात् अतः पूर्वं यदुक्तं गुरुः खेदमपि जानातीति तत् समर्थितमित्याशयः ।

(१)नाम प्राकाश्ये, प्रकाशयामि यत् युष्मदाज्ञातिक्रमजले अन्तः प्रविष्टेन सता स्थितमिति । स्थितिमतां ज्येष्ठानुसरणरूपमर्य्यादावताम् द्वितीयं नाम सम्भावनायां, सम्भावयामि चात्मनो विगर्हणा अपीत्यतैवान्वयितव्यः निन्दापि प्राप्ता उपस्थितेति,अन्येषां ज्ञातृणामाज्ञानुसारित्वात् आत्मनस्तदतिक्रमान्निन्दा युक्तैवेति भावः उच्छिन्दतः समूलं नाशयतः अद्य संप्रतिकाले न त्वच्छिन्नहनि एकं दिवसं व्याप्य गुरुर्नियन्ता, उच्छेदनविषय एवार्थात् विधेयः नियम्यः । अत्र क्रोधोल्लासितेत्यनेनायुधान्तरापेक्षा नास्तीत्यस्य,उच्छिन्दत इत्यनेन समूलनाशनस्य,कौरवानित्यनेन सर्वेषाम्,अद्येत्यनेन एतावत्कालं प्रतिज्ञानुरोधेन सोढं नातः परं सोढव्यमित्यस्य,एकं दिवसमित्यनेन एकाह्नैव कृतकृत्यतायाः, ममेत्यनेन सहायान्तरापेक्षा नास्तीत्यस्य, च सूचनादुल्लाघातिशयोदर्शितः।अत्र कार्य्यस्य

Digitized by Google

इति साटोपम्(१)परिक्रामति ।

सह । तमेव अनुगच्छन् । आत्मगतम्(२)। अये कथमार्यः पाञ्चाल्याश्चतुःशालं प्रविष्टः । भवतु तावत्, अहमत्रैव तिष्ठामि । इति स्थितः ।

भीम । परानिहत्य अवलोक्य च । सहदेव गच्छ त्वं गुरुमनुवर्त्तस्व, अहमप्यायुधागारं प्रविश्य आयुधसहायो भवामि ।

सह । आर्य्य वेदमायुधागारं पाञ्चाल्याश्चतुःशालमिदम् ।

भीम । सवितर्कम् । किन्नाम नेदमायुधागारं, पाञ्चाल्याश्चतुःशालमिदम् । विचिन्त्य सहर्षम् । आमन्त्रयितव्या मया पाञ्चाली । सप्रणयम् सहदेवं हस्ते गृहीत्वा । वत्स आगम्यताम् ।

सह । यदादिशत्यार्यः ।

कौरवोच्छेदस्य हेतोर्गदासमुल्लासनस्य, अकार्यस्य च निन्दालाभ हेतोर्गुरुगासनलङ्घनस्योक्तेः परिकरनामकसन्धिस्थानम् "कार्याकार्यस्य हेतूनामुक्तिः परिकरो मत" इतिभरतशास्त्रात् ।

(१) साटोपं साहङ्कारम् ।

(२) आत्मगतम् स्वगतम् "यत्तु अन्यं न सर्व्वस्य स्वगतं तद्विद्योच्यत इति" भरतवाक्यात् ।

Digitized by Google

भीम । वत्स, यदार्य्यः कुरुभिः सन्धानमिच्छन्नस्मान् (१) पीड़यति तद्भवानपि पश्यतु । परिक्रम्य । उभौ गृहप्रवेशं नाटयतः ।

भीम । सक्रोधम् । भूमावुपविशति ।

सह । ससंभ्रमम् । आर्य्य इदमासनमास्तीर्णम् अत्रोपविश्य मुहूर्त्तम् आर्य्यः, पालयतु कृष्णागमनम् ।

भीम । वत्स, कृष्णागमनमित्यनेनोपोद्घातेन (२) तत् स्मृतम्, अथ भगवान् कृष्णः केन प्रकारेण सन्धिं कर्त्तुं सुयोधनं प्रति प्रहितः ।

सह । आर्य्य, पञ्चभिर्ग्रामैः ।

भीम । कर्णौ पिधाय । अहह ! कथं तस्य देव स्याजातशत्रोरप्ययमीदृशस्तेजोऽपकर्ष इति यत् सत्यं कम्पितमिव मे हृदयम् । तद्वत्स, न त्वया कथितम् न च मया भीमेन श्रुतम् । परिवृत्य स्थित्वा ।

यत्तद्दुर्ज्जितमत्युग्रं ज्वालं तेजोऽस्य भूपतेः ।
दीव्यताक्षैस्तदानेन नूनं तदपि हारितम् ॥

---

(१) सन्धिकरणेनेत्यादिः तत्करणे तु द्रौपदीकेशसंयमनं न स्यादिति हि नः पीडा ।

(२) कृष्णाया द्रौपद्या आगमनमित्युक्तौ कृष्णस्यागमनमपि तुल्यानुपूर्व्यीकपटप्रतिपाद्यतया स्मृतं तत्स्मृत्वा च संबन्धिज्ञानस्य तदीयकार्य्यस्मरणहेतुतया तदीयकर्त्तव्यसन्धिविषयकस्मरणमिति द्योतयन्नाह उपोद्घातेनेति "चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं

नेपथ्ये । समस्ससदु समस्ससदु भट्टिणी अवणइस्सदि दे मन्युं णिच्चाणुबद्धकुरुवेलोकुमालो भीमसेणो* ।

सह । कर्णं दृष्ट्वा नेपथ्याभिमुखमवलोक्य, आत्मगतम् ।

अये कथं याज्ञसेनी मुक्तरुपचीयमानवाष्पपटलाहतनयना आर्य्यसमीपमुपसर्पति, तत् कष्टतरमापतितम् ।

(१) यद्वैद्युतमिव ज्योतिरार्य्ये क्रुद्धेऽद्य सम्भृतम् ।
तत् प्रावृडिव कृष्णेयं नूनं संवर्द्धयिष्यति ॥

ततः प्रविशति यथानिर्दिष्टा द्रौपदी चेटी च ।

द्रौप । सवाष्पं निश्वसिति ।

चेटी । समस्ससदु, समस्ससदु भट्टिणी अवणइस्सदि दे मन्युं णिच्चाणुबद्धकुरुवेलो कुमालो भीमसेणो । †

विदुर्बुधा" इत्युक्तया प्रकृतसिद्ध्यनुकूलचिन्तयेत्यर्थः। कथोद्घातेनेति पाठे तु कथायाः कथान्तरस्य उद्घात उद्भेदो यस्मात् कथान्तर प्रसरणहेतुनानेनेत्यर्थः । तत्र हेतुस्तु तत्स्मारणमित्याशय।

(२) वैद्युतं विद्युत्प्रभवम् आर्य्ये भीमे संभृतं जातम् आर्य्यक्रोधेन सम्भृतमिति पाठस्तु दर्पणकृतोऽसम्मतत्वेनानादेयः इह "दिष्ट नामकं लक्षणं देशकालस्वरूपवर्णना दिष्टमुच्यते इति" दर्पणोक्तेः

---

* समाश्वसितु, समाश्वसितु भट्टिनी अपनेष्यति ते मन्युं नित्यानुबद्ध कुरुवैरः कुमारो भीमसेनः । इतरस्तुचभट्टिनीतिचकारात् महिष्योऽपि ।

† समाश्वसितित्वादि प्राग्वत् ।

Digitized by Google

द्रौप । हञ्जे बुद्धिमदिए होदि एदं जइ महाराओ पडिउलो ण भवे । * [

चेटी । विलोक्य । एसो कुमालो चिट्ठदि, ता णं उवसप्पदु भट्टिणी †

द्रौप । हञ्जे एव्वं करेह्म । ‡]

[ता णाधं पेक्खिदुं तुवरदि मे हिअअं ता आदेसेहि मे णाधस्स वासभवनम् । *

चेटी । एदु एदु भट्टिणी इति । † परिक्रामतः ।

चेटी । एदं वासभवणं ता पविसदु भट्टिणी । ‡

द्रौप । हञ्जे कधेहि णाधस्स मह आगमणं । **

चेटी । जं भट्टिणी आणवेदि । ††

इति परिक्रम्योपसृत्य च ।] इत्येष दाक्षिणात्यपुस्तके पाठः ।

---

* हञ्जे बुद्धिमतिके भवेत् एतत्, यदि महाराजः प्रतिकूलो न भवेत् । हण्डे हञ्जे हलाह्वानं नीचं चेटीं सखीं प्रतीत्यमरोक्तेः हञ्जे इति चेटीसम्बोधनसूचको निपातः ।

† एष कुमारस्तिष्ठति तदेनम् उपसर्पतु भट्टिनी ।

‡ हञ्जे एवं कुर्वः ।

---

* तत् नाथं प्रेक्षितुं त्वरते मे हृदयं तदादेशय मे नाथस्य वासभवनम् ।

† एतु एतु भट्टिनी ।

‡ एतत् वासभवनं तत्प्रविशतु भट्टिनी ।

** कथय नाथस्य ममागमनम् ।

†† यत् भट्टिनी आज्ञापयति

Digitized by Google

उभे प्रविशतः ।

चेटी । जअदु जअदु कुमालो ।*

भीम । अहस्खन् सक्रोधम् यत्तदूर्जितमिति पुनः पठति ।

चेटी । द्रौपदीमुपकृत्य । भट्टिणि पिअं दे णिवेदेमि परिकुविदो विअ कुमालो लक्खीअदि । †

द्रौप । हञ्जे अद्द एवं ता अवधीरणा वि एसा मं आस्सासअदि ज्जेव ता एत्थ उवविट्ठा भविअ सुणोमि दाव साहस्स ववसिदं । ‡

इति तथा कुरुतः ।

भीम । सक्रोधम् । सहदेवमधिकृत्य । किन्नाम पञ्चभिर्ग्रामैः सन्धिः ?

(१)मथ्नामि कौरवशतं समरे न कोपात्,
दुःशासनस्य रुधिरं न पिबाम्युरस्तः ।

---

(१) मथ्नामीत्यादौ सर्वत्र भविष्यत्सामीप्ये लट् । मथिष्यामीत्यादयर्थः दुःशासनानुरोधेन कौरवशतमथनम् असंभावितं

---

* जयतु जयतु कुमारः । कुमारोयुवराजः ।

† भट्टिनि, प्रियं ते निवेदयामि परिकुपित इव कुमारो लक्ष्यते ।

‡ हञ्जे, यद्येवं, तदवधीरणापि एषा मां समाश्वासयति, तदत्रोपविष्टा भूत्वा शृणोमि तावच्छास्त्रस्य व्यवसितम् । व्यवसितमध्यवसायमुद्यममिति यावत् ।

Digitized by Google

संचूर्णयामि गदया न ? सुयोधनोरू,
सन्धिं करोतु भवतां नृपतिः पणेन ॥

द्रौप । सहर्षम् । जनान्तिकम् । (१) णाह अस्सुदपूव्वं एदिसं वअणं ता पुणोवि भणाहि (२) । *

भीम । सहदेव पश्य मथ्नामि कौरवशतमित्यादि पुनः पठति ।

तत्र कार्यैकजनत्वेन व्युत्पन्नते। गुरुशासनाननुरोधे हेतुः कोपादिति क्रुद्धस्य कार्याकार्यविवेकराहित्यं प्रसिद्धमिति भावः। आत्मनोऽधुना विधेयत्वाभावस्योक्ततया भवतां नृपतिरित्युक्तम् । अत्र च आनुषङ्गिकरूपकर्त्तव्यपणश्रवणात् नष्टस्येव स्वप्रतिज्ञातस्य वैरनिर्यातनबीजस्य कुरुमथनादेः प्रकाशनात् प्रतिमुखनामकसन्धिः यथोक्तं भरतेन "आनुषङ्गिककार्येण क्रियते यत्प्रकाशनम् नष्टस्येह बीजस्य सन्धिः प्रतिमुखं भवेदिति" ।

(१) जनान्तिकं रङ्गजनसमीपेऽन्योन्यमन्त्रणम् "अन्योन्यमन्त्रणं यत् स्यात् जनान्ते तत् जनान्तिक"मिति भरतोक्तेः जनान्ते रङ्गदर्शकजनसमीपे न तु अभिनेयसमीप इत्यर्थः । दर्पणे तु त्रिपताकरेणान्यानपवार्यान्तरा कथेति अधिकं पठित्वा यः कश्चिदर्थोयस्माद्गोपनीयस्तस्मान्तरत अङ्गे सर्वाङ्गुलिनामितानामिकं त्रिपताकलक्षणं करं कृत्वान्येन सहयन्मन्त्र्यते तज्जनान्तिकमिति व्याख्यातम् ।

(२) इह प्राप्तिनामकं मुखाङ्गं प्राप्तिः सुखागम इति दर्पणोक्तेः।

---

* नाथ, अश्रुतपूर्वमीदृशं वचनं, तत्पुनर्भण ।

रह । आर्य्य, किं महाराजस्य संदेशोयमव्युत्-पन्न इव (१)गृहीतः ।

भीम । का पुनरत्र व्युत्पत्तिः ।(२)

रह । एवं गुरुणा संदिष्टम् ।

भीम । कस्य ।

रह । सुयोधनस्य ।

इन्द्रप्रस्थं दृकप्रस्थं जयन्तं वारणावतम् ।(३)

---

(१) अव्युत्पन्नः तात्पर्यविषयीभूतोऽर्थः पञ्चग्रामप्रमात्रविषय-त्वार्थः गृहीतः आपाततो ज्ञातः न तु तस्य पञ्चग्रामप्रमात्रपरता किन्तु अन्यार्थता स्फुटीभविष्यति चैतदुपरिष्टात् ।

(२) का व्युत्पत्तिः तात्पर्येण कीदृशार्थपरता ।

(३) इन्द्रप्रस्थं खाण्डवप्रस्थस्यैव संज्ञान्तरम् आदिपर्व्वणि २०७ अध्याये "ज्ञातिभिः सह कौन्तेय निबोध गदतो मम । पुन-र्वो विग्रहो मा भूत् खाण्डवप्रस्थमाविशे"त्युपदिष्टैः हास्तिनपुरात् विवासितैस्तैरभिनवपुरमिन्द्रप्रस्थनामकतया निर्म्मितं यथोक्तं तत्रैवाध्यायशेषे "एवं संप्राप्य राज्यं तदिन्द्रप्रस्थं तपोधनेति" जन-मेजयप्रश्नवाक्यम् । तथा चानेन हास्तिनपुरान्निर्वासनरूपापकार-स्थानं स्मारितम् । दृको दृकोदरः उत्तरपदलोपः । दृको भस्मकीट उदरे यस्य स दृकोदरस्तत्संज्ञाप्राप्तिस्थानं दृकप्रस्थं तच्च प्रमाण-कोटीस्थानमेव तत्रैव विषदानेन उन्मत्तीकृत्य स्थापिते भीमे दु-

Digitized by Google

देहि मे चतुरो ग्रामान् पञ्चमं कञ्चिदेव तु ।

भीम । ततः किम् ।

सह । तदेवमनया प्रतिग्रामग्रामप्रार्थनया पञ्चमस्य चाकीर्त्तनाद्विषभोजनजतुगृहद्यूतसमाह्वयापकारस्यानोद्घाटनमेवेदं मन्यामहे ।

र्योधनादि निर्मूलकाक्षमि निक्षिप्ते सति मातालगमनेन तत्र दग्धरसकुल्मान् भीतवति सति तेषामपि जारजात् दकोदर इति संज्ञा विख्याता । आदिपर्व्वणि १२८ अध्याये एषा कथाऽनुसन्धेया । तत्स्थानमात्रा च विषदानापकारस्मारणम् । जयन्तं द्यूतेन जयस्थानं तेन राज्यापहरणकालत्वधर्षणावनवासनाद्यपकारस्मारणम् । वारणावतम् जतुगृहदाहनस्थानम् "पाण्डवा धृतराष्ट्रेण प्रेषिता वारणावत" मित्युपक्रम्य "स त्वं रासभयुक्तेन स्यन्दनेनानुगामिना वारणावतमद्यैव यथा यासि तथा कुरु । – गृहाण्यर्च्चरसादीनि यानि द्रव्याणि कानिचित् आग्नेयान्युत वा सन्ति तानि तत्र प्रदापयेति" आदिपर्व्वणि १४४ अध्याये । पुरोचनं प्रति दुर्योधनवाक्यम् । तेन जतुगृहदानस्मारणम् । एवं प्रतिग्रामनाम्ना तत्तदपकारं स्मारयित्वा पञ्चमं कञ्चिदेव विल्वनेन प्रार्थितः तस्यायमाशयः कञ्चिदेव ग्रामं यद्येकदेशः ग्रामः सोऽपि ग्रामान्तरया ग्रामएव स च संग्रामएव तस्य ग्रामान्तरात् । अन्यस्य ग्रामान्तरस्य निवारणाय पञ्चमग्रामेति विशेषणम् । पञ्च पञ्चत्वं भावप्रधान

Digitized by Google

भीम। साटोपम्। वत्स, एवं कृते किं कृतं भवति।

सह। आर्य, एवं कृते लोके तावत् खगोत्पत्तयाग्रहि हृदयमानिष्कृतं कुरुराजस्यासम्भेयता च दर्शिता भवति।

भीम। सर्वमप्येतदनर्थकं, कुरुषु तावदसम्भेयता तदैव निवेदिता यदैवाभ्यामितो वनं गच्छद्भिः सर्वैरेव कुरुकुलस्य निधनं प्रतिज्ञातं, प्रसिद्धश्च लोकेऽपि धार्त्तराष्ट्रकुलक्षयः।

सह। लज्जां नाटयति।

भीम। किं? लज्जाकरो भवताम्, अपि च रे मूर्ख!

दुष्टान् हन्तुमयति क्रोधाल्लोके शत्रुकुलक्षयः।
न लज्जयति दाराणां सभायां केशकर्षणम्॥

द्रौप। जनान्तिकम्। णाह ण लज्जन्ति एदे तुमं वि दाव मा विसुमरेहि। *

निर्हेयः पञ्चानां भूतानां स्वस्वरूपापादकतया मरणमेव पञ्चत्वं तत् भाति ददातीति पञ्चमं मरणदं मरणफलकव्यापारवदुक्तमिति यावत् एवं संग्रामप्रार्थनया तेषाम् असम्भेयता दर्शितेतितात्पर्यार्थस्तदेवोत्तरत्र स्फुटीकरिष्यति।

---

* नाथ, न लज्जन्ते एते त्वमपि तावत् मा विस्मार्षीः

Digitized by Google

भीम। वत्स, कथं चिरयति पाञ्चाली, त्वरते मे मनः संग्रामावतरणाय।

सह। आर्य का खलु वेला(१)तत्रभवत्याः प्राप्तायाः, किन्तु रोषावेशवशादार्येण न लक्षिता।

भीम। दृष्टा। सादरम्। देवि, समुद्वतामर्षैरस्माभिरागतापि भवती नोपलक्षिता, अतो न मन्युं कर्तुमर्हसि।

द्रौप। णाह उदासीणेसु तुह्मेसु मह मणु, ण उण कुविदेसु। *

भीम। यद्येवमपगतपरिभवमात्मानं समर्थयस्व।

द्रौप। सखेदं निःश्वसिति।

भीम। हस्ते गृहीत्वा, पार्श्वे समुपवेश्य, मुखमवलोक्य च। किं पुनरत्रभवतीमुद्विग्नामिवोपलक्षयामि।

द्रौप। णाह, किं पि उब्भेअकालणं तुह्मेसु सण्णिहिदेसु। †

---

(१) का खलु वेला कियत्यपि वेला प्राप्तायाः आगमनावधिः कियानपि कालो व्यतीत इत्यर्थः।

---

* नाथ, उदासीनेषु युष्मासु मन्युर्न पुनः कुपितेषु। मन्युः खेदः

† नाथ, किमप्युद्वेगकारणं युष्मासु सन्निहितेषु। अप्यर्थोऽत्र गम्यः।

Digitized by Google

भीम । किमिति मामवेक्षसे । नेपथ्यमवलोक्य ।
अथ वा किमावेदितेन ।

जीवत्सु पाण्डुपुत्रेषु दूरमप्रोषितेष्वपि ।
पञ्चालराजतनया वक्ष्यते यदिमां दशाम् ॥

द्रौप । हञ्जे, बुद्धिमदिए णिवेदेहि दाव णाहस्स को अण्णो मह परिहवेण खिज्जइ । †

चेटी । जं देवी आणवेदि । भीममुपसृत्य । अज्जिं बद्धा। कुमाल, इदोवि अहिअं अज्ज मणुकालणम् आसी देवीए । ‡

भीम । किन्नामाख्यादप्यधिकम् तत् कथय कथय ।

(१)कौरव्यवंशदावेऽस्मिन् क एष ग्रसते ।
मुक्तवेणीं स्पृशन्नेनां कृष्णां धूमशिखामिव ॥

---

(१) कौरव्यवंशेवंशद्रव मानसराजहंसवत् श्लिष्टवंशशब्दस्य द्विधाप्रतीतिः । तत्र दावे दावानले ऽस्मिन् मयीत्यर्थात् । मुक्तवेणीं मुक्तवेगां कृष्णां श्यामलां धूमशिखामिव मुक्तवेणीं मुक्तकेशरचनां कृष्णां द्रौप्रदीं स्पृशन् सन् समासान्तविधेरनित्यत्वात् मुक्तवेणी-मित्यत्र न कप् । ग्रसते यतेऽत्र कृवाचरति यथा वल्गौ पतङ्गस्य स्वल्पेरेवं तस्यापिस्यादिति भावः ।

---

† हञ्जे बुद्धिमतिके, निवेदय तावन्नाथस्य, कोऽन्यो मम परिभवेण खिद्यते ।

‡ यत् देवी आज्ञापयति । कुमार, इतोऽप्यधिकमद्य मन्युकारणं मासीद्देव्याः । इतः अनुभूयमानक्लेशसंयमनाभावरूपादस्मादित्यर्थः ।

Digitized by Google

चेटी। सुणादु कुमालो, अज्ज देवी अम्बासहिदा सुभद्दाप्पमुहेण सवत्तिवग्गेण परिविदा अज्जाए गाम्बालीए पादवन्दणं कादुं गदा आसी। *

भीम। युज्यते, यतोऽभिवन्दनीया गुरवः, ततस्ततः।

चेटी। तदो पडिविबुत्तमाणा भाणुमदीए दिट्टा। †

भीम। सक्रोधम्। आः पापीभार्य्यया दृष्टा! हन्त स्थानम् क्रोधस्य साम्प्रतं देव्याः। ततस्ततः।

चेटी। तदो ताए देवीं पेक्खिअ सहीवअणं दिण्णदिट्ठिए सगव्वं विहसिअ भणिदं। ‡

भीम। न केवलं दृष्टा उक्ता च, अहो किं कुर्म्मः। ततस्ततः।

---

* शृणोतु कुमारः, अद्य देवी अम्बासहिता सुभद्राप्रमुखेण सपत्नीवर्गेण परिवृता आर्य्याया गाम्बार्य्याः पादवन्दनं कर्त्तुं गता आसीत्।

† ततः प्रतिनिवर्त्तमाना भानुमत्या दृष्टा।

‡ ततस्तया देवीं प्रेक्ष्य सखीवदनदत्तदृष्ट्या सगर्वं विहस्य भणितम्।

Digitized by Google

चेटी। अइ जण्णसेणि! पच्चग्गामा पत्थीअन्ति त्ति सुणी अदि ता कीस दाणीं वि दे केसा ण संजमीअन्ति।*

भीम। सहदेव! श्रुतम्।

सह। आर्य्य! किमिहोच्यते*। दुर्योधनकलत्रं हि सा, पश्य स्त्रीणां हि साहचर्य्यात् भवन्ति चेतांसि भर्तृसदृशानि। मधुरापि हि मूर्च्छयते(१) विषविटपिसमाश्रिता वल्ली॥

भीम। बुद्धिमतिके ततो देव्या किमभिहितम्।

चेटी। कुमाल! अइ परिजणहीणा भवे तदो देवी भणादि।†

भीम। किं पुनरभिहितं भवत्या।

चेटी। कुमाल! मए एव्वं भणिदं, अइ भानुमदि दुस्सासणस्स अमुक्केसु केसेसु कधम् अय्यस्स देवीए केसा संजमीअन्ति त्ति।‡

(१) मूर्च्छयते मुग्धं करोति अत्र तद् चिन्त्यः।

* [उचितमेवैतत्तस्याः] इति दर्पणेऽधिक पाठः। अत्र दृष्टान्तो वस्तु पदार्थसाधनाय निदर्शनमिति दर्पणोक्त दृष्टान्तरूप खण्डं नाम नाटमाङ्कम्।

* अयि याज्ञसेनि पश्य यामाः प्रार्थ्यन्ते इति श्रूयत तत् कस्मादिदानीमपि ते केशा न संयम्यन्ते।

† यदि परिजनहीना भवेत् तदा देवी भणति।

‡ कुमार, मया एवं भणितम् अयि भानुमति दुश्शासनस्य अमुक्तेषु केशेषु कथमस्माकं देव्याः केशाः संयम्यन्त इति।

Digitized by Google

भीम । सपरितोषम् । साधु बुद्धिमतिके साधु, तद्भिहितं यदस्मत्परिजनोचितम् ।

स्नाभरणानि बुद्धिमतिकायै प्रयच्छति । अधोरमासनादुत्तिष्ठन् ।

अयि पञ्चालतनये अलं विषादेन किं बहुना यत् करिष्ये तत् श्रूयताम् अचिरेणैव कालेन ।

(१)चञ्चद्भुजभ्रमितचण्डगदाभिघात
सञ्चूर्णितोरुयुगलस्य सुयोधनस्य ।
स्यानावनद्धघनशोणितशोणपाणि
रुत्तंसयिष्यति कचांस्तव देवि भीमः ।

द्रौप । किं णाह दुक्करं तुए परिकुविदेण अणुगेसन्तु एदं ववसिदं ते भादरो । *

---

(१) चञ्चद्भ्यां चलद्भ्यां भुजाभ्यां भ्रमितया घूर्णितया गदया संचूर्णितमुरुयुगलं यस्य तादृशस्य, हननमात्रे बहुल शोणितालाभात् संचूर्णितेत्युक्तम्। स्यानं स्निग्धितं यथा तथा अवनद्धं संलग्नं यत् घनशोणितं सान्द्ररक्तं तेन शोणपाणिः सन् तव कचान् उत्तंसयिष्यति भूषयिष्यति उत्तम्भयिष्यतीति पाठे रंयमयिष्यतीत्यर्थः अत्र "प्रतिक्रियान्वितं वाक्यं प्रतीकारः स उच्यते" इति भरतोक्तप्रतीकाराख्यं नाटकाङ्गम् । "परिन्यासस्तु कार्यस्य भाविनो निश्चयादयम्" इत्युक्त लक्षणं परिन्यासाख्यंमुखाङ्गम् ।

* किं नाथ दुष्करं त्वया परिकुपितेन, अनुगच्छन्तु एतत् व्यवसितं ते भ्रातरः । गुणाख्यानं विलोभनमितिदर्पणोक्तम् विलोभाख्यं मुखाङ्गम् ।

Digitized by Google

सह । अनुगृहीतमेतदस्माभिः ।

नेपथ्ये महान् कलकलः(१)।

सर्वे सविस्मयमाकर्णयन्ति ।

भीम ।

(२)मन्थायस्तार्णवाम्भःप्लुतकुहरवलन्मन्दरध्वानधीरः
कोणाघातेषु गर्ज्जत्प्रलयघनघटान्योन्यसंघट्टचण्डः ।
कृष्णाक्रोधाग्रदूतः कुरुपतिनिधनोत्पातनिर्घातवातः
केनास्मत्सिंहनादप्रतिरसितसमो दुन्दुभिस्ताड्यतेऽयम्॥

प्रविश्य संभ्रान्तः कञ्चुकी । कुमार एष खलु भगवान् वासुदेवः ।

सर्वे कृताञ्जलयः समुत्तिष्ठन्ति ।

भीम । क्वासौ क्वासौ भगवान् ।

---

(१) अकस्मादुत्थितोऽव्यक्तः महान् शब्दः कलकलः ।

(२) मन्थेन मन्थनदण्डेन आयस्तं विक्षिप्तं चालितं यदर्णवस्याम्भस्तेन प्लुतं व्याप्तं कुहरं मध्यं यस्य तादृशस्य वलत श्चलतो मन्दरस्य तद्रूपकाचलस्य ध्वानइव धीरः गभीरः । "ढक्काशतसहस्राणि भेरीशतशतानि च। एकदा यत्र हन्यन्ते कोणाघातः स उच्यते" इति भरतोक्तलक्षणेषु कोणाघातेषु सत्सु गर्ज्जतां प्रलयकालिकघनानां घटायाः समूहस्य अन्योन्यसंघट्टः परस्परसंघर्षणं तज्जातशब्द इव चण्डः भैरवः । कृष्णाया द्रौपद्याः कारणात्सैव क्रोधस्याग्रदूतः आगमनसूचकोऽग्रगामीदूतः नकीव इति प्रसिद्धः । कुरुपतिनिधनस्योत्पात सूचकः निर्घातवातः प्रचण्डानिलः ।

Digitized by Google

कञ्चु। पाण्डवपक्षपातामर्षितेन सुयोधनेन संयमितुमारब्धः ।

सर्वे सम्भ्रमं नाटयन्ति ।

भीम। किं संयतः ।

कञ्चु। नहि नहि संयमितुमारब्धः ।

भीम। किं कृतं दैवेन ।

कञ्चु। ततः स महात्मा दर्शितविश्वरूपतेजः-सम्पातमूर्च्छितमवधूय कुरुकुलम्, अस्माच्छिविरसन्नि-वेशमनुप्राप्तः कुमारमविलम्बितं द्रष्टुमिच्छति ।

भीम। सोपहासम्। किं नाम दुरात्मा सुयो-धनो भगवन्तं संयमितुमिच्छति ।

आकाशे दत्तदृष्टिः। आः दुरात्मन् कुरुकुलपां-सल एवमतिक्रान्तमर्य्यादे त्वयि निमित्तमात्रेण पा-ण्डवक्रोधेन (१) भवितव्यम् ।

सह। आर्य्य ? किमसौ दुरात्मा सुयोधनो वासु-देवमपि भगवन्तं स्वेन रूपेण न जानाति ।

भीम। वत्स ? मूढः खल्वयं दुरात्मा कथं जानातु। पश्य

---

(१) भगवदपराधाजनितदुरितेनैवाचिरादेव नाशोभावीत्याशयः ।

Digitized by Google

(१)आत्मारामा विहितरतयो निर्विकल्पे समाधौ
ज्ञानोद्रेकाद्विघटिततमोग्रन्थयः सत्त्वनिष्ठाः ।

---

(१) आत्मा आरामभुपवनमिवानन्दस्थानत्वात् तस्मिन् आसम्यक् विहिता रतिरनुरागोयैःते आत्मोपवनसम्यक्कृतानुरागाः योगिनइत्यर्थः अथ वा आत्मनि आरमन्ते इत्यात्मारामाः, विहिते विशिष्टहिते मोक्षसाधने एव रतिरनुरागो येषामिति पदद्वयस्य आत्मन्येवाभिरता मुमुक्षवस्त्वेत्यर्थः अनेन रजोगुणकर्मवैषयिक रागरहित्यमुक्तम् ज्ञानोद्रेकात् ज्ञानहेतुभूतसत्त्वांशविशेषस्य उद्रेकात् रजस्तमोभ्यामनभिभवादाधिक्येन प्रकाशनात् विघटिता विनाशिताखिलमसां ग्रन्थयः संशयविपर्ययादयो येषां ते "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे" इति श्रुतौ परमात्मज्ञानस्य सर्वसंशयनिवारकतायाः उक्तेस्तदेकवाक्यत्वात्तथैव तमोग्रन्थिशब्दार्थोऽवसेयः । सत्त्वेषु सत्त्वधर्म्मेषु मैत्रीकरुणामुदितादिषु निष्ठा निःशेषेण स्थितिर्येषां ते अथ वा विषयरागशून्यत्वात् सर्वतामसनाशनाच्च विशुद्धसत्त्वप्रधानाइत्यर्थः। निर्विकल्पे कल्पनारहिते मितिमेयमात्रादिभेदशून्ये असंप्रज्ञातनामके योगशास्त्रप्रसिद्धे, समाधौ ध्यानविशेषे तमसां तमःकार्य्याणां ज्योतिषां सत्त्वगुणानां तत्कार्य्याणां, वा ऽनुक्तसमुच्चयार्थे "वा स्यादिकल्पोपमयोरेवार्थे च समुच्चये" इति कोषात् । अनुक्तानां रजसां च परस्तात् काले प्रलयादौ देशे वा 'पादोऽस्य सर्वाभूतानि त्रिपादस्यामृतं दिवी'तिश्रुतौ कार्यातीतत्वमुक्तम् तत् वर्त्तमानं त्रिगुणातीतस्थानस्थमित्यर्थः परस्तादिति

Digitized by Google

यं वीक्षन्ते कमपि तमसां ज्योतिषां वा परस्तात्
तं मोहान्धः कथमयममुं वेत्ति देवं पुराणम् ॥
आर्य्य मैत्रेय किमिदानीमध्यवस्यन्ति(१) गुरवः ।

क्षत्तु। स्वयमेव गत्वा महाराजस्याध्यवसितं ज्ञास्यति कुमारः । इति निष्क्रान्तः ।

नेपथ्ये । कलकलानन्तरम् । भो भो द्रुपदविराटकृष्णप्रभृतयः अक्षौहिणीपतयः कौरवचमूप्रधानयोधाश्च शृण्वन्तु भवन्तः ।

दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः (५, ३, २७, पा० सू०) सप्तम्यर्थे अस्तातिः तस्य चातसर्थतया षष्ठ्यतसर्थेत्यादिना (२, ३, ३०, पा० सू०) तमसामित्यादौ तद्योगे षष्ठी । तस्य च दिग्देशकालवृत्तिविषयत्वनियमेन परस्तात् परमिति द्वितीयान्तपरतया व्याख्यानमपव्याख्यानमेव अस्तातेः प्रथमापञ्चमीसप्तमीभिन्नविभक्तौ अननुशासनात् । यं, कमपि इदन्तया निर्वक्तुमशक्यत्वेन अनिर्वचनीयं तत्र तत्रेति सर्वनिषेधे परिशिष्यमाणमित्यर्थः। वीक्षन्ते साक्षात् कुर्वन्ति। तं परात्मानमसुं पूर्वप्रस्तावितं वासुदेवं देवं द्योतनशीलं पुराणं पुरापि नवं कूटस्थं नित्यमपरिणामिनं मोहान्धः मोहेनान्धवदन्धः ज्ञानशक्तिरहितः मोहात्मेति पाठे तु मुह्यतीति मोहः पचाद्यच् । मोहः मुग्ध आत्मा अन्तःकरणं यस्य तादृशः अयं दुर्योधनः कथं वेत्ति जानाति वेदनसामग्र्याभावात् न कथमपीत्यर्थः । वेत्तीति पाठे संभावनायां लोट् ।

(१) अध्यवस्यन्ति कुर्वन्ति अध्यवसायस्त्वेह उद्यमविशेषः ।

Digitized by Google

(१)यत् सत्यव्रतभङ्गभीरुमनसा यत्नेन मन्दीकृतं
यद्विस्मर्तुमयीहितं शमवता शान्तिं कुलस्येच्छता ।
तद् द्यूतारणिसम्भृतं नृपसुताकेशाम्बराकर्षणैः
क्रोधज्योतिरिदं महत् कुरुवने यौधिष्ठिरं जृम्भते ॥

भीम । आकर्ण्य सहर्षामर्षम् । जृम्भतां जृम्भताम-
प्रतिहतप्रसरमार्य्यस्य क्रोधज्योतिः ।

---

(१) सत्यमेव व्रतं तस्य भङ्गात् भीरुमनसा मनोभङ्गे यः सत्यभङ्ग-स्तद्भीतेनेत्यर्थः । यत्नेन क्रोधावेशनिवारणस्य दुष्करतया यत्ना-तिशयेनेत्यर्थः । मन्दीकृतं वेगराहित्येन स्थगितमिवाप्रचारित-व्यापारीकृतमित्यर्थः शमवता शान्तिप्रधानेन कुलस्य शान्तिमविना महोपप्लवराहित्यम् । द्यूतमरणिर्वह्निमन्थनकाष्ठविशेषस्तव तेन संभृतमुत्पादितं नृपस्य राज्ञो द्रुपदस्य सुता द्रौपदी तस्याः केशेष्वम्बरेषु चाकर्षणानि तैर्महत् बहुलीभूतम् कुरूणां जन-पदानां राजानः कुरवः तदाख्यार्थकतद्धितलुपि सिद्धम् ते वन-मिव दाह्यत्वात् तस्मिन् यौधिष्ठिरं क्रोधज्योतिः क्रोधोज्यो-तिरिव जृम्भते वेगवत्तया व्यापारान्वितं सत् संप्रकाशते इत्यर्थः । अत्र क्रोधज्योतिरित्यादौ उपमितसमासएव वाच्यः रूपकसमासे विस्मरणमेवाम्बराकर्षणजतमहत्त्वयोर्ज्योतिषोऽसंबन्धादन्वयायोगात् । इह खल्वा भवन्तु मयीत्यादिना बीजस्य प्रधाननायकाभिमतत्वेन सम्यगाधानात् समाधाननामकं नाटकाङ्गं यथोक्तं दर्पणे बीजस्यागमनं यत्तु तत्समाधानमुच्यते इति ।

Digitized by Google

पुनर्नेपथ्ये कलकलः।

द्रौप। सविस्मयम्। णाह किं दाणीं एसो[ ] पलअजलहरघणत्थणिदमंसलो(१)क्खणे क्खणे समर दुन्दुही ताड़ीअदि। *

भीम। देवि किमन्यत् यज्ञः प्रवर्त्तते।

द्रौप। सविस्मयम्। को एसो जण्णो। †

भीम। रणयज्ञः, तथाहि।

(२)चत्वारोवयमृत्विजः,स भगवान् कर्म्मोपदेष्टा हरिः संग्रामाध्वरदीक्षितो नरपतिः पत्नी ग्टहीतव्रता।

---

(१) घनस्तनितं निरन्तरगर्ज्जितं तदिव मांसलः गभीरः इत्यर्थः इह विद्रवाख्योगर्भसन्धिः यथोक्तं भरतेन "शङ्काकलङ्क प्रभवः संभ्रमो विद्रवोमत" इति।

(२) वयं त्वदादिग्रेवे भीमादयः ऋत्विजः ऋत्विज इव पशु मारणाकृतिरूपहेतिप्रक्षेपादिना ऋत्विक्त्वमस्माकम् तथाऋत्विक्

---

* नाथ, किमिदानीम् एष प्रलयजलधरघनस्तनितमांसलः क्षणे क्षणे समरदुन्दुभिस्ताड्यते। युद्धं स्यान्नवेति संशयाना तूर्य्यर वानन्तरं कुतूहलितया जिज्ञासनात् परिभावनानामकं नाटकाङ्गं यथोक्तं दर्पणे "कुतूहलोत्तरा वाचः प्रोक्ता तु परिभावने" ति।

† क एष यज्ञः।

[चण्डघोसदालुणो] इत्यधिक पाठः।
[चण्डघोषदारुणः]

Digitized by Google

कौरव्याः पशवः, प्रियापरिभवक्लेशोपशान्तिः फलं, राजन्योपनिमन्त्रणाय रसति स्फीतं यशोदुन्दुभिः ॥

सह० । आर्य्य, गच्छामो वयमिदानीं गुरुजनानुज्ञाता विक्रमानुरूपमाचरितुम् ।

भीम० । वत्स, एते वयमुद्यता एवार्य्यस्यानुज्ञामनुष्ठातुम् । उत्थाय । देवि, गच्छामो वयमिदानीं कुरुकुलक्षयाय । (१)

कृतयज्ञफलस्य यजमाने इवास्मात्कृतरणायज्ञजयस्य राजन्येव भविष्यतीत्यपि ऋत्विक्त्वारोपेण सूचितम् । कर्म्मोपदेष्टा आचार्य्यः उपदेशसाधर्म्यात् आचार्य्यत्वम् । संग्रामएवाध्वरो-यज्ञस्तत्र दीक्षितः दीक्षा यज्ञाङ्गव्रतविशेषो जातास्येति दीक्षितः कृतसंकल्पव्रतमात्रकारित्वमेव तस्यास्माभिरेव सर्व्वकार्य्यस्य करणान्न कृत्यान्तरे तस्य स्वयंकर्त्तृतेति भावः । पत्नी गृहीतव्रता यज्ञसंस्कारादिराहित्यमेवेह साम्यात् यज्ञाङ्गव्रतं तद् गृहीतं ययेति विग्रहः । कौरव्याःकुरुषु भवाः कुरुनादिभ्योण्यः(४,१, १७२पा०सू०)ण्यः। तएव पशवः बध्यत्वात् । राजन्योपनिमन्त्रणायत्यत्रियमात्राह्वानाय यशःप्रख्यापकोदुन्दुभिःयशोदुन्दुभिर्वाद्यभेदः स्फीतं उच्चैर्यथा तथा रसति शब्दायते । अत्र उद्भेदनामा मुखसन्धिः यथोक्तं भरतेन "बीजप्ररोह उद्भेदो यत्किञ्चित्प्रभवात्मक" इति ।

(१) अत्र कारणनामा मुखसन्धिः "उद्यमः प्रस्तुतार्थस्य कारणं परिकीर्त्तित"मिति भरतवाक्यात् ।

Digitized by Google

द्रौप । वाम्यं धारयन्ती । णाह असुरसमराहिमुहस्स हरिणो विअ मङ्गलं तुह्माणं होदु[। *

चेटी । अम्मं च देवी भणादि । णाह तुह्मेहिं पुणोवि समरादो आअच्छिअ अहं आस्सासदव्वा ।†

भीम देवि किमलीकाश्वासनेन ।

(१)भूयःपरिभवक्लान्तिलज्जाविधुरिताननम् ।
अनिःशेषितकौरव्यं न पश्यसि वृकोदरम् ॥

द्रौप । णाह मा क्खु मा क्खु जस्सेणीपरिट्ठिअ बुड्ढोविदकोवाणला अणपेक्खिदसरीरा संचरि-

---

(१) भूयान् बद्धलो यः पराभवस्तेन या क्लान्तिर्लज्जा च ताभ्यां विधुरितं बन्धुरितेति पाठे व्याप्तम् आननं वदनं, यस्य तम् अथवा भूयदृति न पश्यसीति क्रियाविशेषणम् भविष्यत्वा-मीप्ये लट् न द्रक्ष्यसीत्यर्थः ।

(*) नाथ, असुरसमराभिमुखस्य हरेरिव मङ्गलं युष्माकं भवतु ।

(†) अन्यच्च देवी भणति, नाथ, युष्माभिः समरादागत्य अहमाश्वासयितव्या ।

[जं च अम्बाकुन्ती आसासदि तद् तुह्माणं होदु ।]

यच्च अम्बा कुन्ती आश्वासते तत् युष्माकं भवतु ।

Digitized by Google

अध जदो अप्पमत्तसंचरणिज्जाइं रिउबलाइं सुणीअन्ति । *

भीम अयि सुक्षत्रिये, समर्था वयमस्मिन् रणे परिक्रमितुम् । शृणु ।

(१) अन्योन्याक्षालभिन्नद्विपरुधिरवसामांसमस्तिष्कपङ्के
मग्नानां स्यन्दनानामुपरिकृतपदन्यासविक्रान्तपत्तौ ।

---

(१) आक्षालनं संघर्षणं भिन्नो विदारितः । वसा हृन्मेदः चरवीति प्रसिद्धं मस्तिष्कं क्लोमं शिरस्थदृताकारद्रव्यविशेषः ताभ्येव पङ्कस्तस्मिन् मग्नानां स्यन्दनानामुपरि यः पदन्यासः सएव विक्रान्तपत्तिर्विक्रमशालिसेना यत्र तादृशे, स्फीतारुजः प्रवाहेण स्रुतरुधिरस्य पानगोष्ठ्यां पानार्थसजातीयसभायां रसन्त्यः शब्दायमानाः अशिवाः अमङ्गलसूचिका याः शिवाः शृगालिकास्ताएव तूर्यो महूलनामवाद्यं तेन नृत्यन् कबन्धोऽशिरस्कःकलेवरं यत्र तादृशे, संग्रामैकार्णवान्तःपयसि,एकार्णवःप्रलयार्णवः तत्रैव समुद्राणां जलप्लवेनैकरूपतापत्तेः संग्रामः एकार्णवान्तःपयइव गाम्भीर्येण दुस्तरत्वेन च संग्रामस्य तत्सादृश्यम् तत्र पाण्डुपुत्राः। सञ्चरितुं पण्डिताः इत्यर्थः । संग्रामेत्यादावुपमितसमासात्पूर्वोक्तविशेषणद्वयसङ्गतिः रूपकसमासे तदसङ्गतिरिति बोध्यम् ।

(*) मा खलु मा खलु यावत्सेनापरिभवोद्दीपितकोपानला अनपेक्षितशरीराः सञ्चरिष्यथ, यतोऽप्रमत्तसञ्चरणीयानि रिपुबलानि श्रूयन्ते ।

Digitized by Google

स्त्रीताङ्क्पानगोष्ठीरसदग्निवग्निवातूर्यहत्यत्कबन्धे
संग्रामैकार्णवान्तःपयसि विचरितुं पण्डिताःपाण्डुपुत्राः।

इति निष्क्रान्ताः(१)सर्वे।

प्रथमोऽङ्कः।

---

(१) पात्रैस्त्रिचतुरैरङ्कस्तेषामन्ते च निर्गम इत्युक्तेः प्रविष्टपात्राणामङ्कशेषे निष्क्रान्तेरावश्यकत्वान्निष्क्रान्ता इत्यक्तम्।

इति श्रीतारानाथ तर्कवाचस्पति भट्टाचार्य्य
विरचिते वेणीसंहारनाटक
व्याख्याने प्रथमाङ्कः।



Digitized by Google

अथ द्वितीयोऽङ्कः ।



ततः प्रविशति कञ्चुकी ।

कञ्चु । आज्ञापितोऽस्मि(१)महाराजदुर्योधनेन विनयन्धर गच्छ त्वमन्विष्यतां(२)देवी भानुमती, अपि(३)निवृत्ता अम्बायाः पादवन्दनसमयान्न वेति, यतस्तां विलोक्य निवृताभिमन्यवो राधेयजयद्रथप्रभृतयः क्षत्रियाः समरभूमिं गत्वा सभाजयितव्याः(४) इति,तन्मया द्रुततरं गन्तव्यमिति, अहो प्रभविष्णुता(५)महाराजस्य, यन्मम जरसाभिभूतस्य मर्य्यादामात्रमेवावरोधव्यापारः (६) अथ वा किमिति

(१) आज्ञापितोऽस्मीत्यस्य सभाजयितव्या इतीत्यनेनान्वयः ।

(२) अन्विष्यताम् अनुसन्धीयताम् ।

(३) अपिः प्रश्ने ।

(४) सभाजयितव्याः सम्मानपूर्वकमभिनन्दनीयाः ।

(५) प्रभविष्णुता प्रभावशालिता यद्वार्द्धक्यसमर्थस्य जरयाभिभूतस्यापि मम अवरोधव्यापारस्वदृच्छित्वमिति भावः।

(६)अवरोधव्यापारः अन्तःपुरकर्म्मकरणं जरसाभिभूतस्य कर्म्मानर्हत्वेऽपि प्रभोरात्मयैव मर्य्यादाहेतुना सर्वकर्मनिर्वाहइतिभावः ।

Digitized by Google

जरामुपालभमहे यतः सर्व्वान्तःपुरिकाणामयमेव व्यवहारिको वेष श्चेष्टा च(१)तथाहि,
(२)नाञ्चैः सत्यपि चक्षुषीक्षितुमलं श्रुत्वापि नाकर्णितं,
यष्ट्यक्तेनाप्यधिकार इत्यधिकृता यष्टिः समालम्ब्यते ।
सर्व्वत्र स्खलितेषु दत्तमनसा यातं मया नोद्धतं,
सेवास्वीकृतजीवितस्य जरसा किं नाम यन्मे कृतम् ॥

---

(१) सर्व्वान्तःपुरिकाणामन्तःपुरेऽधिकृतानां सर्व्वेषामेव व्यवहारिक स्वतत्यव्यवहार्योग्यः अयं मदीयवेशप्रायो वेषः चेष्टा च मद्विधैव । तथा चान्तःपुरेऽधिकृतैर्मद्विधवेषचेष्टावद्भिर्भवितव्यमन्यथा स्त्रीदूषणादिशङ्कया ततोऽपसारणं लभ्येतेति भावः ।
(२) स्वानुभूतवेषचेष्टादिवर्णनेनान्तःपुरोपयोगिवेषचेष्टादिकं दर्शयति तथाहीत्यादि चक्षुषि सत्यपि उच्चैरूर्द्धमीक्षितुं नालं न पर्याप्तः तथा चान्तःपुराधिकारिणा अधोनयनेन भवितव्यमिति दर्शितम् । एवं श्रुत्वापि नाकर्णितं श्रुतवताप्यश्रुतवतेव व्यवहर्त्तव्यमिति भावः । यष्टिं विना गन्तुं शक्तेनापि अधिकृता मया यष्टिरवलम्ब्यते अशक्तत्वख्यापनार्थं न त्वालम्बनार्थं तथा च गमनशक्तिमतापि तदशक्तत्वख्यापनाय यष्टिमवलम्ब्यैव गन्तव्यमिति भावः । अधिकार इति कञ्चुकिनो यष्टिधारणमवश्यं कर्त्तव्यमितिहेतोः यष्ट्यवलम्बनमित्यपि सूचितम् । किञ्च सर्वत्र सर्वस्थानेषु स्खलितेषु

परिक्रम्य दृष्ट्वा आकाशे। (१)विहङ्गिके! अपि श्वश्रू-जनपादवन्दनं कृत्वा प्रतिनिवृत्ता भानुमती। कर्णं दत्त्वा। किं कथयसि, आर्य्य! एषा भानुमती देवी पत्युः समरविजयाशंसया निर्वर्त्तितगुरुपादवन्दनाऽद्य प्रभृत्यारब्धनियमा देवगृहे बालोद्याने तिष्ठतीति। तद्भद्रे गच्छ त्वमात्मव्यापाराय यावदहमप्यत्रस्थां देवीं महाराजस्य निवेदयामीति। परिक्रम्य। साधु पतिव्रते साधु, स्त्रीस्वभावे वर्त्तमाना वरं (२)भवती, न पुनर्महाराजः, योऽयमुद्यतेषु

ग्रन्थेषु पतनसूचनव्यापारेषु दत्तमनसा कृतधिया उद्धतमुत्कटं न यातं गन्तुं समर्थेनापि तथागमने पतितःस्यामिति सूचनार्थमेव नोद्धतगमनं कृतमिति भावः। तथा च यदेतत् मे मम कर्म्म तत् किं नाम जरसा कृतमपि तु नैवेत्यर्थः तच्च विशेषणेन सूचयति सेवेत्यादि सेवया स्त्रीकृतमायत्तीकृतं जीवितमायुःकालो यस्य तस्य मम सेवावश्यंवदतया धनाश्रयैव तथा कृतं न तु जरया। एवञ्च जरोपालम्भोव्यर्थःधनाश्रयैवोपलब्धव्येति निर्गलितार्थः।

(१) "दूरस्थाभाषणं यत् स्यादशरीरनिवेदनम्। परोक्षान्तरितं वाक्यं तदाकाशे निगद्यते" इति भरतवाक्यात् विहङ्गिकां तन्नामिकां परिचारिकां दूरस्थां सम्बोध्य वदतीति शेषः।

(२) वरं मनागपीष्टा "मनागिष्टे वरं यत्तु कञ्चिदाह तदव्ययमि"ति कोषः।

Digitized by Google

बलवत्सबलवत्सु वा वासुदेवबन्धुषु पाण्डुपुत्रेष्वरिषु च अद्यापन्नः पुरविहारमनुभवति ।

विचिन्त्य । दृढमयथातथं(१)स्वामिनश्चेष्टितम्, कुतः, (२)आ ग्रस्तग्रहणादकृष्टपरशोरप्यस्य जेता मुनेस्तापायास्य न पाण्डुसूनुभिरयं भीष्मः शरैः शायितः। प्रौढानेकधनुर्धरारिविजयश्रान्तस्य चैकाकिनो बालस्यायमरातिलूनधनुषः प्रीतोऽभिमन्योर्वधात् ॥

सर्वथा दैवतं नः स्खलिकरिष्यतीति, यावद्-

(१) अयथातथमनर्हम् ।

(२) ग्रस्तग्रहणमारभ्याकृष्टपरशोरनभिभूतपरशुग्रस्तस्य तस्य प्रसिद्धस्य परशुरामस्य जेता "उद्योगपर्वणि अम्बोपाख्याने १८६ अध्याये "जितोऽस्मि भीष्मेति सुमन्दबुद्धि" रत्यनया सा कथाऽनुसन्धेया । स्वः शरैः शायितः अस्य राज्ञः तापाय न । प्रौढाः प्रबलाः ये अनेके धनुर्द्धरा महारथा एवारयस्तेषां विजयेन श्रान्तस्य एकाकिनोऽसहायस्य द्रोणकृतव्यूहमध्ये कस्यापि प्रवेशाभावात्, बालस्याल्पवयस्कस्य अरातिलूनधनुषः समासान्तविधेरनित्यत्वान्नञादेशः । धनुर्हीनस्येत्यनेन सुजेयत्वोक्त्या हर्षस्यानाभावेऽपि हर्षस्यानत्वेनोद्भावनमयथातथमिति भावः अभिमन्युवधकथा च "एवं विनिहतो राजन् एको बहुभिराहवे" त्यादिभयित्वा चमूं सर्वां" मित्यनया द्रोणपर्वणि ४६ अध्याये अनुसन्धेया । "विष्कम्भकादौरपि नो वधो वाच्योऽधिकारिण" इति दर्पणेऽधिकारिणएव विष्कम्भके वधवर्णननिषेधो न तु सेनापत्यानादीनामिति तद्वर्णनेऽपि न क्षतिः ।

(१)वस्तां देवीं महाराजस्य निवेदयामीति निष्क्रान्तः। विष्कम्भकः। (२)

ततः प्रविशत्यावनद्धा देवी भानुमती दासी चेटी च।

दासी। सखि भानुमदि कीस दाणीं तुमं सिविणअदंसणमेत्तस्स विदे अभिमाणिणो महाराअदुज्जो हणस्स महिसी भविअ एवं विगलिअधीरभावा अदिमेत्तं संतप्पसि। *

चेटी। भट्टिणि सोहणं भणादि सुवअणा सिविणन्तो जणो किं ण वत्तु पलवदि। †

---

(१) नियमार्थं बालोद्यानस्थानस्थाम्।

(२) "उक्तवर्त्तिष्यमाणानां कथांशानां निदर्शकः। संक्षिप्तार्थस्तु विष्कम्भआदावङ्कस्य दर्शितः" इति दर्पणकारः। अत्र च उक्तयोः भीष्मवधाभिमन्युवधयोर्वर्त्तिष्यमाणस्यान्तःपुरविचारस्य च सूचनात् विष्कम्भकत्वमिति बोध्यम्।

---

* सखि भानुमति, कस्मादिदानीं त्वं स्वप्नदर्शनमात्रस्य कृते अभिमानिनो महाराजदुर्योधनस्य महिषी भूत्वा एवं विगलितधीरभावा अतिमात्रं सन्तप्यसे।

† भर्त्रि शोभनं भणति सुवदना स्वप्नजनो किं न खलु प्रलपति।

भानु। हञ्जे एवं णेदं मम पुणरकुसलदंसणं पडिभादि सिविणअं। *

चेटी। पिअसहि जइ एवं ता कधेहि सिविणअं अम्हे वि पडिट्ठावअन्तीओ धम्मप्पसंसाए देवदाणं संकित्तणेण [दुआदि]पडिग्गहेण अ पडिहडिस्सामो।

चेटी। सोहणं खु भणादि सुवअणा अकुसलदंसणा वि सिविणआ देवदाणं पसंसाए कुसलपरिणामा होन्ति त्ति सुणीअदि ‡॥

भानु। जइ एवं ता कधइस्सं अवहिदा दाव होहि। ††

---

* हञ्जे एवं खिदम्, मम पुनरकुशलदर्शनं प्रतिभाति स्वप्नदर्शनम्।

† प्रियसखि यद्येवं तत् कथय स्वप्नं वयमपि प्रतिष्ठापयन्त्यः धर्मप्रशंसया देवानां सङ्कीर्त्तनेन दूर्वादिपरिग्रहेण च परिग्रहिष्यामः। यथार्थस्यान्यथापरतया स्थापनं प्रतिष्ठापनम् तत् कुर्वत्यः शुभार्थतया संपादयन्त्यइत्यर्थः।

‡ शोभनं खलु भणति सुवदना, अकुशलदर्शनाः अपि स्वप्नाः देवानां प्रशंसया कुशलपरिणामा भवन्तीति श्रूयते।

** यद्येवं तत् कथयिष्ये अवहिता तावद्भव।

---

* [दुआदिपडिग्गहेण]

* द्विजातिसंप्रदानकप्रतिग्रहेणेत्यर्थः।

Digitized by Google

सखी। अवहित्थाहि कथेदु पिअसखी।*

भानु। हला भएण विम्हुमरिदाहि ता चिट्ठ जाव सव्वं सुमरिअ कहइस्सं†। इति चिन्तां नाटयति।

ततः प्रविशति दुर्योधनः कञ्चुकी च।

दुर्यो। श्लोकमिमं कस्यचित्।

(१)गुप्तप्रा साचान्महानल्पः स्वयमन्येन वा कृतः।
करोति महतीं प्रीतिमपकारोऽपकारिषु॥

येनाद्य द्रोणकर्णजयद्रथादिभिर्हतमभिमन्युमुपश्रुत्योच्छ्वसितमिव(२)नश्चेतसा।

कञ्चु। देव नेदमतिदुष्करमाचार्यैर्यस्त्रप्रभावाणाम्(३)। कर्णजयद्रथयोर्वा कात्र श्लाघा।

---

(१) अपकारिषु शत्रुषु गुप्ता गोपनेन साक्षात् प्रत्यक्षेण स्वयमात्मना अन्येन कृतोऽल्पोऽप्यपकारः प्रीतिं करोतीत्यन्वयः।

(२) प्रीत्या दीर्घनिःश्वासो हि उच्छ्वास इह तु चेतसः प्रीत्यातिशयत्वेन स्फूर्तिमात्रे उपचरितम्।

(३)आचार्यात्प्रशिक्षितशस्त्राणां प्रभावो महाराजस्येत्यर्थात् तन्महिम्नैवेदं सम्पन्नं न तन्यस्य कस्याप्यत्र श्लाघेति कञ्चुकिनोऽभिप्रायः।

---

* अवहित्ताहि कथयतु प्रियसखी।

† सखि भयेन विस्मृतास्मि तत्तिष्ठ यावत् सर्वं स्मृत्वा कथयिष्ये

Digitized by Google

राजा । विनयन्धर किमाह भवान् । एकाकी(१) बहुभिर्म्यालो खूनश्चरासनश्च निहत इति । पश्य (२)हते जरति गाङ्गेये पुरस्कृत्य शिखण्डिनम् । या श्लाघा पाण्डुपुत्राणां सैवास्माकं भविष्यति ॥

कञ्चु । सवैलक्ष्यम् । देव नैवेदं कल्पयितु(३)मर्हसि यतस्तव पौरुषप्रतीघातो(४)ऽस्माभिर्नावलोकितपूर्वस्तत एवं विज्ञापयामि ।

---

(१) कात्र श्लाघेति शब्दश्रवणमात्रेणैवान्यार्थपरकञ्चु किवाक्यस्य स्वपक्षीयबलतानर्हकर्म्मपरत्वेन निन्दापरत्वमुत्प्रेक्ष्याह एकाकीत्यादि बलतापराधस्य सर्व्वमेव वाक्यं बलतापराधसूचकं भवतीति लोकप्रसिद्धं यथा गटे कोऽस्तीत्युक्तौ दधिभोजनरूपापराधवतः 'न मया दधि भुज्यते इत्या'युक्तिस्तद्दलाटपीति भावः ।

(२) जरति हते गाङ्गेये भीष्मे शिखण्डिनं द्रुपदपुत्रं पुरस्कृत्य अग्रे निधाय हते पाण्डुपुत्रैरित्यर्थात् । शिखण्डिपुरोनिधानपूर्वकं हतस्य, छिन्नधनुषोबाणस्य च हनने तस्मे श्लाघाप्राप्ते इति भावः । अत्र लेशाख्यं नाटकाङ्गं यथोक्तं दर्पणे । स लेशो भण्यते वाक्यं यत् साक्षात्पुरःसरम्निति । शिखण्डिपुरोधानेन भीष्मवधकथा च भीष्मपर्व्वणि १२० अध्यायेऽनुसन्धेया ।

(३) द्रोणाचार्य्यनिश्चितशस्त्रप्रभावादिसङ्क्षिप्तः प्रतीघातः कार्य्यसाधनत्वव्याघातः ।

(४) कल्पयितुम् अन्यपरवाक्यस्य अन्यपरत्वमुत्प्रेक्षितुम् ।

राजा । एवमिदम् ॥

(१)सहभ्रत्यगणं सबान्धवं सहमित्रं ससुतं सहानुजम् ।
खबलेन निहन्ति संयुगे न चिरात्पाण्डुसुतः सुयोधनम् ॥

कञ्चु । कर्णौ पिधाय सभयम् । शान्तं पापं प्रति कृतमङ्गलम् ।

राजा । विनयन्धर किं मयोक्तम् ।

कञ्चु । सहभ्रत्यगणमित्यादि(२)पठित्वा एतद्विपरीतमभिहितं दैवेन ।

राजा । विनयन्धर अद्य खलु भानुमती यथापूर्वं मामनामन्त्र्य वासभवनात् प्रातरेव निष्क्रान्तेति

---

(१) पौरुषप्रतीघाताभावेन कञ्चुकिना प्रशंसिते तच्छ्रवणात् दर्पोत्कर्षे अन्यथा वक्तव्ये अन्यथोक्तमिति दर्शयन्नाह सहभ्रत्यगणमिति विभाषया सहशब्दस्य सादेशविधानादुभयथा प्रयुक्तम् । न चिरादल्पकालेन । अत्र पाण्डुसुतं सुयोधनइति वक्तव्ये पाण्डुसुतः सुयोधनमिति कर्मकर्तृव्यत्ययेन प्रयुक्तम् । अतएवात्र भंग्याख्यं नाटकाङ्गं यदुक्तं दर्पणे "इत्यादीनां भवेद् भंगो वाक्यादन्यपरं वचः" इति ।

(२) राज्ञस्तात्पर्यविषयार्थानुगुणां विभक्तिं विपरिणमय्य तत्र श्लोके पाण्डुसुतं सुयोधनइत्येव पठित्वा एतद्विपरीतं द्वितीयान्तं पाण्डुसुतं प्रथमान्ततया, पदं प्रथमान्तं च सुयोधनपदं द्वितीयान्ततया, कर्मकर्तृत्ववैपरीत्येन पठितमित्यर्थः ।

Digitized by Google

आक्षिप्तमिव मे चेतस्तदादेशय तमुद्देशं यत्रस्था भानुमती ।

कञ्चु० इत इत एतु देवः ।

उभौ । परिक्रामतः ।

कञ्चु० पुरोऽवलोक्य समन्ततो गन्धमाघ्राय । देव पश्य पश्य एतत्तुहिन (१)कणशिशिरसमीरणोद्वेल्लितवन्धनच्युतशेफालिकाविरचितकुसुमप्रकरमीषदालोहितमुग्धबधूकपोलपाटललोध्रप्रसूनविजितश्यामलतासौभाग्यसुन्दीलितबकुलकुन्दकुसुमसुरभिशीतलं प्रभातकालरमणीयमग्रतस्ते बालोद्यानं तदवलोकयतु देवः । तथाहि,

(२)प्रालेयमिश्रमकरन्दकरालकोशैः
पुष्पैः समं निपतिता रजनीप्रबुद्धैः ।

---

(१) तुहिनकणैर्हिमजलवैः शिशिरः शीतलः उद्वेल्लिता चालिता अतएव बन्धनच्युता छिन्नगलिता । कपोलमिव पाटलं श्वेतरक्तं यत् लोध्रप्रसूनं तन्नामकपुष्पं तेन विजितं सदृशीकृतं श्यामलतायास्तन्नामकलतायाः सौभाग्यं सौन्दर्यं यत्र तस्मिन् सुभगः सुन्दरे प्रिये इति कोषः । भावे ष्यञि सुभगादित्वात् द्विपदबहुव्रौ सौभाग्यम् ।

(२) प्रालेयेण मिश्रो मिलितो यो मकरन्दः पुष्परसस्तेन करालः दन्तुरः नतोन्नतः कोशो मध्यं येषां तादृशैः, रात्रि-

Digitized by Google

अर्कांशुभिन्नमुकुलोदरसान्द्रगन्ध
संमूर्च्छितानि कमलान्यलयः पतन्ति ॥

राजा । समन्तादवलोक्य विनयधर । दृष्टमपरमस्मिन्नुषसि रमणीयतरम् । पश्य.

(१)जृम्भारम्भप्रविततदलोपान्तजालप्रविष्टै-
र्हंसैर्भानोर्हतयदृव स्पृश्यमाना विबुद्धाः ।
स्त्रीभिः सार्द्धं घनपरिमलस्यन्दलक्ष्याङ्गरागा
मुञ्चन्त्येते विकचनलिनीगर्भगृह्यां द्विरेफाः ॥

विकसितैः कुसुमैः समं निपतिताः भूमौ पतिताः आश्रयपतने आश्रितपतनमुचितमेवेति भावः । अलयः विकासोन्मुखानि कमलानि पतन्ति गच्छन्ति पतेर्गमनार्थत्वात् सकर्मकत्वम् स्यन्दनमात्रे एवाकर्मकत्वम् । सर्वो हि विनाशोन्मुखं हित्वा समुदयोन्मुखमाश्रयतीति लोकप्रसिद्धमिदमिति भावः ।

(१) जृम्भारम्भो विकाशोपक्रमस्तेन विततानि विस्तारोन्मुखानि यानि दलानि पुष्पपत्राणि तेषामुपान्तः समीपं जालं गवाक्षस्य छिद्रमिव तेन प्रविष्टैः भानोः सूर्यस्य हस्तैः करैरिव किरणैः स्पृश्यमाना अतएवान्यकरस्पर्शेन विबुद्धाः निद्रान्तं गता इवपतयदृव द्विरेफाः भ्रमराः घनपरिमलश्चन्दनगन्धः सान्द्रसौरभश्च तस्य स्त्रीभेन वेशेन लक्ष्योऽनुमेयोऽङ्गरागो येषां तादृशाः सन्तः

कञ्चु। देव, नन्वेषा भानुमती सुवदनया तरलिकया च पर्य्युपास्यमाना तिष्ठति तदुपसर्पतु देवः।

राजा। हहा। आर्य्य विनयन्धर गच्छ त्वं सांग्रामिकं रथमुपकल्पयितुम् अहमपि देवीं दृष्ट्वानुपदमागत एव।

कञ्चु। एष कृतो देवादेशः। इति निष्क्रान्तः।

सखी। पिअसहि अवि सुमरिदं तुए।*

भानु। सहि सुमरिदं अज्ज किल पमदवणे आसीणाए मम अग्गदो केणावि अदिसदूदिव्वरूवेण णवलेण अहिसदं वावादिदं। †

विकचाया विकसिताया नलिन्याग्रभ एव तां स्त्रीभिः स्वनायिकाभिः सह सुप्तन्ति। स्तोकशब्दस्य "करणे च स्तोकाल्पेत्यादि (२, ३, ३०, प्रा० हू०) सप्तम्यन्तस्येति निर्देशात् कचिदुक्त मप्रत्वमपि सूचितम् तेनात्यल्पतापरत्वेन षष्ठीसमासः सूपपादः।

---

* प्रियसखि अपि स्मृतं त्वया।

† सखि स्मृतम्, अद्य किल प्रमदवने आसीनाया मम अग्रतः केनाप्यतिप्रथयितदिव्यरूपेण नवकुलेन अहिशतं व्यापादितम्।

Digitized by Google

उभे। अपवार्य(१)आत्मगतम्। साम्नं पापं साम्नं पापं। प्रकाशम्।(५)तदो तदो।*

भानु। सन्दावावणहीदहिअआए पुणो वि मए विसुमरिदं। †

राजा। अवलोक्य। अहो देवी भानुमती सुवदनातरलिकाभ्यां सह किमपि मन्त्रयमाणा तिष्ठति भवतु अनेन लताजालेनान्तरितः शृणोमि तावदासां विश्रब्धालापम्। इति तथा कृत्वा स्थितः।

सखी। अइ अलं संदावेण कहेदु पिअसही। ‡

राजा। किं नु खल्वस्याः सन्तापकारणम् अथवाऽनामन्त्र्य मामियमद्य वासभवनाभिमुक्रान्तेति सशङ्कितः

---

(१) अपवार्य अन्यस्य रहस्यप्रकाश "तद्भेदपवारितं रहस्यन्तु यदन्यस्य पराङ्मुख्य प्रकाश्यते इति वचनात् दर्पणकृता पराङ्मुख्यान्यस्य रहस्यकथनमपवारितमिति व्याख्यातम्।

(५) "सर्वश्राव्यं प्रकाशं स्यादिति" दर्पणोक्तेः सर्वान्यश्रावित्वेत्यर्थः।

---

* श्राम्नं पापम्, श्राम्नं पापम्। ततस्ततः

† सन्तापावस्थहीतहृदयया पुनरपि मया विस्मृतम्।

‡ सखि अलं सन्तापेन कथयतु प्रियसखी।

एवास्या मयि कोपः । अयि भानुमति ? अविषयः खलु दुर्योधनो भवत्याः कोपस्य ।

(१)किं कण्ठे श्लथितोज्झितोभुजलतापाशः प्रमादान्मया
निद्राच्छेदविवर्त्तनेष्वभिमुखी नाघ्रासि सम्भाविता ।
अन्यस्त्रीजनसंकथालघुरहं स्वप्ने त्वया लक्षितो
दोषं पश्यसि किं प्रिये परिजनोपालम्भयोग्ये मयि ॥

विचिन्त्य । अथवा

(२)दयमस्मदुपाश्रयैकचित्ता मनसा प्रेमनिबद्धमत्सरेण।

---

(१) कण्ठे ममकण्ठे भुजलतापाशस्त्वदीय भुजबन्धनं निद्राया आच्छेदरूपद्वङ्क्षेन यत् विवर्त्तनं पार्श्वपरिवर्त्तनम् (एकपार्श्वेन सुप्तस्यान्यपार्श्वे स्वापार्थं यत्नभेदः) तेनाभिमुखी आभिमुख्यं गताऽपि पूर्वदिवसीयार्द्धरात्रादर्वाक्तनदिवसीयार्द्ध-दिवसोऽद्यतनशब्दार्थस्तेन पूर्वदिवसीयशेषरात्रेरपि अद्यतनत्वात् अद्येत्युक्तिः । न संभाविता आलिङ्गनसंभाषणादिना न संमानिता । लघुः क्षुद्रचित्तः । स्वप्ने इत्यनेन जागरणे तथादर्शनं कदापि न संभवत्यनेन दाक्षिण्यमात्मनः सूचितम् । परिजन इव परिचारकइव उपालम्भयोग्ये निन्दासहितभर्त्सनार्हे कं दोषं पश्यसि न कमपीत्यर्थः नितान्तानुकूलतया दोषस्यार्थि-त्वमसम्भावितं काकुर्थनजा व्युदस्यते । अत्र दोषराहित्यद्योतनाय दोषलेशमिति वक्तव्यम् ।

(२) अहमाश्रयः समवलम्बनं यस्य तादृशमेव चित्तं यस्याः सा इत्यनेकशब्दस्य एवार्थपरतायाः प्रसिद्धेः मदाश्रयमात्रचित्ते-

नियतं कुपितातिवल्लभत्वात्स्वयमुत्प्रेक्ष्य ममापराधलेशम्
तथापि किं वक्ष्यतीति शृणुवस्तावत्।

भानु। अहं तदो तस्स अदिसइददिव्वरूविणो णउलस्स दंसणेण उम्सुआ जादा। *

राजा। किं नाम अतिशयितदिव्यरूपिणो नकुलस्य दर्शनेनोत्सुका जाता तत्किमनया माद्रीसुतेऽनुरक्तया वयमेवं विप्रलब्धाः।(१)सोत्प्रेक्षम्।इयम(२)स्मदित्यादि

त्यर्थः। अस्मदित्यत्र युष्मदस्मदोरेकत्वे विभाषया बहुत्वानुशासनात् बहुत्वपरतया न मदादेशः। प्रेम्णैव कारणाभावेऽपि निबद्धः जनितो मत्सरो यत्र तादृशेन प्रेम्णश्चैष स्वभावः यत्कारणेऽपि मात्सर्यमुत्पाद्यते इति। एवंविधेन हृदा उत्प्रेक्ष्य कल्पनामात्रेणोड्डाय्य अतिबल्लभत्वात् अतिप्रियत्वात् अपराधलेशोऽपि दुःसहः किं पुनर्बहुलापराधइति सूचयन् लेशमित्याह। नियतमित्युत्प्रेक्षायाम् इयम् उक्तेन हेतुना प्रणयकुपितेत्युत्प्रेक्ष्य इत्यर्थः।

(१) विप्रलब्धाः प्रतारिता भ्रान्ताइति वा अस्मिन् पक्षे अनयेति हेतौ तृतीया। अन्यथास्वभावाया अन्यथाज्ञानमिह विप्रलम्भः।

(२) सोत्प्रेक्षं सस्मरणम् पूर्वोत्प्रेक्षितविषयस्मरणपूर्वकमिति यावत् तथा च स्मरसि किं किं न वक्ष्यसीति नोक्तवानसीत्यर्थः स्मरणार्थयोगे अतीतकाले लृट्।

---

१ अहं ततस्तस्य अतिशयितदिव्यरूपिणो नकुलस्य दर्शनेनोत्सुका जाता।

Digitized by Google

पठित्वा । मूढ दुर्योधन कुलटाविप्रलभ्यमानमात्मानं बहुमन्यमानोऽधुना किं किं न वक्ष्यसि [ ] अहो एतदर्थं१)मेवास्याः प्रातरेव विविक्तस्थानाभिलाषः सखीजनकथासु च पक्षपातः । दुर्योधनस्तु मोहाद् विज्ञात(२)बन्धकीहृदयसारः क्वापि परिभ्रान्तः आः पापे अस्मत्परिग्रहपांसुले ! (३) ।

(४) तन्नीरुत्वं तव मम पुरः साहसानीदृशानि
श्लाघा साऽस्माद्वपुषि विनयव्युत्क्रमेऽप्येष रागः ।

---

(१) अङ्कितकुलटाभावानुगुणमस्याश्चेष्टादिमुल्लेख्य व्यभिचारपरत्वमुपन्यस्यति एतदर्थमेवेति ।

(२) अज्ञातः अनिश्चितः बन्धकीहृदयस्य कुलटाचित्तस्य सारः स्थैर्यं येन । अन्यथास्थिरीकृतचित्तायां अन्यथोल्लेखनमिह परिभ्रमः ।

(३) मत्परिग्रहः (मत्कलत्रम्) भूत्वा पांसुलं दुश्चरितासीत्यतीवानुचितमिति संबोधनेन द्योतयन्नाह मत्परिग्रहेति ।

(४) तत् अनुभूतं मत्समीपे भीरुत्वं तत्कूचकचेष्टादिकं प्रकाशितं तेन च तस्या भीरुत्वमनुमित्यानुभूतमित्यर्थः । ईदृशानि परपुरुषसङ्गमरूपाणि साहसानि सहसा बलेन कृतानि तेनाभीरुत्वं प्रकाशितम् एवं च भीरुत्वाभीरुत्वयोः समावेशदर्शनादाश्व-

---

[किं कण्ठेत्यादि पठित्वा दिशोऽवलोक्य] क्वचिदधिकः पाठः ।

Digitized by Google

तच्चौदार्य्यं मयि जड़मतौ चापले कोऽपि पन्थाः
ख्याते तस्मिन् वितमसि कुले जन्म कौलीनमेतत्॥

सखी। तदो तदो।*

भानु। तदो अहं तुरिदं आसणट्ठाणं एदं लदालण्डवं पविट्ठो सो वि मं अणुसरन्तो एव्व लदा मण्डवं पविट्ठो। †

र्थान्वितोऽहमिति भावः। एवमुत्तरत्र विरुद्धधर्म्मसमावेशोऽप्यूह्यः। अस्मद्वपुषि मद्देहे एव सौन्दर्य्यगुणकीर्त्तनरूपा सा श्लाघा, एष च सखीसमक्षं प्रकाश्यमानः। विनयव्युत्क्रमे विनयस्य सुचरितस्य पातिव्रत्यस्य व्युत्क्रमे अतिक्रमणे रागः अनुरागः, रागो हि गुणमूलकएव तथाच गुणाधिक्यदर्शनात् परपुरुषे रागइति मम गुणश्लाघाविरुद्धमिति भावः। जड़मतौ यथार्थभावबोधाक्षमे मयि विषये समीपे वा तत् औदार्य्यं सरलस्वभावः कापट्यरहितचेष्टितमिति यावत् प्रकाशितमित्यर्थः। चापले कापट्ये मां वञ्चयित्वा परपुरुषानुसरणे, कोऽपि पन्थाः उपायः, तथा च कापट्याकापट्ययोर्विरुद्धता। वितमसि दोषरहिते तथात्वेन ख्याते कुले वंशे जन्म एतदेतादृशं कौलीनमपवादस्तद्धेतुभूतासच्चेष्टादिकमुपचारात। तथा च शुद्धवंशजन्मनोविसदृशमेतदिति भावः। कौलीनं पशुभिर्युद्धे कुलीनत्वापवादयोरिति कोषः।

---

* ततस्ततः।

† ततोऽहं त्वरितमासनस्थानमेतल्लतामण्डपं प्रविष्टा, ततः सोपि मामनुसरन्नेव लतामण्डपं प्रविष्टः। आसनस्थानं वास स्थानम्।

Digitized by Google

राजा । अहो कुलटोचितमस्याः पापायाः अशालीनत्वम् ।(१)

(२)यस्मिंश्चिरप्रणयनिर्भरबद्धभाव
मावेदितो रहसि मत्सुरतोपभोगः ।
तत्रैव दुश्चरितमद्य निवेदयन्ती
क्षीणासि पापहृदये न सखीजनेऽस्मिन् ॥

उभे । तदो तदो । *

[मातु तदो तेण सम्मगब्भं [ ]पसारिअकरेण अप हरिअं मे त्थणंसुअं । †

राजा । सक्रोधम् । अलमिदानीमतःपरमाकर्णनेन

---

(१) शालामर्हतीति शालीना लज्जावती अशालीनत्वं निर्लज्जता दुःशीलत्वमिति पाठे दुश्चरितमित्यर्थः ।

(२) यस्मिन् सखीजने चिरं प्रणयेन स्नेहेन निर्भरं सातिशयं यथा तथा बद्धः विश्लेषराहित्यार्थं कृतबन्धनोभावोऽनुरागो यस्मिन् तद्यथा तथा आवेदितः कथितः । तत्रैव सखीजने दुश्चरितं पापाचरणं व्यभिचाररूपं कथयितुं न क्षीणासीत्यन्वयः पापं पापान्वितं हृदयं यस्याः तत् संबुद्धौ ।

---

* ततस्ततः ।

† ततस्तेन सम्प्रगल्भं प्रसारितकरेण अपहृतं मे स्तनांशुकम् ।

* सम्मगब्भं इत्यत्र सगर्भं इति पाठे सगर्भम् ।

Digitized by Google

भवतु तावत्तस्य परवनितास्कन्दनप्रगल्भस्य(१)भाद्री सुतहृतकस्य जीवितमपहरामि । किञ्चिदुत्था विचिन्त्य । अथवा दृश्यमेव तावत्पापशीला प्रथममनुशासनीया इति निवर्त्तते ।

उभे । तदो तदो ।*

भानु । तदो अहं अज्जउत्तस्स पभादमङ्गलतूर रवमिस्सेण वारविलासिणीसंगीदसद्देण पडिबोधिदम्हि । †

राजा । सवितर्कम् । किं नाम खलु प्रतिबोधिताऽस्मीति किन्नु खलु स्वप्नदर्शनमनया वर्णितम् । विचिन्त्य । भवतु सखीवचनाद्युक्तिर्भविष्यति ।

उभे । सविषादमन्योन्यं पश्यतः ।

सुवदना । जं किं वि अम्हाहिदं तं भाइरहीप्पमु

---

(१) परवनितायाः परस्त्रियाः अवस्कन्दनेन अपहरणेन प्रगल्भस्य धृष्टस्य ।

† ह्ला ततोऽहमार्यपुत्रस्य प्रभातमङ्गलतूर्यरवमिश्रेण वारविलासिनीसंगीतशब्देन प्रतिबोधिताऽस्मि । "आर्यपुत्रेति वक्तव्यः पतिः पत्नीजनेन" इति भरतोक्तेः आर्यपुत्रस्य स्वामिनइत्यर्थः ।

‡ यत्किमप्यत्राहितं तद्भागीरथीप्रमुखाणां नदीनां सलिलेनाप-

Digitized by Google

हाणं णट्ठणं सलिलेण अवहारीअदु भअवदाणं बम्हणाणं वि आसीसाए आऊदिऊदेण पज्जलिदेण भअवदा ऊदासणेण अन्तरीअदु । ‡

राजा । अलं विकल्पेन स्वप्नदर्शनमेवैतदनया वर्णितम् मया पुनर्मन्दधियाऽन्यथैव सम्भावितम् । (१)दिष्ट्याऽर्द्धश्रुतविप्रलम्भजनितक्रोधादहं नो गतो दिष्ट्या नो परुषं रुषार्द्रकथने किञ्चिन्मया व्याहृतम्। मां प्रत्याययितुं विमूढहृदयं दिष्ट्या कथान्तं गता मिथ्यादूषितयाऽनया विरहितं दिष्ट्या न जातं जगत्॥

भानु । हला कहेहि किं एत्थ सुहसूअअं । †

---

(२५) अर्द्धं यथा तथा श्रुतः विप्रलम्भः विसंवादस्तत्सूचकवाक्यमित्यर्थः तज्जनितक्रोधात् तज्जन्यकोपात्, प्रत्याययितुं विश्वस्तं कर्त्तुम् कथायाः अभीष्टार्थकवाक्यस्य अन्तं समाप्तिं गता वाक्यं समापयामासेत्यर्थः । मिथ्यादूषितया व्यभिचारित्वभ्रमेण सम्भावितदूषणया । विरहितमित्यनेन मया व्यापादितयेत्यर्थात् गम्यते । दिष्ट्येति हर्षसूचनार्थं भाग्यहेतुकत्वोत्कीर्त्तनम् ।

हियतां भगवतां ब्राह्मणानामपि आशिषा आकुतिऊतेन प्रज्वलितेन भगवता ऊतवहेन च अन्तर्ध्यताम् । अत्याहितमशुभम् ।

† हला कथय किमत्र शुभसूचकम् ।

उभे । अन्योन्यमवलोक्य अपवार्य । एत्थ णत्थि त्तोअं वि सुहदूअअं जदू एत्थ अलीअं कहइस्सं ता अवराहिणी(१)भविस्सं । सो एव्व सिणिद्धो जणो जो पुच्छिदो परुसं वि हिदं भणादि । प्रकाशम् । सहि सव्वं एव्व एत्थ असुहणिवेदअं ता देवदाणं पणामेण दुव्वादिपडिग्गहेण अ अन्तरीअदु णउ दंट्ठिणो णउलस्स अण्णस्स वा दंसणं अहिसदवधं वि सिविणए पसंसन्ति विअक्खणा । *

(१) "अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभ" इत्युक्तेः सुहृदा हितं परुषमपि वाच्यमिति नियमे स्थिते नियमाति क्रमरूपदोषरूपापराधवती स्यामिति तात्पर्यार्थः ।

*अत्र नास्ति श्लोकमपि शुभसूचकम् । यद्यलीकं कथयिष्यामि तदापराधिनी भविष्यामि सएव स्निग्धो जनः यः पृष्टः परुषमपि हितं भणति । सखि सर्व्वमेवाशुभनिवेदकं तद्देवतानां प्रणामेन दूर्व्वादिपरिग्रहेण चान्तर्यताम् न तु दंष्ट्रिणो नकुलस्यान्यस्य वा दर्शनमहिंशतवधमपि स्वप्ने प्रशंसन्ति विचक्षणाः । अन्तरशब्दात् णिचि कर्म्मणि रूपम् अन्तरं व्यवहितं क्रियताम् अन्तर्यताम् अन्तरितं क्रियतामित्यर्थः । दूर्व्वाद्यौषधिपरिग्रहस्याप्यमङ्गलनाशकत्वं स्मृत्युक्तं बोध्यम् द्विजादिपडिग्गहेणेति पाठे द्विजातिसम्प्रदानकप्रतिग्रहेणेत्यर्थः इह आशीर्लङ्कारः "आशीरिष्टार्थशंसन" मिति भरतवाक्यात् ।

Digitized by Google

राजा । अविलम्बमाह सुवदना नकुलेन पन्नग-
व्रतवधः स्तनांशुकाहरणञ्च नियतमरिष्टोदर्कं(१)म
स्माकं तर्कयामि ।

(२) पर्य्यायेण हि दृश्यन्ते स्वप्नाः कामं शुभाशुभाः ।
शतसंख्या पुनरियं सानुजं स्पृशतीव माम् ॥

वामाक्षिस्पन्दनं(२)सूचयित्वा । आः कथं ममापि नाम
दुर्य्योधनस्यानिमित्तानि(३)हृदयक्षोभमावेदयन्ति ।
सावष्टम्भम् । अथवा भीरुजनहृदयकम्पनेषु का गणना
दुर्य्योधनस्यैवंविधेषु] । गीतञ्चायमर्थोऽङ्गिरसा ।

---

(१) अरिष्ट मुदर्कं उत्तरकाले यस्य तत् अरिष्टफलकमित्यर्थः ।

(२)"अकामानुमतौ काम"मिति कोषात् शुभा वा अशुभा वा स्वप्नाः दृश्यन्ते इत्यकामेनाप्यनुमन्तव्यमित्यर्थः । अथ वा कामं यथेष्टमित्यर्थः । पर्य्यायेण क्रमेण कदाचित् शुभाः कदाचिच्च अशुभा इत्यनेन क्रमेणेत्यर्थः । प्रायेणैवेति पाठः दर्पणधृतः । इयं हन्यमानाहीनां शतसंख्या तत्सदृशसंख्या अहीनामिव अस्माकमपि शतसंख्यावत्त्वादित्यर्थः । स्पृशति विषवीकरोति । अत्र तर्काख्यं नाटकाङ्गम् यथोक्तं दर्पणे"तुल्यतर्को यदर्थेन तर्कः प्रकृतगामिने"ति।

(२ए) वामाक्षिस्पन्दनं हि पुंसां क्षतिकरं निमित्तं प्रसिद्धम् ।

१ अनिमित्तानि उत्पातादिरिष्टसूचकनिमित्तानि ।

[कश्मलेषु इत्यधिकपाठः ।]

(१)ग्रहाणां चरितं स्वप्नोऽनिमित्तोत्पादकं तथा ।
फलन्ति काकतालीयं तेभ्यः प्राज्ञा न बिभ्यति ॥

तङ्गानुमत्याः स्त्रीस्वभावसुलभामलोकाशङ्काभपनयामि।

भानु । हला सुवअणे पेक्ख उदअगिरिसिहरन्तरविमुक्करहवरविअलिअसंझारागप्पसरुदरालोअमण्डलो जादो भअवं दिवहणाहो ।*

---

(२) ग्रहाणां रव्यादीनां चरितं गतिभेदः राज्यान्तरसञ्चारादिः रिष्टसूचकदग्गापाकादिकालसूचकगतिभेदश्च स्वप्नो दुर्निमित्त दर्शनेनाशुभसूचकः अनिमित्तस्य दुष्टनिमित्तस्य उत्पादकं सूचकं भूमिकम्पोल्कापातादि एतानि काकतालीयं काकगमनकालिक तालपतनमिव अतर्कितोपनतमित्यर्थः । फलन्ति फलसाधनाय कल्पन्ते तेभ्यः प्राज्ञाः कृतधियो न बिभ्यतीत्यन्वयः ।

---

* हला सुवदने उदयगिरिशिखरान्तरविमुक्तरथवरविद्-लितसन्ध्यारागप्रसङ्गतरालोकमण्डलो जातो भगवान् दिवस नाथः ।

Digitized by Google

सखी । भट्टिणि रोसाण्विअकण्णकन्ति[सस्सिरीएण] लदाजालन्तरोवहिदकिरणजालेण [पिणद्धीकिदो] ज्जाणभूमिभाओ [ ] दुप्पेक्खणिज्जो भअवं सहस्स रस्सि संवुत्तो ता समओ दे लोहिदचन्दणकुसुमग-ब्भेण अग्घेण पज्जुवट्ठादुं। *

भानु । हञ्जे तरलिए उवणेहि मे अग्घभाअणं जाव भअवदो सहस्सकिरणस्स सपरिअं णिव्वट्टेमि।†

चेटी । जं देवी आणवेदि . इति निष्क्रम्य पुनः प्रविश्य । भट्टिणि एदं अग्घभाअणं णिव्वट्टेदु भअवदो सहस्सरस्सिणो सपरिअं ।‡

---

* भट्टिनि, रोषान्वितकर्णकान्तिसश्रीकेण लताजालान्तरोप हितकिरणजालेन पिणद्धीकृतोद्यानभूमिभागो दुष्प्रेक्षणीयो भगवान् सहस्ररश्मिः संवृत्तः, तत् समयस्ते लोहितच-न्दनकुसुमगर्भेणार्घेण पर्युपस्थातुम् ।

† हञ्जे तरलिके उपनय मे अर्घभाजनं, यावद्भगवतः सहस्रकिरणस्य सपर्यां निर्वर्तयामि ।

‡ यद्देवी आज्ञापयति । भट्टिनि इदमर्घभाजनं, निर्व-र्त्तय भगवतः सहस्ररश्मेः सपर्याम् ।

[सपरिअेण] सदरेण । इत्यर्थः

[पिणद्धरिदो इति क्वचित् पाठः ।] पिणद्धरितो ।

[पूरिदपदिण्णो रिउबिम्ब इत्यधिक क्वचित् पाठः ।] पूरितप्रतिज्ञोरिपुरिव

Digitized by Google

राजा । अयमेव साधुतरोऽवसरः प्रियारमीपमुपगन्तुम् : इत्युपसर्पति ।

सखी । विलोक्यात्मगतम् । कहं महाराओ आअदो हन्त जादो से णिअमभङ्गो । *

भानु । दिनकराभिमुखीभूय । भअवं अम्बरमहासुरेक्कसहस्सपत्त पुव्वदिसावहूमुहमण्डणकुङ्कुमविसेसअ, सअलभुवणेक्करअणप्पदीव जं एत्थ सिविणअदंसणे किं वि अच्चाहिदं तं भअवदो पणामेण सभादुअस्स अज्जउत्तस्स कुसलपरिणामी होदु† । अर्घं दत्त्वा । हञ्जे तरलिए उवणेहि मे कुसुमाइं अवराणं वि देवदाणं सपरिअं णिव्वट्टइदुं । ‡

अधीरेण राज्ञा नियमस्यापि संगमादिना दूषयिष्यत इति भावः।

---

* कथं महाराज आगतः हन्त जातोऽस्या नियमभङ्गः ।

† भगवन् अम्बरमहासुरैकसहस्रपत्र, पूर्वदिग्वधूमुखमण्डनकुङ्कुमविशेषक, सकलभुवनैकरत्नप्रदीप, यदत्र स्वप्नदर्शने किमप्यत्याहितं, तद्भगवतः प्रणामेन सभ्रातृकस्यार्यपुत्रस्य कुशलपरिणामि भवतु । विशेषकस्तिलकम् अत्याहितमरिष्टम् ।

‡ हञ्जे तरलिके ! उपनय मे कुसुमानि अपरासामपि देवतानां सपर्यां निर्वर्त्तयितुम् ।

Digitized by Google

इति हस्तौ प्रसारयति ।

राजा । संज्ञया परिजनमुत्सार्य पुष्पाणि स्वयमुपनयति, स्पर्शसुखमभिनीय कुसुमानि भूमौ पातयति च ।

भानु । सरोषम् । अहो प्रमादो परिअणस्स ।*

परिक्रम्य, राजानमवलोक्य, ससाध्वसं लज्जां नाटयति ।

राजा । देवि अनिपुणः परिजनोऽयमेवंविधसेवावकाशे तत्प्रभवत्यनुशासने देवी । अयि प्रिये

(१)विकिर धवलदीर्घपाङ्गसंसर्पि चक्षुः
परिजनपथवर्त्तिन्यत्र किं संभ्रमेण ।
स्मितमधुरमुदारं देवि मामालपोच्चैः
प्रभवति मम पाणिरञ्जलिः सेवितुं त्वाम् ॥

भानु । अब्भणुजाणादु मं महाराओ अत्थि मे कस्सिं वि णिअमे अहिलासो । †

(१)नियमस्थतया कज्जलशून्यत्वेन धवलापाङ्गत्वं चक्षुषः । स्मितमधुरं यथा स्यात्तथा उदारं औदार्यान्वितं माम् आलप । अयं मम पाणिरञ्जलिः अञ्जल्याकारौ पाणी त्वां सेवितुं प्रभवति अपराधिनोऽञ्जलिबन्धनमेवोचितमिति तथा करोमीतिभावः।

* अहो प्रमादः परिजनस्य ।

† अभ्यनुजानातु मां महाराजः, अस्ति मे कस्मिन्नपि नियमेऽभिलाषः ।

Digitized by Google

राजा। अुतविस्तारएवास्मि भवत्याः स्वप्नदत्तान्तं प्रति तदलं प्रकृतिसुकुमारमात्मानं खेदयितुम् ।

भानु। अज्जउत्त अदिमेत्तं मे सङ्का बाधेदु ता अणुमण्णदु मं अज्जउत्तो । *

राजा। सगर्वम् । देवि अलमनया शङ्कया। पश्य (१) किञ्चो व्याप्तदिशां प्रकम्पितभुवामक्षौहिणीनां फलं किं द्रोणेन किमङ्गराजविशिखैरेवं यदि क्लाम्यसि । भीरु भ्रातृशतस्य मे भुजवनच्छायासुखोपाश्रिता त्वं दुर्य्योधनकेशरीन्द्रगृहिणी शङ्कास्पदं किन्तव ॥

भानु। अज्जउत्त णहि किं वि मे सङ्काकारणं तुह्मेसु सण्णिहिदेसु किसु अज्जउत्तस्स एव्व मणोरहसम्पत्तिं अहिणन्दामि । †

---

(१) भुजा एव वनं तस्य छायायां सुखेनोपाश्रिता भुजानां वनत्वारोपेणास्त्रं विनापि तेषां शत्रुविजयादिना सौख्यकारित्वमिति सूचितम् ।

---

* आर्यपुत्र ! अतिमात्रं मां शङ्का बाधते, तदनुमन्यतां माम् आर्यपुत्रः ।

† आर्यपुत्र, न किमपि मे शङ्काकारणं युष्मासु सन्निहितेषु किन्तु आर्यपुत्रस्यैव मनोरथसम्पत्तिमभिनन्दामि ।

Digitized by Google

राजा। अयि सुन्दरि एतावन्तएव मनोरथाः यदहं वनितया सङ्गतः स्वेच्छया विहरामीति। पश्य

(१) प्रेमाबन्धस्त्रिमितनयनापीयमानाब्जशोभं
लज्जायोगादविशदकथं मन्दमन्दस्मितं वा।
वक्त्रेन्दुं ते नियमसुषितालक्तकाङ्काधरं वा
प्रातुं वाञ्छा परमसुलभं किन्नु दुर्योधनस्य॥

नेपथ्ये। महान् कलकलः। सर्वे आकर्णयन्ति।

भानु। राजानं परिष्वज्य। परित्ताअदु परित्ताअदु अज्जउत्तो। *

राजा। समन्तादवलोक्य। प्रिये अलं संभ्रमेण। पश्य

---

(१) प्रेमाबन्धेन रत्नावेष्टेन स्त्रिमितम् दीर्घन्मीलितं यन्नयनं तेन आपीयमाना विजिता अब्जशोभा येन। नियमेन व्रतभेदेन सुषितः अपहृतः अलक्तकाङ्कः यावकविन्दुः यस्य तादृशोऽधरोयस्य तथाविधं वक्त्रेन्दुं वक्त्रमिन्दुमिव मुखचन्द्रम् असुलभं व्रतस्थतया दुष्प्रापं पातुं वाञ्छा नु भो किम् अपरंतद्विघ्नं किमपि मम न वाञ्छनीयमित्यर्थः।

---

* परित्रायतां परित्रायतामार्यपुत्रः।

Digitized by Google

१ दिक्षु व्यूढाङ्घ्रिपाङ्क्तिक्षणजटिलचलत्पांशुदण्डोऽन्तरीक्षे
झङ्कारी शर्करालः पथिषु विटपिनां स्कन्धकाषैः सधूमः।
प्रासादानां निकुञ्जेष्वभिनवजलदोद्गारगम्भीरधीर-
श्चण्डारम्भः समीरो वहति परिदिशं भीरु किं संभ्रमेण॥

सखी। महाराज्ञो पविसदु एदं दारुपव्वअपासादं उच्चेअकारी क्खु अअं उत्तिदो परुसरअकलुसीकिदणअणो विदलिदतरुवरसद्दवित्तत्थमन्दुरापरिअट्टवल्लहतुलङ्गमो पज्जाउलीकिदजणपवत्तिदो भीसणो समीरणासारो। *

---

(१) दिक्षु व्यूढानि विक्षिप्तानि अङ्घ्रिपानां वृक्षाणामङ्घ्रीणि शाखाटीनि येन स अन्तरिक्षे वृक्षेण जटिलः जटाकारतामाप्तत्वेन व्याप्तः चलन् ऊर्द्धं गच्छन् पांशुदण्डः पांशुदण्डइव दण्डाकार पांशुसमूहो यस्मात्। तादृशः, शर्करालः शर्करा खापरेति प्रसिद्धा। तद्वान् विटपिनां स्कन्धकाषैः स्कन्धस्य कर्षणैस्तत्संपर्कात् सधूमः धूमसहितइव। अभिनवोजलदोमेघस्तस्य उद्गारो ध्वनिरिव गम्भीरो धीर इव। चण्डः प्रचण्ड आरम्भो वेगोयस्य एतादृशो वायुःपरिदिशं प्रतिदिशं वक्ष्यतीति वातोत्पातस्य सार्व्वत्रिकत्वात् संभ्रमो न कर्त्तव्यइत्यर्थः।

---

* महाराज! प्रविशत्वेनं दारुपर्व्वतप्रासादम् उच्चैःकारी खल्वयं परुषरजःकलुषीकृतनयनो विदलिततरुवरशब्दवित्रस्तमन्दुरापरिभ्रष्टवल्गुहतुरङ्गमः पर्य्याकुलीकृतजनपद्धतिः भीषणः समीरणासारः। दारुपर्व्वत आक्रीड़पर्व्वतः समीर आसारो वृष्टिवेगइव वातसमूह इत्यर्थः।

Digitized by Google

राजा। उपकारि खल्विदं बालाचक्रं सुयोधनस्य, यस्य प्रसादादयमपरित्यक्तनियमया देव्या सम्पादितोऽस्मन्मनोरथः। कथमिति

(१) न्यस्ता न भ्रुकुटिर्न वाष्पसलिलैराच्छादिते लोचने
नीतं नाननमन्यतः सपदि नाहं स्पृष्टस्त्वया वारितः।
तन्वङ्ग्या लगनस्तनोदरं भयवशादारब्धमालिङ्गितुं
भङ्क्तास्या नियमस्य भीषणमरुन्नायं वयस्यो मु मे॥

(१) अयं भीषणमरुद्ध किन्तु मम वयस्य इति तु उत्प्रेक्षे बाधयाऽस्मत उपकारकरणात्तस्य वयस्यत्वमुत्प्रेक्षे इति भावः। तदुक्तमुपकारं दर्शयति न्यस्तेत्यादि। नियमकाले बलादालिङ्गने भ्रुकुटिनयनाश्रुपातादिकं क्रियते तच्च बाधाभयेन स्वयमेव कृतमित्याशयः। अत्रार्थे तु भ्रुकुटिः न न्यस्ता अनभिमतकरणे भ्रुकुटित्वं स्त्रीणां स्वाभाविकम् तच्च कृतं नापि चक्षुषी अश्रुभिराच्छादिते इदमपि स्त्रीणां स्वाभाविकम् यदनभिमतकरणे किञ्चिद्वक्तुमसामर्थ्ये अश्रुजलस्रावेण लोचने आच्छाद्येते। नापि अन्यतः अन्यत्राननं नीतं परावृत्य स्थापितं नापि स्पृष्टश्चाहं "त्वया नाहं स्पर्शनीयेति" शपथं दत्त्वा निवारितः इदमपि तासां स्वाभाविकमेव। स्वकृतालिङ्गनादौ प्रतिबन्धाभावमुक्त्वा तयैव तत् स्वयंकृतमित्याह भयवशात् लगनयोधरं सम्बद्धस्तनं यथा तथा आलिङ्गितुमारब्धम्। अनेन तदानीमलभ्यं तदालिङ्गनं संपादयतो वायोरुपकारितेति सूचितम्। अस्या भानुमत्या नियमस्य व्रतस्य भङ्क्ता नाशयिता।

तत्सम्पूर्णमनोरथस्य मे कामचारः(१)प्रसरति विहारेषु तदितो दारुपर्वतमेव मच्छामः ।

सर्वे वात्सावाधां रूपयन्तो यतनः परिक्रामन्ति ।

राजा । (२)कुरु घनोरु ?पदानि शनैःशनै-
रपि विमुञ्च गतिं परिवेपिनीं ।
सुतनु वाऊलतोपनिबन्धनं
मम निपीड्य गाढमुरःस्थलम् ॥

प्रवेशं रूपयित्वा । प्रिये अलब्धावकाशः समीरणः संहृतत्वाद् गर्भगृहस्य(२)विश्रब्धमुन्मीलय चक्षुरुन्मृष्टरेणुनिकरम् ।

भानु । सहर्षम् । दिष्ट्या उत्पातसमीरणासारो न बाधेद् । *

---

(१) स्वेच्छाचारः ।

(२) घनोरु हे निविडोरु शनैःशनैः पदानि कुरु । बाऊलतेव तया उपनिबन्धनं बन्धनं यत्र तद्यथा तथा उरःस्थलं गाढं निपीड्य आलिङ्ग्येत्यर्थः ।

(३) गर्भगृहस्य मध्यगृहस्य संहृतत्वात् भित्त्यादिनावृतत्वात् समीरणः अलब्धावकाशः अप्राप्तप्रवेशः । उन्मृष्टः प्रोञ्छितोरेणुनिकरोधूलिसमूहो यस्मात्तादृशं चक्षुरुन्मीलय ।

---

* दिष्ट्या उत्पातसमीरणासारो न बाधते ।

Digitized by Google

सखी। महाराअ आरोहणसंभमणिस्सहं पिअसहीए उरुजुअलं ता कीस दाणीं महाराओ आसणवेदीं ण अणुभूसेदि।*

राजा। देवीमवलोक्य। भवति अनल्पमेवापकृतं वात्यासम्भ्रमेण। तथाहि

(१)रेणुर्बाधां विधत्ते तनुरपि महतीं नेत्रयोरायतत्वा-
दुत्कम्पोऽल्पोऽपि पीनस्तनभरितमुरः क्षिप्तहारं दुनोति।
ऊर्वोर्मन्देऽपि याते पृथुजघनभराद्वेपथुर्वर्द्धतेऽस्या
वात्या खेदं क्षणाङ्गाः सुचिरमवयवैर्दत्तहस्ता करोति॥

सर्वे उपविशन्ति।

राजा। तत् किमित्यनास्तीर्णं कठिनशिलातल-
मध्यास्ते देवी यतः।

---

(१) मन्दे खल्पेऽपि याते गमने सति बद्धगमनाभावेऽपीत्यर्थः। दत्तहस्ता कृतालम्बना दत्तसाहाय्येति यावत् वात्या वातसमूहः खेदं सुचिरं बद्धकालं करोति।

---

* महाराज! आरोहणसंभ्रमनिःसहं प्रियसख्या ऊरुयुगलं तत् कस्मादिदानीं महाराज आसनवेदीं नानुभूषयसि।

Digitized by Google

(२)लोलांशुकस्य पवनाकुलितांशुकान्तं
त्वद्दृष्टिहारि मम लोचनबान्धवस्य ।
अध्यासितुं तव चिरं जघनस्थलस्य
पर्य्याप्तमेव करभोरु ममोरुयुग्मम् ॥

प्रविश्य पटाक्षेपेण संभ्रान्तः कञ्चुकी। देव भग्नं भग्नम् ।
सर्वे सातङ्कं पश्यन्ति ।
राजा। केन ।
कञ्चु। देव भीमेन। [ ]
राजा। आः किं प्रलपसि ,

---

(२) हे करभोरु ममोरुयुग्ममेव तवोरुयुगलस्य अध्यासितुं पर्य्याप्तं समर्थं तत् किमन्याध्यासनेनेति भावः। इह कूलनामा सन्धिः यथोक्तं भरतेन "दृष्टार्थयुक्तं यद्वाक्यं भाष्यतेऽन्यमनीषया। वाक्यान्तरेण संयोगात् कूलनामाभिधीयते" इतीह राजोरुयुग्मं भानुमत्या ऊरुयुगाध्यासनपर्य्याप्ततया प्रक्रान्तं तस्य भग्नं भग्नमित्यनेन सम्बन्धेन भावितङ्कुरूचनार्थत्वेन सङ्गतमित्यन्यपरतयास्य कूलत्वम् ।

[राजा। कस्य ।]
[कञ्चु। भवतः ।] इत्यधिक पाठः दर्पणोद्धृतः ।

Digitized by Google

भानु । अज्ज किं अणत्थं मन्तेसि । *

कञ्चु । सभयम् । देव कथयामि सर्व्वम् ।

(१) भग्नं भीमेन भवतो भरता रथकेतनम् ।
पतितं किङ्किणीकाणवद्धाक्रन्दमिव क्षितौ ॥

राजा । यदि बलवत्समीरणवेगात् कम्पिते भुवने भग्नः स्यन्दनकेतुः तत्किमित्युद्धतं प्रलपसि भग्नं भग्नमिति ।

कञ्चु । देव न किञ्चित् किन्तु भ्रमनार्थमस्यानिमित्तस्य विज्ञापयितव्यो देव इति स्वामिभक्तिर्मां मुखरयति ।

भानु । अज्जउत्त परिहरीअदु एदं अणिमित्तं प्पसन्नबम्हणवेआणुघोसेण होमेण अ । †

राजा । सावग्रम् । ननु गच्छ पुरोहितसुमित्राय निवेदय ।

---

(१) भीमेन भीषणेन । किङ्किणीकाणेन क्षुद्रघण्टिकाशब्देन आबद्धः कृतः आक्रन्दः क्रन्दनं येन तथाभूतमिव भूमौ पतितम् ।

---

* आर्य किमनर्थं मन्त्रयसि ।

† आर्यपुत्र, परिहार्यतामेतदनिमित्तं प्रसन्नब्राह्मणवेदानुघोषेण होमेन च ।

Digitized by Google

कञ्चु। यदाज्ञापयति देवः । इति निष्क्रान्तः ।

प्रविश्य प्रतिहारी सोद्वेगमुपसृत्य । जअदु जअदु महाराओ । महाराअ एसा क्खु जामादुणो सिन्धुराअस्स मादा दुस्सला अ पडिहारभूमीए चिट्ठदि । *

राजा । स्वगतम् । किं जयद्रथमाता दुःशला चेति क्वचिदभिमन्युवधामर्षितैः पाण्डुपुत्रैर्न कश्चिदत्याहितमाचेष्टितं भवेत् । प्रकाशम् । गच्छ प्रवेशय क्षीघ्रम् ।

प्रती। जं महाराओ आणवेदि ।† इति निष्क्रान्ता ।

ततः प्रविशति संभ्रान्ता जयद्रथमाता दुःशला च ।

उभे । साश्रुम् दुर्योधनस्य पादयोः पततः ।

माता । पडित्ताअदु पडित्ताअदु कुलुणाहो ।‡

दुःशला । रोदिति ।

राजा । ससंभ्रममुत्थाय । अम्ब समाश्वसिहि समाश्वसिहि किमत्याहितम् अपि कुशलं समराङ्गणेष्वप्रतिरथस्य जयद्रथस्य ।

---

* जयतु जयतु महाराजः । महाराज एषा खलु जामातुः सिन्धुराजस्य (जयद्रथस्य) माता दुःशला च प्रतीहारभूमौ (द्वारे) तिष्ठतः । दुःशला दुर्योधनस्य स्वसा ।

† यन्महाराज आज्ञापयति ।

‡ परित्रायतां परित्रायतां कुरुनाथः ।

Digitized by Google

माता । जाद कुदो कुसलं । *

राजा । कथमिव ।

माता । वाएहम् । अज्ज क्खु पुत्तवहामरिसुद्दीविदेण गण्डीविणा अणत्थमिदे दिवहणाहे तस्स वहो पडिण्णादो । †

राजा । सखिलम् । दूरं तदस्य कारणमम्बाया दुःशलायाश्च । पुत्रशोकादुत्तप्तस्य किरीटिनः प्रज्ञपितैवमनया, अहो मुग्धत्वमबलानाम् । कृतं विषादेन वत्से दुःशलेऽलमस्यपातेन । कुतश्चायमस्य धनञ्जयस्य प्रभावो दुर्योधनबाहुपरिघ (१) रचितस्य महारथ(२)जयद्रथस्य विपत्तिमुत्प्रेक्षयितुम् ।

---

(१) बाहुःपरिघइव परिघोऽस्त्रभेदः सर्वार्थसाधनत्वाद्बाहोः परिघत्वम् ।

(२) "एकोदग्रसहस्राणि यो योधयति धन्विनाम् । अस्त्रशास्त्रप्रवीणश्च विज्ञेयः स महारथ" इत्युक्तलक्षणत्वेन स्वत एव न तस्य विपत्तिः किमुत मद्रक्षितस्येति भावः ।

---

*जात ! कुतः कुशलम् । पुत्रस्थानीयानां जातदृतिसंबोधनम्

† अद्य खलु पुत्रवधामर्षोद्दीपितेन गाण्डीविना अनस्तमिते दिवसनाथे तस्य वधः प्रतिज्ञातः । अस्तमिति मान्तमव्ययम् ।

Digitized by Google

माता । जाद जजोअ बन्धुवहामरिसुद्दीविदकोवणा अणपेक्खिदसरीरा वीरा परिक्कमन्ति ।*

राजा । सोपहासम् । एवमेतत् सर्व्वजनप्रसिद्धमेवामर्षित्वं पाण्डवानाम् पश्य ।

(१)हस्ताकृष्टविलोलकेशवसना दुःशासनेनाऽनया
पाञ्चाली मम राजचक्रसमितौ गौर्गौरिति व्याहृता ।

---

(१) मयाऽनया दुःशासनेन कर्त्रा हस्ताकृष्टं विलोलं केशो वसनं च यस्यास्तथाभूता पाञ्चाली सर्व्वराजसभायामेव न त्वेकान्ते, गौर्गौरिति अवध्यत्वात् अहं गौरहं गौरित्येवं द्विरुक्तिः संभ्रमातिशयद्योतनार्था व्याहृता व्याहारिता अन्तर्भूतणिजर्थः । राजवधूनां गौर्गौरित्यभिधानमतीवापमानसूचकमिति समाचारः । तस्मिन्नेव समये विषये वा एषः स्वचक्षुषैव तदद्भुतमानन्दोद्भुतः किं नु किमिति गाण्डिवधरो नासीत् न जातः अपमानकरं तदेतत् तस्य किं कोपस्थानं न व्यक्तिमात्रस्य तस्य क्रोधस्थानत्वम् विशेषतो यूनस्तरुणस्य तदवस्थायां क्रोधस्य स्वाभाविकत्वात् तत्रापि क्षत्रियवंशजस्यातिशयेन स्वाभाविक क्रोधवत्त्वं तत्रापिच कृतिनः कृतकार्य्यस्य क्रोधातिशयवत्त्वं भव-

---

* जात ! यतश्च बन्धुवधामर्षोद्दीपितकोपानला अनपेक्षित शरीरा वीराः परिक्रामन्ति ।

Digitized by Google

तस्मिन्नेव स किन्नु गाण्डिवधरो नासीत् पृथानन्दनो
यूनः क्षत्रियपुंगवस्य कृतिनः क्रोधास्पदं किं न तत् ॥

माता। असमाप्तपरिज्ञाभरेण आत्मवधो तेण परिज्ञादो। *

राजा। यद्येवमलमानन्दस्थानेऽपि ते विषादेन, ननु वक्तव्यमुत्तम्नः सानुजो युधिष्ठिर इति। मातः! का शक्तिरस्ति धनञ्जयस्य अन्यस्य वा कुरुसुतपरिवारवर्द्धितमहिम्नः कर्णद्रोणाश्वत्थामादिमहारथद्विगुणीकृतनिरावरण(१)विक्रमस्य नामापि ग्रहीतुं ते तनयस्य, अयि सुतपराक्रमानभिज्ञे!

त्येव तत्र यद्यस्यामर्षित्वं न तदा कदास्यामर्षित्वमित्यमर्षित्वाभावः प्रसिद्धतया यदाविष्टः तस्यमर्षितमिति भावः।

(१) निरावरणः प्रसरणप्रतीघातरहितः स्वभावतस्तस्य निरावरणत्वं पुनर्द्रोणादिभिर्द्विगुणीकृतत्वान्न धनञ्जयस्य तदभिभवने शक्तिरिति भावः

(*) असमाप्तप्रतिज्ञाभरेणात्मवधस्तेन प्रतिज्ञातः।

Digitized by Google

(१) धर्म्मात्मजं प्रति यमौ च कथैव नास्ति
मध्ये पृकोदरकिरीटभृतोर्बलेन।
एकोऽपि विस्फुरितमण्डलचापचक्रं
कः सिन्धुराजमभिषेणयितुं समर्थः॥

भानु। अज्जउत्त जइवि एवं तहवि गुरुकिद-पडिण्णाभरो धनञ्जओ त्ति ट्ठाणं खु सङ्काए। *

माता। जादे साङ्ग कालोइदं तुए मन्तिदं। †

राजा। आः! ममापि नाम दुर्य्योधनस्य शङ्का-स्थानं पाण्डवाः, पश्य,

---

(१) युधिष्ठिरं यमौ च प्रति कथा जयद्रथेन सह युद्धस्य प्रसक्तिर्नास्ति भीमार्ज्जुनयोर्मध्ये कः एकः बलेन विस्फारितं मण्डलाकारं धनुश्चक्रं येन तादृशं सिन्धुराजमभिषेणयितुम् आभिमुख्येन योद्धुं समर्थः न कोऽपीत्यर्थः।

---

*आर्यपुत्र! यद्यपि एवं, तथापि गुरुकृतप्रतिज्ञाभरो धनञ्जयइति स्थानं खलु शङ्कायाः।

† जाते साधु, कालोचितं त्वया मन्त्रितम्।

Digitized by Google

कोदण्डज्याकिणाङ्कैरगणिततरिपुभिः कङ्कटोन्मुक्तदेहैः
श्लिष्टान्योन्यातपत्रैः सितकमलवनभ्रान्तिमुत्पादयद्भिः ।
(१)रेणुग्रस्तार्कभासां प्रचलदसिलताद्दन्तुराणां चमूना
माक्रान्ता भ्रातृभिर्मे दिशिदिशि समरे कोटयःसम्पतन्ति॥

अयि भानुमति,(२)विज्ञातपाण्डवप्रभावे ! किं त्वमपि एवमाशंससे, पश्य ।

(३)दुःशासनस्य हृदयच्छतजाम्बुपाने
दुर्योधनस्य च यथा गदयोरुभङ्गे ।
तेजस्विनां समरमूर्द्धनि पाण्डवानां
प्रत्येया जयद्रथबधेऽपि तथा प्रतिज्ञा ॥

---

(१)कोदण्डस्य चापस्य ज्यायाःकिणः घर्षणजातः घाँटेति प्रसिद्धः अङ्को येषां तैः कङ्कटेन सन्नाहेन उन्मुक्तं रहितं देहं येषामात्मवीर्यगौरवात् सन्नाहमकुर्व्वाणैरिति भावः । प्रचलन्ती यासिलता तया दन्तुराणां निम्नोन्नतानां चमूनां कोटयःशतलक्षपरिमिताः सेनाः भ्रातृभिराक्रान्ताः पतन्ति भूमौ शेरते इत्यर्थः ।

(२) विज्ञातः पाण्डुसुतानां प्रभावोययेति सोपहासमिदं तेषां प्रभावो नास्त्येव तत्त्वयाप्यनुभूतमिति भावः ।

(३) तेषां प्रतिज्ञापूरणाभावेन अप्रभावत्वं दर्शयति दुःशासनेत्यादि । हृदयस्य क्षतजं रुधिरमेवाम्बु तस्य पाने, दुर्योधनस्य मम चोरुभङ्गे यथा प्रतिज्ञा न सफला तथैवमपि न फलिष्यतीति भावः ।

Digitized by Google

कः कोऽत्र भोः ? जैत्रं(१)मे रथमुपपादय तावत्, यावदहमपि [ ] तस्य प्रगल्भस्य पाण्डवस्य मिथ्याप्रतिज्ञावैलक्ष्यं(२)सम्पादितमग्रस्तपूतं मरणमुपदिशामि ।

प्रविश्य कञ्चुकी । देव !

(३)उद्घातक्वणितविलोलहेमघण्टः
प्रालम्बद्विगुणितचामरप्रहासः ।
सज्जोऽयं नियमितवल्गिताकुलाश्वः
शत्रूणां क्षपितमनोरथो रथस्ते ॥

---

(१) जैत्रं जयसाधनम् ।

(२) मिथ्या सूर्यास्तसमयमध्ये जयद्रथावधेन विफलया प्रतिज्ञया यत् वैलक्ष्यं लज्जा तेन सम्पादितम् अग्रस्तपूतं ग्रस्तेन मरणं हि क्षत्रियाणां पवित्रं तस्य चात्मघातित्वेन ग्रस्तेन न पूतम् अग्राह्यभोजीत्यादिवदसमर्थेनापि नञा समासः । वैलक्ष्यं सम्पादयन्निति पाठे तत्कुर्वन्नित्यर्थः ।

(३) उद्घात आघातस्तेन क्वणिता शब्दायिता विलोला हेमघण्टा यत्र । प्रालम्बस्य लम्बमानस्य द्विगुणितस्य पार्श्वद्वये द्विधाबद्धस्य चामरस्य प्रहासः प्रकाशो यत्र अथवा चामरःप्रहास इव शुभ्रत्वात् यत्रेति समासः । नियमिता यन्त्रिता अतएव वल्गिता गतिभेदेन चलिता आकुला अश्वा यत्र ।

[जयद्रथपरिरक्षणेन]

राजा । देवि ! प्रविशत्वभ्यन्तरमेव, यावदहमपि । तस्य प्रणाम्येत्यादि पठित्वा परिक्रामति ।

इति निष्क्रान्ताः सर्वे ।

द्वितीयोऽङ्कः ।

इति श्रीतारानाथतर्कवाचस्पति भट्टाचार्य्य विरचिते वेणीसंहारनाटक व्याख्याने विप्रलम्भाख्योद्वितीयोऽङ्कः ।



Digitized by Google

तृतीयोऽङ्कः ।

ततः प्रविशति विकृतवेषा राक्षसी ।

राक्ष० । विअदं विहस्स, सपरितोषम् । हदमाणुस-मंससोणिदेहिं कुम्भसहस्सं वसाहिं संचिदं अणिसं अ पिवामि सोणिअं वरिससदं समले ऊवीअदु । इति नृत्यन्ती सपरितोषम् । जदू सिन्धुराअवहदिअहे विअ दिवहे दिवहे समलकम्म पडिवज्जदू अज्जुणे, तदो पज्जत्तभलिदकोट्ठागाले मंससोणिदेहिं मे गेहे ऊविस्सदि । परिक्रम्य दिशोऽवलोक्य । अध कहिं णु लुहिलप्पिए ऊवीअदि । ता जाव इमस्सिं समले पिअभत्तालं लुहिलप्पिअं अन्वेसामि । परिक्रम्य । होदु सद्दावइस्सं दाव । लुहिप्पिआ लुहिलप्पिआ ! इदो एहि इदो एहि । *

---

* हतमानुषमांसशोणितैः कुम्भसहस्रं वसाभिः सञ्चितमनिशञ्च पिबामि शोणितं, वर्षशतं समरं भवतु । यदि सिन्धुराजवधदिवसइव दिवसेदिवसे समरकर्म्म प्रतिपद्यतेऽर्ज्जुनः, ततः पर्य्याप्तभरितकोष्ठागारं मांसशोणितैर्मम गृहं भविष्यति । अथ क्व नु रुधिरप्रियो भविष्यति । तद्यावदस्मिन् समरे प्रियभर्त्तारं रुधिरप्रियमन्वेषयामि । भवतु शब्दायिष्ये तावत् । रुधिरप्रिय! रुधिरप्रिय ! इत एहि, इत एहि । भरितं पूर्णं कोष्ठागारं धान्यादिस्थापनस्थानं कुटीति प्रसिद्धं यस्य गृहस्य तत् । रुधिरप्रिया इति दूरात्सम्बोधनाय श्रुतस्वरसूचनार्थमाकारान्ततयोक्तम् ।

Digitized by Google

ततः प्रविशति तथाविधो राक्षसः।

राक्ष। भ्रमणं नाटयन्। पच्चग्गहदाणं मंसए जदू उच्छे लुहिले अ लंभदू ता एसो मह पलिस्समे क्खणमेत्तं एव्व लहु णस्सदू। *

राक्षसी। पुनर्व्याहरति।

राक्ष। आकर्ण्य। अले के एसे मं सद्दावेदि। विलोक्य। अले कहं वसागन्धा। उपसृत्य। वसागन्धे! मं कीस सद्दावेसि। †

राक्ष। लुहिलप्पिआ एदं क्खु तुह कारणादो पच्चग्गहदस्स कस्स वि लाएसिणो सलीलावअवप्पउदं अउदवसासिणेहचिक्कणं कोव्वं लुहिलं अग्गमंसं अ आणीदं ता पिवाहि णं। ‡

---

* प्रत्यग्रहतानां मांसं यद्युष्णं रुधिरञ्च लभ्येत तदेष मम परिश्रमः क्षणमात्रमेव लघु नश्येत्। प्रत्यग्रमभिनवम्।

† अरे का एषा मां शब्दायते। अरे कथं वसागन्धा। वसागन्धे! मां कस्मात् शब्दायसे।

‡ रुधिरप्रिय! इदं खलु तव कारणात् प्रत्यग्रहतस्य कस्यापि राजर्षेः शरीरावयवप्रभूतं प्रभूतवसास्नेहचिक्कणं कोष्णं रुधिरमयमांसञ्च आनीतं, तत् पिबैनत्।

Digitized by Google

राज्ञ। सपरितोषम्। साऊ वसागन्धे साऊ, सोहणं तुए किदं बलिअस्स पिवासिए जं कोसिणं कोसिणं रुहिलं आणीदं। *

राज्ञ। रुहिलप्पिआ! एदिसे हदणलगअतुलङ्गमसोणिअवसासमुद्दुद्धुंचले समलाङ्गणे भड़िब्भमन्ते तुमं पिवासिएसि त्ति अच्चलिअं अच्चलिअं। †

राज्ञ। सक्रोधम्। अले वसागन्धे! पुत्तघड़क्कअसोअसन्तत्तहिअअं सामिणीं पेक्खिदुं गदम्हि। ‡

राज्ञ। रुहिलप्पिआ! अज्जवि सामिणीए हिड़िम्बादेवीए घड़क्कअसोए ण उपसम्मइ। **

---

* साधु वसागन्धे साधु, शोभनं त्वया कृतं बलदस्य पिपासितः, यत् कोष्णं कोष्णं रुधिरमानीतम्। बलवदतित्वरयितम्।

† रुधिरप्रिय! दृष्टे हतनरगजतरङ्गमशोणितवसासमुद्रोद्धुरे समराङ्गणे परिभ्रमन् त्वं पिपासितोऽसि इति आश्चर्यम् आश्चर्यम्।

‡ अयि वसागन्धे! पुत्रघटोत्कचशोकेन सन्तप्तहृदयां हिड़म्बादेवीं प्रेक्षितुं गतोऽस्मि।

** रुधिरप्रिय। अद्यापि स्वामिन्या हिड़म्बादेव्या घटोत्कचशोको नोपशाम्यति।

Digitized by Google

राज्ञ। अइ कुदो से उवसमे किंपु अहि-मन्नुवहसोअसमानदुक्खाए सुभद्दादेवीए जन्नसेणीए अ समास्सासीअदि।*

राज्ञ। लुहिलप्पिआ गेह्ण एदं हत्थि-सिलकवालसंचिअं अग्गमंसोवदंसं पिवाहि णव शोणिआसवं॥†

राज्ञ। तथा कृत्वा। वसागन्धे! अह किअ प्पहुदं तुए सञ्चिअं लुहिलं अग्गमंसं अ।‡

राज्ञ। **अले लुहिलप्पिआ! पुव्वसंचिअं तुमं जेव्व जाणासि णवसञ्चिअं सिणु। भअदत्त

---

* अयि कुतोऽस्या उपशमः किन्तु अभिमन्युवधशोकसमान दुःखया सुभद्रादेव्या यज्ञसेन्या च समाश्वास्यते।

† रुधिरप्रिय! गृह्यतामेतत् हस्तिशिरःकपालसञ्चितमग्रमां सोपदंशं पिब नवशोणितासवम्। उपदंशस्तृतीयायाम् २, ४, ४७, पा० ह्वृ०। ल्यप् मांसेन सहोपदश्यार्थात् मांसेनसह भुक्त्वेत्यर्थः। नवशोणितमासवमिव स्वादुत्वात् अतएवोपदंशसाहित्यमुक्तम्।

‡ वसागन्धे! अथ कियत् प्रभूतं त्वया सञ्चितं रुधिरमग्रमांसञ्च।

**अयि रुधिरप्रिय! पूर्वसञ्चितं त्वमेव जानासि नवसञ्चितं गृह्यतां, भगदत्तशोणितकुल्याः सिन्धुराजवसाकुल्यौ द्वौ मत्स्याधिप

सोणिअकुम्भे सिन्धुलाअवसाकुम्भे दुबे मच्छाहिव भुलिस्सवसोमदत्तवाह्लीअप्पमुहाणं णलिन्दाणं पाकिदपुलिसाणं अ लुहिलवसामंसस्स घटा अविणद्ध मुहा सहस्ससंक्खा सन्ति मे गेहे।

राज्ञ। सपरितोषमालिङ्ग्य। । साहु सुग्घलिणि साहु, दूमिणा दे सुग्घलिणीत्तणेण अज्ज उण सामिणीए हिडिम्बादेवीए संविहाणेण अ प्पणट्ठं मे दालिद्दं। *

राज्ञ। लुहिलप्पिआ! केलिसे सामिणीए संविहाणए किदे। †

राज्ञ। ‡ अज्ज अहं सामिणीए हिडिम्बादेवीए सबड्ढमाणं सद्दाविअ आणत्तो जहा लुहि-

---

भूरिश्रवःसोमदत्तवाह्लीकप्रमुखाणां नरेन्द्राणां प्राकृतपुरुषाणाञ्च रुधिरवसामांसस्य घटाः अपिनद्धमुखाः सहस्रसंख्याः सन्ति मे गेहे। अपिनद्धमाहतं मुखं येषां ते। बद्धकालस्थापनाय मुखाहतिः।

* साधु सुग्टहिणि! साधु अनेन ते सुग्टहिणीत्वेन स्वामिन्या हिडिम्बादेव्याः संविधानेन च प्रनष्टं मे दारिद्र्यम्।

† रुधिरप्रिय! कीदृशं स्वामिन्या संविधानं कृतम्। संविधानं नियोगः।

* अद्याहं स्वामिन्या हिडिम्बादेव्या सबड्ढमानं शब्दाप्य

लम्मिआ अज्ज प्पहुदि अज्जउत्तस्स भीमसेणस्स पिट्ठ दोअणुपिट्ठं समरे तुए आहिण्डिदव्वं त्ति। ता तस्स अणुमग्गगामिणो हदमाणुससोणिअणदंसणप्पणट्ठ-बुभुक्खापिवासस्स इह एव्व मे सग्गलोओ भवीअदि तुमं वि विस्सद्धा भविअ रुहिलवसाहिं कुम्भस-हस्सं सज्जेहि।

राक्ष। लुहिलम्मिआ! किं णिमित्तं कुमार भीमसेणस्स पिट्ठदो अणुपिट्ठं आहिण्डीअदि। *

राक्ष। वसागन्धे। तेण हि सामिणा बिओ-दलेण दुस्सासणस्स रुहिलं पादुं पडिस्सादं तस्स अम्हेहिं लक्खेहिं अणुप्पविसिअ पादव्वं त्ति। †

आत्मनः यथा रुधिरप्रिय! अद्य प्रभृति आर्यपुत्रस्य भीमसेनस्य पृष्ठतोऽनुपृष्ठं समरे त्वया आहिण्डितव्यमिति तत्तस्य अनुमार्गगामिनः हतमानुषशोणितनदीदर्शनप्रनष्टबुभुक्षापिपासस्य इहैव मे स्वर्गलोको भवति त्वमपि विस्रब्धा भूत्वा रुधिरवसाभिः कुम्भसहस्रं सज्जय। आहिण्डितव्यं भ्रमितव्यमित्यर्थः।

* रुधिरप्रिय! किं निमित्तं कुमारभीमसेनस्य पृष्ठतोऽनु-पृष्ठमाहिण्ड्यते।

† वसागन्धे! तेन हि स्वामिना वृकोदरेण दुःशासनस्य रुधिरं पातुं, प्रतिज्ञातं तस्मास्माभिः राक्षसैः अनुप्रविश्य पात-व्यमिति।

Digitized by Google

राज्ञ। सहर्षम्। साऊ सामिणिए साऊ, सुसंविहाणो मे भट्टा तुए किदे।*

नेपथ्ये। महान् कलकलः।

उभावाकर्णयतः।

राज्ञ। आकर्ण्य ससंभ्रमम्। अले लुहिलप्पिआ किं णु क्खु एसे महन्ते कलकले सुणीअदि। †

राज्ञ। हहा। वसागन्धे। एसे धिट्ठज्जुण्णेण दोणे केसेसु आकड्ढिअ असिवत्तेण वावादीअदि। ‡

राज्ञ। सहर्षम्। लुहिलप्पिआ लुहिलप्पिआ! अम्हे वि गच्छिअ दोणस्स लुहिलं पिबम्ह। **

---

* साधु स्वामिनि साधु। सुसंविधानो मे भर्त्ता त्वया कृतः।

† अरे रुधिप्रिय! किं नु खल्वेष महान् कलकलः श्रूयते।

‡ वसागन्धे! एष धृष्टद्युम्नेन द्रोणः केशेषु आकृष्य असिपत्रेण व्यापाद्यते।

** रुधिरप्रिय! रुधिरप्रिय! वयमपि गत्वा द्रोणस्य रुधिरं पिबामः।

Digitized by Google

राक्ष। सभयम्। वसागन्धे! बाह्मणसोणिअं खु एदं गलं दहन्ते पविसदि ता किं एदिणा। *

नेपथ्ये। पुनः कलकलः।

राक्ष। लुहिलप्पिआ! पुणो वि एसे महन्ते कलअले सुणीअदि। †

राक्ष। नेपथ्याभिमुखमवलोक्य। वसागन्धे! एसे खु अस्सत्थामे आकड्ढिदासिवत्ते एदो ज्जेव आअच्छदि कदावि दुवदसुदसोमेण अम्हे वि बावदइस्सदि, ता एहि सामिणीए हिडिम्बादेवीए आणत्तिं करेम्ह। ‡

इति निष्क्रान्तौ। प्रवेशकः। (१)

---

(१) "प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः। अङ्कद्वयान्तर्विज्ञेयः शेषं विष्कम्भके यथेति" दर्पणोक्तेः अनुदात्तस्वरेण नीचपात्रप्रयुक्तत्वात् दुर्योधनादिवधानां वर्त्तिष्यमाणदुःशासनवधादेः कथांशस्यसूचनरूपविष्कम्भलक्षणवत्त्वात् द्वितीयतृतीयाङ्कयोर्मध्ये वर्त्तित्वाच्च प्रवेशकनामकं नाटकाङ्गम्।

---

* वसागन्धे! ब्राह्मणस्योणितं खल्वेतत् गलं दहत् प्रविशति तत् किमेतेन।

† रुधिरप्रिये! पुनरपि एष महान् कलकलः श्रूयते।

‡ वसागन्धे! एष खलु अश्वत्थामा आकृष्टासिपत्र इतएवागच्छति कदाचित् द्रुपदसुतरोषेण अस्मानपि व्यापादयिष्यति तदेहि स्वामिन्या हिडिम्बादेव्या आज्ञप्तिं कुर्मः।

ततः प्रविश्योत्खातखड्गः(१)कलकलमाकर्णयन्नश्वत्थामा ।

अश्व ।

(१)महाप्रलयमारुतक्षुभितपुष्करावर्त्तक
प्रचण्डघनगर्ज्जितप्रतिरुतानुकारी मुहुः ।
रवः श्रवणभैरवः स्थगितरोदसीकन्दरः
कुतोऽद्य समरोदधेरयमभूतपूर्व्वः पुरः ।

विचिन्त्य । ध्रुवं गाण्डीविना सात्यकिना वृकोदरेण वा यौवनदर्पादतिक्रान्तमर्य्यादेन परिकोपितस्तातः समुल्लङ्घ्य शिष्यप्रियतामात्मसदृशभाव माचेष्टते ।

तथाहि ।

---

(१) कलकलमाकर्णयन् उत्खातखड्गः उत्खातः कोषादुद्धृतः खड्गो येन ।

(२) क्षुभितौ चालितौ पुष्करावर्त्तकौ प्रलयकालिकौ मेघभेदौ । तयोः प्रचण्डघनगर्ज्जितं भीषणनिरन्तरस्तनितं तेन स्थगितं प्रतिध्वनिशब्देन व्याप्तम् रोदस्यौ द्यावापृथिव्यावेव कन्दरं दरी येन समरमेवोदधिस्तस्मात् अभूतपूर्व्वः पूर्व्वं न भूतः पुरःअग्रे कुतः कस्मात् कारणात् । अयं श्रूयमाणः रवः ।

Digitized by Google

(१)यद्दुर्योधनपक्षपातसदृशं युक्तं यदस्त्रग्रहे
रामाल्लब्धसमस्तहेतिगुरुणो वीर्य्यस्य यत् साम्प्रतम् ।
लोके सर्व्वधनुष्मतामधिपतेर्यच्चानुरूपं रुषः
प्रारब्धं रिपुघस्मरेण नियतं तत् कर्म्म तातेन मे ॥

दृष्ट्वा विलोक्य । तदलमिदानीं मम रथप्रतीक्षयाऽनया, सज्जस्त्वास्मि सजलजलधरप्रभाभास्वरेण सुप्रग्रहविमलकलधौतत्सरुणा(२)खड्गेन यावत् समरभुवमवतरामि । परिक्रम्य । वामाक्षिस्पन्दनं सूचयित्वा ।

---

(१) दुर्य्योधनस्य पक्षपात आनुकूल्यं साहाय्यकरणमिति यावत् तदृदृशं तदनुरूपम् अस्त्रग्रहे शस्त्रग्रहणे च यदुचितं रामात् परशुरामाल्लब्धाभिः समस्तहेतिभिः गुरुणोलब्धगौरवस्य वीर्य्यस्य साम्प्रतं यदुयुक्तम्। सर्व्वधनुर्द्धारिणामधिपतेःरुषः क्रोधस्य यदनुरूपं, रिपुघस्मरेण शत्रुनाशकेन तातेन तत्कर्म्मादा प्रारब्धम् । नियतमित्युत्प्रेक्षायाम् एतावत्कालमुदास्तम् अधुनोक्तकर्म्म प्रारब्धमित्युत्प्रेक्षे अन्यथा ईदृशः कोलाहलः कथं स्यादित्याशयः ।

(२) सुप्रग्रहः सुखग्राह्यः विमलः कलधौतः तप्तकाञ्चननिर्म्मितः त्सरुः मुष्टिस्थानं यस्य तादृशेन खड्गेन 'रथादिरश्मौ रश्मौ च प्रग्रहः सुग्रहेऽपि चेति" विश्वः । "त्सरुः खड्गादि मुष्टौ स्या"दित्यमरः ।

आः! कथं ममापि नामा(१)ख्यात्मनः समरमहोत्सवप्रमोदनिर्भरस्य तत्तविक्रमदर्शनलालसस्यानिमित्तानि(२)समरगमनविघ्नमुत्पादयन्ति, भवतु अवगच्छामि। सावष्टम्भं परिक्रम्य, अग्रतो विलोक्य। कथमवधीरितसकलक्षात्रधर्म्मा(३)णामुत्सृष्टसत्पुरुषोचितलज्जावगुण्ठनानां(४)विस्मृतस्वामिसत्कारलघुचेतसां, (५) त्यक्तद्विरदतुरङ्गमचरणचारिणाम्(६)

---

(१) नाम सम्भावनायां कथंशब्देन तस्य योगस्तेन विघ्नमुत्पादयन्तीति कथं सम्भाव्यते नैव सम्भाव्यते इत्यर्थः।

(२) अनिमित्तानि दुर्निमित्तानि "तत्सादृश्यं विरोधश्च तदन्यत्वं तदल्पता। अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिता" इत्युक्तेरप्राशस्त्ये इह नञ्।

(३) क्षात्रधर्म्मणामित्यत्र धर्म्मादनिच् केवलात् (५,४,१२४ सू० पा०) अनिच्। धर्म्माणामिति पाठे तु समासान्तविधेरनित्यत्वान्नानिच्।

(४) सत्पुरुषैरुचिताभ्यस्ता चिरपरिचिता या लज्जा सा अवगुण्ठनमिवावरणमिव तदुत्सृष्टं यैः।

(५) विस्मृतः स्वामिसत्कारो भर्त्तृसम्मानो यैरतएव लघु क्षुद्रं चेतो येषां ते पश्चात् कर्मधारयः तेषाम्।

(६) त्यक्तौ द्विरदतुरङ्गमौ यैः तथाभूताः सन्तश्चरणाभ्यां चरन्तीति तेषाम्।

Digitized by Google

अगणितकुलवयःसहस्रपराक्रमव्रतानां रणभूमेः समन्तादपक्रामता (१) मया महान् नादो बलानाम्। अन्यतोऽवलोक्य। हा धिक् कष्टम्! कथमेते महारथाः कर्णादयोऽपि समरात् पराङ्मुखा भवन्ति। साशङ्कम्। कथं नु तातादिष्ठितानामपि बलानामियमवस्था भवेत्, भवत्वेवं तावत्, भो भोः कौरवसेनासमुद्रवेलापरिपालनमहामहीधरा नरपतयः! कृतंकृतं (२) समरपरित्यागसाहसेन (३) यदि समरमपास्य नास्ति मृत्यो

भयमिति युक्तमितोऽन्यतः प्रयातुम्।
अथ मरणमवश्यमेव जन्तोः
किमिति सुधा मलिनं यशः कुरुध्वम्॥

अपिच।

---

(१) रणभूमेः अपक्रामताम् पलायमानानाम् "अपक्रमोऽपयानं स्या"दित्यमरः।

(२) कृतं क्लीबन्तु निष्फले इतिविश्वः। वीप्सायां द्वित्वम्।

(३) इतः समरात्। इह युक्तिरलङ्कारः "अर्थावधारणं यत्तु प्रमाणाद्युक्तिरिष्यते" इति भरतोक्तेः।

Digitized by Google

(१)अस्त्रज्वालावलीढप्रतिबलजलधेरन्तरौर्व्वायमाणे सेनानाथे स्थितेऽस्मिन्नलम पितरि गुरौ सर्वधन्वीश्वराणाम् कर्णालं संभ्रमेण व्रज जय समरं मुञ्च हार्दिक्य शङ्कां ताते चाप्रद्वितीये वहति रणधुरां को भयस्यावकाशः

नेपथ्ये। कुतोऽद्यापि ते तातः ।

अश्व। श्रुत्वा। किं ब्रूथ कुतोऽद्यापि ते तात इति। आः क्षुद्राः समरभीरवः कथमेवं प्रलपतां वः सहस्रधा न दीर्णमनया जिह्वया ।

---

(१) अस्त्रं ज्वाला शिखे व तया अवलीढ आक्रान्तः प्रतिबलं प्रतिकूलसैन्यं जलधिरिव प्रतिभटसमुद्रस्यान्तर्मध्ये और्व्वायमाणे वाड़वानलइवाचरति सर्व्वधन्वीश्वराणां गुरौ। सेनापतौ स्थिते सति संभ्रमेण भयेनालम् भयसाध्यं नास्ति। कर्णस्य भीरुतया रणभङ्गस्य प्रसिद्धतया प्राक् निवारणम्। हार्दिक्य हृदिकापुत्र कृतवर्म्मन् शङ्कां भयं मुञ्च। मातृनामसंबोधनेन भीरुत्वं सूचितम्। भयाभावे हेतुमाह ताते इत्यादि चाप द्वितीये धनुर्मात्रसहाये रणधुरां रणभारं रणाध्वयायित्वमिति यावत् वहति सति भयस्य कोटवकाशः स्थानम् न कोटमीत्यर्थः ।

Digitized by Google

(२)दग्धुं विश्वं दहनकिरणै र्नोदिता द्वादशार्का
वाता वाता दिशिदिशि न वा सप्तधा सप्त भिन्नाः ।
छन्नं मेघै र्न गगनतलं पुष्करावर्त्तकाद्यैः
पापं पापाः कथयत कथं शौर्य्यराशेः पितुर्मे ॥

---

(२) दहनाः दाहकराः किरणास्तैः द्वादश अर्काः सूर्याः "धाता मित्रोऽर्यमा रुद्रो वरुणः सूर्य्यएव च । भगोविवस्वान् पूषा च सविता दशमः स्मृतः॥ एकादशस्तथा त्वष्टा विष्णुर्द्वादश उच्यते" इत्युक्ताः। सप्त वाता मरुतः सप्तधा भिन्नाः जनपञ्चाशद्वा भिन्नाः सन्तः नो वाताः गच्छन्ति "मरुतोनाम ते देवा गणा ये सप्तसप्तकाः । उनपञ्चाशत् वायवश्च हेमाद्रौ व्रतखण्डे ध्यान-प्रकरणे सलक्षणा दर्शिता इह नामतस्तेऽभिधीयन्ते श्वसनः१ स्पर्शनः२वायुः३मातरिश्वा४ सदागतिः५महाबलः६बलबर्द्धनः७ पृषदश्वः८ गन्धवहः९ गन्धवाहकः१० अनिलः११ आशुगः१२ सुसुखः१३ कर्करः१४ समीक्षणः१५ समीरणः१६ अनुत्तमः१७ मारुतः१८ नागयोनिजः१९ जगत्प्राणः२० पावकः२१वातः२२ प्रभञ्जनः२३ पवमानः२४ नभस्वान्२५ अतिबलः२६ तरस्वी२७ द्रावणः२८देवपञ्चकः२९पातालवाहकः३०रथवाट्३१ ऊर्द्धदृक्३२ गतिरोधनः३३ पाणिकः३४ साधकः३५ विश्वपूरकः३६ जगदाश्रयः३७विश्वातिरेकी३८ प्रजागरः३९ विश्वोदरः४० अग्रगः४१ तीव्रकः४२ असुरहा४३विश्वबर्द्धनः४४ भद्रजवः४५पुष्कराजः४६

प्रविश्य संभ्रान्तः सप्रहारः खूनः । परित्रायतां परित्रायतां कुमारः । इति पादयोः पतति ।

अश्व । विलोक्य । अये तातस्य सारथिरश्वसेनः । आर्य्य त्रैलोक्यत्राणक्षमस्य सारथिरसि किं मत्तः शिशुजनात् परित्राणमिच्छसि ।

खूत । उत्थाय, सकरुणम् । कुमार ! कुतोऽद्यापि ते तातः ।

अश्व । सावेगम् । किं [तातो नामास्त्रमुपगतः?]

खूत । अथ किम् ।

अजिनीपतिः४७व्यक्तमूर्त्तिः४८विश्वगः४९ इति । पुष्करः आवर्त्तकः संवर्त्तः द्रोण एते मेघनायका प्रलयकाले खखगणैः सह मिलिता वर्षन्ति तेषामुत्पत्तिमभिधायः "पुष्करावर्त्तकाख्येन कारणेनेह विश्रुताः । नानारूपधराख्ये तु महाघोरस्वनास्तथा ॥ कल्पान्ते दृष्टिकर्त्तारः संवर्त्ताग्नेर्नियामका" इति ब्रह्माण्डपुराणे ५८ अध्याये द्रष्टव्यम् । प्रलयकाले एव द्वादशादित्यादेरुदया त्तदभावे कथं गुरोः पापमनिष्टं मरणं वदत तथा च प्रलयकालं विना तस्य मरणं न संभवतीत्याशयः ।

[तातएव नास्ति ।] क्वचिदित्येव पाठः ।

Digitized by Google

अश्व। हा तात हा तात! इति मोहमुपगम्य पतितः।

सूत। कुमार! समाश्वसिहि समाश्वसिहि।

अश्व। लब्धसंज्ञ उत्थाय सास्रम्। हा तात हा सुतवत्सल हा लोकत्रयैकधनुर्धर हा जामदग्न्यास्त्र-सर्व्वस्वप्रतिग्रहप्रणयिन्।[

सूत। कुमार! अलमत्यन्तशोकावेगेन, वीर-पुरुषोचितां विपत्तिमुपगते पितरि त्वमपि त्वदनु-रूपेणैव वीर्य्येण शोकसागरमुत्तीर्य सुखीभव।

अश्व। अश्रूणि विमुच्य। आर्य्य! कथय कथय कथं तादृग्भुजवीर्य्यसागरस्तातोऽपि नामास्त्रमुपगतः। (१)किं भीमादृगुरुदक्षिणां गुरुगदां भीमप्रियःप्राप्तवान्?

सूत। शान्तं पापम्।

अश्व।

अन्तेवासिदयालुरुज्झिततनयेनासादितो जिष्णुना।

---

(१) भीमप्रियदत्तेन तत्प्रियत्वेन स्ववीर्य्यं न प्रकाशितमतो भीमेन यथेष्टमाचरितमिति भावः एवम् अन्तेवासिदयालुत्वमपि उपेक्षायां बीजम् जिष्णुना अर्जुनेन आसादितःव्यापादितः।

[क्वासि प्रयच्छ मे प्रतिवचनम्।] इतिकचिदधिक पाठः।

Digitized by Google

सूत । कथमेवं भविष्यति ।

अश्व ।

गोविन्देन सुदर्शनस्य नियतं धारापथं प्रापितः ?

सूत । तदपि नास्ति ।

अश्व ।

मन्ये नापदमन्यतः खलु गुरोरेभ्यश्चतुर्थादहम् ।

सूत । कुमार !

(१)एतेऽपि तस्य कुपितस्य महास्त्रपाणेः

किं धूर्जटेरिव तुलामुपयान्ति संख्ये ।

शोकोपरुद्धहृदयेन यदा तु शस्त्रं

त्यक्तं तदास्य विहितं रिपुणातिघोरम् ॥

अश्व । किं पुनः कारणं शोकस्य अस्त्रपरित्यागस्य वा ?

सूत । ननु कुमार एव कारणम् ।

अश्व । कथमहमेव ?

सूत । अश्रूणि विमुच्य । श्रूयताम्,

---

(१) महास्त्रपाणेरित्यनेनास्त्रधारणेऽयं तैरपि दुर्जयइति सूचितम् । अतिघोरं नृशंसतं त्यक्तास्त्रस्य हिंसनमनार्य्य कार्य्यम् । रिपुणा तद्वधार्थमेवोत्पन्नेन सहजरिपुणा धृष्टद्युम्नेन विहितम् शस्त्रत्यागे हेतुमाह शोकेत्यादि। शोकेन उपरुद्धं व्याप्तं हृदयं यस्य तथाभूतेन शोकार्त्तस्य शस्त्रत्यागःसमुचित इति भावः ।

Digitized by Google

(१) अश्वत्थामा हत इति पृथासूनुना स्पष्टमुक्ता
स्वैरं ग्रेषे गज इति किल व्याहृतं सत्यवाचा ।
तच्छ्रुत्वाऽसौ दयिततनयः प्रत्ययात्तस्य राज्ञः
शस्त्राण्याजौ नयनसलिलं चापि तुल्यं मुमोच ॥

अश्व । हा तात, हा सुतवत्सल, हा वृथा-मदर्थपरित्यक्तजीवित, हा शौर्य्यराशे, हा शिष्य प्रिय, हा युधिष्ठिरपक्षपातिन् ! इति रोदिति ।

सूत । कुमार ! अलमत्यन्तपरिदेवनकार्पण्येन ।

अश्व । (२)श्रुत्वा वधं मम मृषा सुतवत्सलेन
तात त्वया सह शरैरसवो विमुक्ताः ।
जीवाम्यहं पुनरयं भवता वियुक्तः
क्रूरेऽपि तन्मयि मुधा तव पक्षपातः ॥

---

(१) ग्रेषे वाक्यस्यावसाने गजइति पदं स्वैरं स्वेच्छया न तु परबोधेच्छया तेनान्यश्रवणायोग्यता तथाच अस्पष्टमित्यर्थः । अतएव तस्य न सत्यवादिताव्याघातइति सूचयन् विघ्निनष्टि सत्यवाचेति तत् अश्वत्थामा हतइति स्पष्टं वाक्यावयवं श्रुत्वा तस्य राज्ञः प्रत्ययात् सत्यवादित्वविश्वासात्आजौ शस्त्राणि चक्षुर्जलञ्च तुल्यमेकदैव मुमोच । इह अभूताहरणनामा गर्भसन्धिः यथोक्तं भरतेन "उक्तं भूतञ्च यद्वाक्यमभूताहरणन्तु त"दिति ।

(२) मम मिथ्यामरणश्रवणान्मुक्तप्राणस्य तव सत्यमरणेऽपि जीवतो मम अयथाचरणात् क्रूरत्वं तादृशे क्रूरे मयि तव पक्षपातःस्नेहः मुधा वृथेत्यर्थः ।

Digitized by Google

इति मोहमुपगतः ।

सूत । समाश्वसितु समाश्वसितु कुमारः ।

ततः (१)प्रविशति सोद्वेगः कृपः ।

कृप । (२) धिक् सानुजं कुरुपतिं धिगजातशत्रुं
धिग् भूपतीन् विफलशस्त्रभृतो धिगस्त्रान् ।
केशग्रहः खलु तदा द्रुपदात्मजाया
द्रोणस्य चाद्य लिखितैरिव वीक्षितो यैः ॥
तत् कथं नु खलु वत्सं द्रक्ष्याम्यश्वत्थामानम्,

---

(१) व्रज कृप! समरमित्यनेन कृपस्य सूचनात् ततः प्रविशतीत्युक्तिः सङ्गच्छते सूचितप्रवेशस्यैव नाट्ये प्रवेशनस्य पूर्वं भरतवाक्येन प्रतिपादित्वात् ।

(२)तदा द्यूतकाले द्रौपद्याः, अद्य च द्रोणस्य केशग्रहः बलात्कारेण केशधारणं, यैः शस्त्रभृद्भिर्भूपतिभिरस्त्राभिश्च लिखितैः चित्रन्यस्तैरिव वीक्षितः न तु प्रतीकारार्थं चेष्टितं तान् भूपतीन् अस्त्रांश्च धिक् शस्त्रभृत्त्वविशेषणेन प्रतीकारक्षमतासामर्थ्येऽपि तदकरणेनातिनिन्दितत्वमिति सूचितम्। दुष्टकर्मदृङ्मेक्षया तत्कर्तुः निन्दिततरत्वात् प्रथमनिर्देशः तत्रापि क्रमप्राप्तद्रौपदी केशग्रहकर्तुः कुरुपतेः प्राधान्येन, द्वितीयकेशग्रहहेतुकर्तुर्युधिष्ठिरस्य परतोनिर्देशः । कुरुपतेरपि स्वयं केशग्रहाकर्तृत्वात् सानुजमिति विशेषणम् ।

Digitized by Google

अथवा हिमवत्(५)तारगुरुचेतसि ज्ञातलोकस्थितौ तस्मिन् न खलु शोकावेगमहमाशङ्के, किन्त्वसदृशं पितुः पराभवमुपश्रुत्य किं व्यवस्यीतति न जाने अथवा,

(६)एकस्य[ ]तावत् पाकोऽयं दारुणो भुवि वर्त्तते ।
केशग्रहे द्वितीयेऽस्मिन् नूनं निःशेषिताः प्रजाः ॥

विभाव्य । तदयं वत्सस्तिष्ठति, यावदुपसर्पामि । उपसृत्य ससंभ्रमम् । वत्स ! समाश्वसिहि समाश्वसिहि ।

अश्व । संज्ञां लब्ध्वा । सास्रम् । हा तात, हा सकलभुवनैकगुरो ! आकाशे । युधिष्ठिर युधिष्ठिर !

---

(५) हिमवतोहिमालयस्य सारमिव स्थिरांशइव गुरु धैर्यान्वितत्वात् अवष्टम्भि अचञ्चलमिति यावत् चेतो यस्य तादृशेऽस्मिन् अश्वत्थाम्नि ।

(६) एकस्य केशग्रहस्य द्रौपद्याइति शेषः । अयं प्रत्यक्षेणानुभूयमानः तावदित्युपक्रमेऽव्ययम् । उपक्रान्तइत्यर्थः । दारुणः अनिष्टबहुलः पाकः परिणामः संग्रामरूपं फलमित्यर्थः । द्वितीये द्रोणस्य केशग्रहे सति प्रजाः निशेषिताः भविष्यन्तीति शेषः नूनमित्युत्प्रेक्षायाम् । दृह उद्रेदाख्यं मुखाङ्गं यथोक्तं दर्पणे "दृहस्यार्थस्य तूद्रेदः क्षेपः स्यादि"ति ।

[एकस्यैव विपाकोऽयमिति दर्पणधृतपाठः ।]

(१)आ जन्मनो न वितथं भवता किलोक्तं
न द्वेक्षि यज्जनमतस्त्वमजातशत्रुः।
तातेगुरौ द्विजवरे मम भाग्यदोषात्
सर्व्वं तदेकपद एव कथं निरस्तम्।

सूत। कुमार! एष ते मातुलः शारद्वतः पार्श्वे तिष्ठति।

अश्व। पार्श्वे विलोक्य सवाष्पम्। मातुल, मातुल!

(२)गतो येनाद्य त्वं सह रणभुवं सैन्यपतिना
य एकः शूराणां गुरुसमरकण्डूनिकषणः।
परोहासा श्चित्राः सततमभवन् येन भवतः
स्वसुः श्लाघ्यो भर्त्ता क्व नु खलु स ते मातुल गतः॥

---

(१) तत् द्वेष्टृत्वाभावः मिथ्यावादित्वाभावश्चेति द्वयम् एकपदे एकस्थाने एकस्मिन्नेव विषये इति यावत् द्विजवरे ब्राह्मणश्रेष्ठे शत्रुषु हीनेषु अपकृष्टेषु कथञ्चित् सम्भवदपि तादृशे तद्द्वयत्यागोऽत्यन्तमनुचित इति द्योतनाय विशेषणद्वयम् कथं केन कारणेन निरस्तम् न किञ्चिदन्यत् कारणं किन्तु ममैव भाग्यदोषात् नान्यकारणादित्यर्थः।

(२) शूराणां वीराणां गुरुसमरकण्डूनिकषणः श्रेष्ठरणेच्छारूपकण्डूतिनिवारणः कण्डूः चुल्कुनीति प्रसिद्धव्रणभेदः। श्लाघ्यः प्रशंसनीयः ते स्वसुर्भर्त्ता भगिनीपतिः।

Digitized by Google

कप। वत्स ! परिगतपरिगन्तव्य(१)एव भवान् अलमत्यन्तशोकावेगेन।

अश्व। मातुल ! परित्यक्तमेव मया परिदेवनम्,(२) एषोऽहं सुतवत्सलं तातमेवानुगच्छामि।

कप। वत्स ! अनुपपन्नमिदं भवद्विधानाम्।

सूत। कुमार ! अलमतिसाहसेन।

अश्व। आर्य्य ! किमुच्यते।

(३)मद्वियोगभयात्तातः परलोकमितो गतः।
करोमि विरहं तस्य वत्सलस्य कथं पितुः।

कप। वत्स ! यावदयं संसारस्तावत् प्रसिद्धैवेयं लोकयात्रा,(४)यत् पुत्रैः पितरौ लोकद्वयेऽप्य(५) नुवर्त्तनीया इति। पश्य।

---

(१) परिगतं ज्ञातं परिगन्तव्यं वेदनीयं येन तथाभूतोऽतो न किञ्चिदावेद्यते इत्याशयः।

(२) विलापः परिदेवनमित्यमरः।

(३) वत्सलस्य मयि स्निग्धस्य विरहं मया सह वियोगं कथं करिष्ये स्थापयिष्ये न परिहरिष्ये इत्यर्थः।

(४) लोकानां यात्रा समुदाचारेण प्रवृत्तिः।

(५) लोकद्वयमिदंलोकपरलोकौ तत्र अनुवर्त्तनीयाः यथायथं वाक्यपालनश्राद्धादिभिरनुसरणीया आनुकूल्येन सेवनीयाइति यावत्।

Digitized by Google

(१) निवापाञ्जलिदानेन वितानैः श्राद्धकर्म्मभिः ।
तस्योपकारे शक्तस्त्वं किं जीवन् किमुतान्यथा ॥

सूत । आयुष्मन्! यदाह भारद्वतः ।

अश्व । आर्य्य सत्यमेवेदं किन्त्वतिदुर्वहत्वाच्छोकभारस्य न शक्नोमि तातविरहितः क्षणमपि प्राणान् धारयितुं तद्गच्छामि तमेवोद्देशं यत्र तादृशमपि पितरं द्रक्ष्यामि । इत्युत्तिष्ठन् खड्गमालोक्य विचिन्त्य । अलमद्यापि शस्त्रग्रहणविद्यया । सास्रमञ्जलिं बद्धा । भगवन् शस्त्र !

(२) गृहीतं येनासीः परिभवभयान्नोचितमपि
प्रभावाद्यस्यासीन्न खलु तव कश्चिन्नविषयः ।

---

(१) ऐहिकोपकारस्य वाक्यपालनादेर्मृतपितुरसम्भवेन पारलौकिकमेवोपकारं दर्शयति निवापेति पितृदानं निवापः स्यादित्यमरः । निवापस्य पितृदानार्थः योऽञ्जलिः अन्नाद्यञ्जलिः जलाञ्जलि र्वा तस्य दानेन अश्वघास इत्यादिवत् निवापाञ्जल्योः प्रकृतिविकृतिभावविरहेऽपि सम्बन्धविवक्षया षष्ठ्या समासः । केतनैः वृषाङ्कशैलदुर्देशेन त्यक्तमठादिगृहैर्वा आद्धकर्मभिश्च तस्य मृतस्य पितुरुपकारे जीवन् सन् किं शक्तः अन्यथा अजीवने किमुत नैव समर्थइत्यर्थः ।

(२) येन द्रोणाचार्य्येण नोचितमपि अयुक्तमपि नञर्थस्य नञ्शब्दस्य समासस्थेन नानादेशः 'शस्त्रं द्विजातिभिर्ग्राह्यं धर्म्मो यत्रा-

Digitized by Google

परित्यक्तं तेन त्वमसि सुतशोकान्न तु भया
द्विमोक्षे शस्त्रं त्वामहमपि यतः स्वस्ति भवते ॥

इति परित्यक्तुमिच्छति ।

नेपथ्ये । भो भो राजानः कथमिह भवन्तस्त्रभवतः क्षत्रियगुरोर्भारद्वाजस्या(१)सदृशं परिभवमनुना दृष्टद्युम्नेन प्रयुक्तमुपेक्षन्ते ।

अश्व । आकर्ण्य, सक्रोधं शनैः खड्गं स्पृशन् । किं किं गुरोर्भारद्वाजस्य परिभवः ।

पुनर्नेपथ्ये ।

वरुध्यते'' इति स्मृत्या धर्म्मावरोधे एव द्विजातेः शस्त्रधारणस्य विहितत्वेनान्यत्र तद्धारणमनुचितमेवेति भावः । परिभवभयात् शत्रुकृतपराभवभयात् तन्निवारणार्थमेव गृहीतम् 'आततायिन मायान्तं हन्यादेवाविचारयन्' इति 'जिघांसन्तं जिघांसीयादि'ति च स्मृतौ आत्मत्राणार्थमेव शस्त्रधारणं विहितमित्यतएव तद्धृतमित्यर्थः । यस्य प्रभावात् यद्धारणमाहात्म्यात् तव नविषयः अगोचरः कश्चिदपि नासीत् । अत्रापि पूर्ववत् नञ्शब्देन समासः । यतः यस्मात् तेन त्वं परित्यक्तमतः कारणात् अहमपि त्वां विमोक्षे ते स्वस्त्यस्तु भवत्कुशलमस्तु ।

(१) भारद्वाजस्य द्रोणस्य असदृशं परिभवमयोग्यं तिरस्कारं क्रोधाकर्षणरूपं दृष्टद्युम्नेन पापेन धृष्टद्युम्नेन प्रयुक्तं कृतं कथमुपेक्षन्ते औदासीन्येन न प्रतिकुर्व्वन्तीत्यर्थः ।

Digitized by Google

(१) आचार्यस्य त्रिभुवनगुरो र्न्यस्तशस्त्रस्य शोकात्
द्रोणस्याजौ नयनसलिलप्लावितार्द्राननस्य ।
मौलौ पाणिं पलितधवले न्यस्य कृत्वा दृढं वं
दृष्टद्युम्नः खलु विरमयं याति सर्वे सहध्वम् ॥

अत्र । सक्रोधम् । सकम्पञ्च कर्णदुर्योधनौ प्रति । किन्नामेदम् ।

(२) प्रत्यञ्चमाक्तधनुषां मनुजेश्वराणां
प्रायोपवेशसदृशं व्रतमास्थितस्य ।
तातस्य मे पलितमौलि [निरस्तकाशे]
व्यापारितं शिरसि शस्त्रमशस्त्रपाणेः ॥

अत्र । वत्स, एवं किल जनः कथयति ।

---

(१) पलितेन जरसा शुक्लकेशेन धवले मौलौ मस्तके पाणिं न्यस्य याति तत् सहध्वं नेपथ्ये पूर्वोक्तस्य कथमित्यस्यात्राप्यनुषङ्गात् कथं क्षमध्वमित्यर्थः ।

(२) आक्तं व्यूढीतं धनुर्यैस्तेषाम् अनेन प्रतीकारक्षमत्वेऽपि प्रतीकाराकरणमयुक्तमिति सूचितम् । प्रायेण बाहुल्येन मरणार्थमुपवासाय उपवेशनं प्रायोपवेशनं क्रियाराहित्येन च तत्सदृशम् । पलितमौलिना पराजितकाशे अत्र पाठे पलितमौलिनीतिच्छेदः ।

[नि मौलिताशे] क्वचिदित्येव पाठः ।

Digitized by Google

अत्र। किं तातस्य दुरालना परिस्पष्टमभूच्छिरः।

सूत। समयम्। कुमार! आसीदयं तस्य तेजोराशेर्दैवस्य नवः परिभवावतारः।

अत्र। हा तात! हा पुत्रप्रिय! मम मन्दभागधेयस्य कृते अस्मत्परित्यागात्तथाविधेन दुर्दैवेनाला परिभावितः, अथवा,

(१) परित्यक्ते देहे रणशिरसि शोकान्धमनसा,
शिरः श्वा काको वा द्रुपदतनयो वा परिस्पृशेत्।
क्षुरद्दिव्यास्त्रौघद्रुविणमदमत्तस्य च रिपो
र्मयैवायं पादः शिरसि निहितस्तस्य न करः॥

आः दुरालन् पाश्चालापसद!

---

(१) देहे परित्यक्ते परित्यक्तुमारब्धे प्रायोपवेशेन इव निश्चेष्टतया स्थित्वा देहत्यागाय संकल्पकरणाद् देहत्यागारम्भइति बोध्यम्। क्षुरन्ति यानि दिव्यास्त्राणि तेषामोघः समूहएव द्रुविणं धनं तेन यो मदस्तेन मत्तस्य कार्याकार्यविवेकशून्यस्य शिरसि अवमुक्तोलितः पादः निहितः निधातुं क्षिप्तः अथवा अयं भूमौ पादपातनेन तच्छिरसि पातनवत् जीवोऽभिगीतः।

Digitized by Google

(१)तातं शस्त्रग्रहणविमुखं निश्चयेनोपलभ्य
त्यक्त्वा शङ्कां खलु विदधतः पाणिमस्योत्तमाङ्गे ।
अश्वत्थामा करधृतधनुः पाण्डुपाञ्चालसेना
तूलोत्क्षेपप्रलयपवनः किं न यातः सृतिं ते ॥

अहो युधिष्ठिर! युधिष्ठिर! अजातशत्रो! अमिथ्यावादिन् धर्मपुत्र! सानुजस्य ते किमनेनाप्रकृतम्? अथवा किमनेनालीकप्रकृति(२)जिह्मचेतसा, अर्जुन! सात्यके! वार्ष्णेय! वृकोदर! माधव! युक्तं नाम भवतां सुरासुरमनुजलोकैकधनुर्धरस्य द्विजन्मनः परिणतवयसः सर्वाचार्यस्य विशेषतो मम पितुरमुना द्रुपदकुलकलङ्केन मनुजपशुना स्पृश्यमानमुत्तमाङ्गमुपेक्षितुम् अथवा सर्व एवैते पातकिनः किमेतैः ।

---

(१) पाण्डूनां पाण्डुपुत्राणां पाञ्चालानां पञ्चालजनपदराजानाम् उभयत्र तद्राजार्थकतद्धितस्य बह्वृषु लुक् । सेनाएव तूलानि सुखसाध्यत्वात् तेषामुत्क्षेपे उपमर्दने प्रलयवायुः असह्यवेगत्वात् धृतधनुरित्यत्र समासान्तविधेरनित्यत्वान्नानङ् ।

(२) अलीका असत्यप्रधाना या प्रकृतिस्तया जिह्मं कुटिलं चेतो यस्य तादृशेन तथा च सत्यवादिताख्यापनं कूटमात्रं वितथवादिता तु तस्य स्वाभाविकी कथमन्यथा गुरौ द्विजवरे चेदृशासत्यवादिता स्यादिति भावः ।

Digitized by Google

(१) क्षनमनुमतं दृष्टं वा यैरिदं गुरुपातकं
मनुजपशुभिर्निर्मर्य्यादैर्भवद्भिरुदायुधैः।
नरकरिपुणा सार्द्धं तेषां सभीमकिरीटिनाम्
अयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम्॥

कप। वत्स! किन्न सम्भाव्यते भारद्वाजतुल्ये वाङ्मयालिनि दिव्यास्त्रग्राम(२)कोविदे भवति।

अश्व। भो भोः पाण्डवमत्स्यसोमकमागधेयाः! क्षत्रियापसदाः!।

---

(१) गुरुपातकं ब्रह्महत्यारूपं महापातकं न्यस्तशस्त्रतया आततायित्वाभावेन तद्वधे ब्रह्महत्यापातकमवश्यं भवतीत्याशयः। मनुजाः पशवइव कृत्याकृत्यविवेकशून्यत्वात् तैःपशुतुल्यैः नरैरित्यर्थः निर्मर्य्यादैः संग्राममर्य्यादामतिक्रान्तैर्न्यस्तशस्त्रस्य हनने हि युद्धशास्त्रे मर्य्यादातिक्रमः प्रसिद्धः। उदायुधैः उद्धृतशस्त्रैः भवद्भिःसद्भिःशस्त्रधारिभिस्तन्निवारणं कर्त्तव्यं तच्च न कृतं प्रत्युतानुमतमित्यतोऽयेषा एव पापभागिन इति भावः। नरकस्य भूमिपुत्रस्यासुरस्य अतिदुर्ज्जयस्यापि रिपुणा कोशयेन सार्द्धम् तेषां सर्व्वेषाम् अयं धृतास्त्रःअहम् असृङ्मि रक्तानि मेदांसि वपाः मांसानि च तैः दिशां दिग्देवतानां बलिं करोमि ददामीत्यर्थः।

(२) दिव्यास्त्राणां ब्रह्मास्त्रादीनां ग्रामे समूहे कोविदे दक्षे भवति त्वयि।

Digitized by Google

(१) पितुर्मूर्ध्नि सृष्टे ज्वलदनलभास्वत्स्मरशुना
कृतं यद्रामेण श्रुतिमुपगतं तन्न भवताम् ।
किमद्याघ्नत्यामा तदरिरुधिराचारविषमं
न कर्म क्रोधान्धः प्रभवति विधातुं रणमुखे ॥

सूत । गच्छत्वं सर्वोपकरणैः सांग्रामिकैः सर्व्वायुधैरुपेतं महाश्ववलक्षणं नामाङ्कितस्यन्दनमुपनय ।

सूत ! यदाज्ञापयति कुमार इति निष्क्रान्तः ।

कृप । वत्स, अवश्यप्रतिकर्त्तव्येऽस्मिन् दारुणे परिभवाग्नौ सर्व्वेषामस्माकं कोऽन्यस्त्वामन्तरेण शक्तः प्रतिकर्त्तुम् ।

अश्व । किमतः परम् ।

कृप । सैनापत्येऽभिषिक्तं भवन्तमिच्छामि समर भुवमवतारयितुम् ।

अश्व । मातुल ! परतन्त्रमिदमकिञ्चित्करञ्च ।

कृप । वत्स ! न खलु परतन्त्रं नाकिञ्चित्करञ्च पश्य ।

---

(१) अरीणां रुधिराणामाचारः धारया संपातः स एव विषमं प्रीतिकरं यत्र ताडशं तत् पितृतर्पणरूपं कर्म्म रणमुखे विधातुं किमद्य न प्रभवति न शक्नोति अपितु समर्थएव । श्येनभोजनार्थकस्य विषमशब्दस्य तत्सदृशप्रीतिकरे अत्र लाक्षणिकम् ।

Digitized by Google

(१) भवेद्भीष्मद्रोणं धृतराष्ट्रबलं कथम् ।
यदि तत्तुल्यकर्म्माऽत्र भवान् धुर्यो न युज्यते ॥

कृतपरिकरस्य भवादृशस्य त्रैलोक्यमपि न क्षमं परिपन्थीभवितुं, किं पुनर्युधिष्ठिरबलं, तदेवं मन्ये परिकल्पिताभिषेकोपकरणः कौरवराजो नचिराच्चामेवाभ्युदीक्षमाणस्तिष्ठतीति ।

अश्व । यद्येवं त्वरते मे परिभवानलदग्धमानमिदं चेतस्तत्प्रतिकारजलावगाहनाय, तदहं गत्वा तातबधविषण्णमानसं कुरुपतिं सैनापत्य-स्वयंग्रहणप्रणयसमाश्वासनया मन्दसन्तापं करोमि ।

कृप । वत्स ? एवमिदम्, अतस्त्वमेवोद्योगं गच्छावः

इति परिक्रामतः ।

ततः प्रविशतः कर्णदुर्योधनौ ।

दुर्यो । अङ्गराज !

---

(१) तयोस्तुल्यं कर्म्म युद्धकर्म्म यस्य तादृशोभवान् यदि धुर्योभारवाहकतया अत्र सैनापत्ये न युज्यते न नियुज्यते नाभिषिच्यते इत्यर्थः 'धुर्यश्चे धुर्यधौरेयधुरीणाः स्युर्धुरन्धरः' इत्यमरः ।

Digitized by Google

(१)तेजस्वी रिपुहृतबन्धुदुःखपारं,
बाहुभ्यां व्रजति धृतायुधध्रुवाभ्याम् ।
आचार्यः सुतनिधनं निशम्य संख्ये
किं शस्त्रग्रहसमये विशस्त्र आसीत् ।

अथवा सूक्तमिदमभियुक्तैः प्रकृतिर्दुरुत्रजेति, यतः, शोकान्धचेतसा तेन विमुच्य क्षत्रधर्म्मैकार्कश्यं द्विजातिसुलभो मार्दवप्रतिग्रहः कृतः ।

कर्ण । राजन् कौरवेश्वर ! न खल्विदमेवम् ।

दुर्यो । कथं तर्हि ।

कर्ण । एवं किल द्रोणस्याभिप्राय आसीत् यथा अश्वत्थामा मया पृथिवीराज्ये अभिषेक्तव्य

---

(१) रिपुणा हतस्य बान्धवस्य दुःखं तन्नाशजन्यशोकः तदेव सिन्धुरित्यवसेयम् अन्यथा पारोडुपान्वयासम्भवात् । तस्य पारं धृतः आयुधान्येव ध्रुव उडुपः नदीसन्तरसाधनम् भेलेति प्रसिद्धं याभ्यां ताभ्यां बाहुभ्यां व्रजति बाहुबलेनैव अपकर्त्तृ-शत्रोः प्रतीकारं कृत्वा दुःखं मन्दीकरोतीत्यर्थः । उडुपस्तु ध्रुवः कोलङ्कृत्यमरः ।

Digitized by Google

इति तस्याभावाद्दृष्टस्य मे ब्राह्मणस्य(१)तथा शस्त्र ग्रहणमिति तथा कृतवान् ।

दुर्यो। सम्भिरःकम्यम् । एवमिदम् ?

कर्ण। एतदर्थञ्च कौरवपाण्डवपक्षपातप्रवृत्त महासंग्रामस्य(२)राजकस्य परस्परक्षयमुपेक्षमाणेन तेन प्रधानपुरुषवधे उपेक्षा कृता ।

दुर्यो। उपपन्नमिदम् ।

कर्ण। अन्यच्च राजन् द्रुपदेन चास्य बाल्यात् प्रभृति अभिप्रायवेदिना न स्वराष्ट्रे ? वासो दत्तः ।

दुर्यो। साधु अङ्गराज ? निपुणमभिहितम् ।

कर्ण। न चायं ममैकस्याभिप्रायः, अन्येऽमि-युक्ता अपि नैवेदमन्यथा मन्यन्ते ।

---

(१) ब्राह्मणस्येति सम्बन्धे षष्ठी न कर्त्तरि उभयप्राप्तौ कर्मणि (पा० २,३,६६ सू०) कर्म्मण्येव षष्ठीनियमनात् तेन शस्त्रस्यग्रहण-मित्यत्र षष्ठ्या समासः सूपपादः उभयप्राप्तौ कर्म्मण्येव विहित षष्ठ्या कर्म्मणि चेति(पा० २,२, १४ सू०) समासनिषेधात् ।

(२) कौरवपाण्डवपक्षपातेन तदानुकूल्येन प्रवृत्तः संग्रामो यस्य तस्य राजकस्य राजसमूहस्य परस्परक्षयः परस्परेण क्षयो नाशस्तमुपेक्षमाणेन औदासीन्येनाप्रतिकुर्व्वता । तथा च एवं परस्परक्षयेणावशिष्टानां स्वयं जयेन स्वाराज्यसिद्धिर्भविष्यतीति द्रोणाशय इति उद्भावितम् ।

Digitized by Google

दुर्यो। एवमेतत् कः सन्देहः॥

(१)दत्त्वाऽभयं सोऽतिरथो वध्यमानं किरीटिना।
सिन्धुराजमुपेक्षेत नैवं चेत् कथमन्यथा।

कृप। विलोक्य। वत्स! एष दुर्योधनः सूतपुत्रेण सह अस्यां न्यग्रोधच्छायायामुपविष्टस्तिष्ठति तदुपसर्पावः। तथा कृत्वा,

उभौ।। विजयतां विजयतां राजन्।

दुर्यो। दृष्ट्वा। अये कथं कृपोऽश्वत्थामा च। आसनादवतीर्य्य गुरो ऽभिवादये। अश्वत्थामानं प्रति। आचार्य्यपुत्र।

(२)एह्यस्मदर्थकृततात परिष्वजस्व
कान्तैरिदं मम निरन्तरकङ्कटैः।
स्पर्शक्षमैष भुजयोः सदृशः पितुस्ते
श्लोकेऽपि नो विकृतिमेति तनूरुहेषु॥

---

(१) अतिरथो महारथः। एवं यदुक्तप्रकारस्तस्य यद्यभिसन्धिर्न स्यात्तदा कथमुपेक्षेत। अतिरथइति विशेषणेन च तस्य सामर्थ्येऽपि उपेक्षा प्रागुक्ताभिसन्धिसूचिकेति दर्शितम्।

(२) नोऽस्माकं तनूरुहेषु लोमसु विकृतिं हर्षेणोद्गमं रोमाञ्चमिति यावत् श्लोकेऽपीत्यनेन श्लोकाप्रतिरुद्धताकथनेनात्यन्तानन्दहेतुत्वं सूचितम्।

Digitized by Google

आलिङ्ग्य पार्श्वे उपवेशयति ।

अश्व । वाष्पमुत्सृजति ।

कर्ण । द्रौणायने! (१)अलमत्यर्थमात्मानं शोकानले प्रक्षेप्तुम् ।

दुर्यो । आचार्यपुत्र ! को विशेष आवयोरस्मिन् व्यसनार्णवे, पश्य ।

(२)तातस्तव प्रणयवान् स पितुः सखा मे
श्लक्ष्णे यथा तव गुरुः स तथा ममापि ।
किं तस्य देहनिधने कथयामि दुःखं
जानीहि तद्गुरुशुचा मनसा त्वमेव ॥

कर्ण । वत्स, यथाह कुरुपतिस्तथैवैतत् ।

अश्व । राजन् एवं पक्षपातिनि त्वयि युक्तमेव शोकभारं लघूकर्त्तुं, किन्तु,

---

(१) द्रोणस्यापत्यं द्रौणायनिः ।

(२) मम पितुः प्रणयवान् स्नेहवान् सखा मित्रं तेन पितृस्थानीयत्वं सूचितं तेन तातबन्धेन गुर्व्वी शुक् शोको यस्य तादृशेन मनसा त्वं जानीहि परदुःखस्यान्येन प्रत्यक्षयितुमशक्यत्वात् यादृशं शोकवस्त्वमात्मनोऽनुभवसि तादृशं ममाप्यनुमिनु इति भावः ।

Digitized by Google

मयि जीवति मत्तातः केशग्रहमवाप्नवान् ।
कथमन्ये करिष्यन्ति पुत्रेभ्यः(१)पुत्रिणः स्पृहाम् ॥

कर्ण । द्रौणायने ! किमत्र क्रियते यदा तेनैव सर्व्वपरिभवत्राणहेतुना शस्त्रमुत्सृजतैतादृशीमवस्थामात्मा नीतः ।

अश्व । अङ्गराज ! किमाह भवान् किमत्र क्रियते इति । श्रूयतां यत् क्रियते ।

२)यो यः शस्त्रं बिभर्त्ति स्वभुजगुरुबलः पाण्डवीनां चमूनां
यो यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा।
योयस्त्कर्म्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः
क्रोधान्धस्तस्यतस्यस्वयमिहजगतामन्तकस्यान्तकोऽहम्॥

---

(१) पुत्रेभ्यस्त्यत्र स्पृहेरीप्सित (पा० १, ४, ३६, सूत्रेण) संप्रदाने चतुर्थी विद्यमानेन पुत्रेण स्वापमानस्याप्रतीकारे पुत्रिणः पुत्रोत्पादनव्यापारवन्तः। अपुत्रिण इति पाठस्तु समीचीनस्तेन पुत्रवतः पुत्रस्य सिद्धतया सिद्धे इच्छाविरहस्य यौक्तिकतया तत्स्पृहाभावः सिद्ध एवेति कथमित्युक्तिर्नासङ्गतेति बोध्यम् ।

(२) स्वभुजाएव गुरुबलं यस्य बाहुमात्रसहाय इत्यर्थः। पञ्चालगोत्रे पञ्चालजनपदराजवंशे निर्द्धारणे षष्ठी द्वन्द्वः सामासिकस्य चेतिवत् एकत्वेऽपि क्वचित् तस्याः साधुतायाः दृष्टत्वात् अथवा गोत्रस्य गोत्रप्रभृत्यपत्यवर्गवाचितया समूहादिशब्दवत् एकत्वेऽ-

अपिच भो जामदग्न्यशिष्य,(१)कर्ण!
(२)देशःसोयमरातिशोणितजलैर्यस्मिन् ह्रदाः पूरिताः
क्षत्रादेव तथाविधः परिभवस्तातस्य केशग्रहः।
तान्येवाहितशस्त्रघस्मरगुरुक्रोधस्फुलिङ्गानि मे
यद्रामेण कृतं तदेव कुरुते द्रौणायनिः क्रोधनः॥

वङ्कत्वात् निर्द्धारणषष्ठीसम्पादनम्। अधिकवयास्तरुणोऽङ्गस्य पूर्वत्र शिशुरित्युक्तेस्तदधिकवयस्कएवात्राभिप्रेतः। गर्भं शस्त्रेव तां गतः गर्भस्थ इत्यर्थः। तत्कर्म्मणि द्रोणपराभवकर्मणि साक्षी साक्षाद्द्रष्टा प्रतीकारार्थं यत्नाभावेन उदासीनइव स्थितइत्यर्थः। प्रतीपः प्रतिकूलाचारी प्रतिद्वन्द्वीत्यर्थः। जगतामशेषाणाम् अन्यकस्यापि सकललोकोच्छेदनसमर्थस्यापि तस्यतस्याहमन्तकः नाशकः अन्तं करोतीति णिचि ण्वुलि सिद्धम्। इह उदाहरण नामको मुखसन्धिः"उदाहरणम् उत्कर्षयुक्तं वचनमुच्यते"इति दर्पणोक्तेः।

(१) जामदग्न्यकृतस्य पितृपराभवहेतुकक्षत्रियवधस्य स्मारणाय जामदग्न्यशिष्येति सम्बोधनम्।

(२) यः पुराणादौ श्रुतः अयं प्रत्यक्षः कुरुक्षेत्ररूपदेशःयस्मिन् यदेकदेशे समन्तपञ्चकनामके ह्रदाः जलाशया अरातीनां पितृवधकर्तॄणां क्षैहयानां शोणितानि जलानीव तैः पूरिताः भरेरिति पाठे शोणितौघैरिति व्याख्येयम्। क्षत्रादेव तथाविधः पुराणादौ श्रुतजामदग्न्यपितृपराभवप्रकारः पराभवः

दुर्यो । आचार्यपुत्र ! तस्य तथाविधस्यानन्यसाधारणस्य ते वीरभावस्य किमन्यत् सदृशम् ।

कृप । राजन् ! सुमहान् खलु द्रोणपुत्रेण वोढुमध्यवसितः समरभारः । तदहमेवं मन्ये भवता कृतपरिकरोऽयमुच्छेत्तुं लोकत्रयमपि समर्थः किं पुनर्युधिष्ठिरबलम्, अतोऽभिषिच्यतां सैनापत्ये ॥

दुर्यो । सुष्ठु युज्यमानमभिहितं युष्माभिः, किन्तु प्राक् प्रतिपन्नोऽयमर्थोऽङ्गराजस्य ।

कृप । राजन्, असदृशपरिभवशोकसागरे निमज्जन्तमेनमङ्गराजस्यार्थे नैवोपेक्षितुं युक्तम्, अस्यापि च तदेवारिकुलमनुशासनीयम्, अतः किमस्य पीड़ा न भविष्यति ।

कोशग्रहस्तदृग्रहणपूर्वकवधः तान्येव जामदग्न्यादधिगतवतस्तातात् प्राप्तत्वात् अर्हितानां शत्रूणां तद्विच्छिन्नानां शस्त्राणां शस्त्रराणि भक्ष्याणि नियारकाणीत्यर्थः अतएव गुरूणि। आख्याननामालङ्कारः "आख्यानं पूर्ववृत्तोक्तिरि"ति दर्पणोक्तेः । जामदग्न्यकृतपितृहन्तृहैहयवधकथा च महाभारते आदिपर्वणि २ अध्याये स सर्वं चतमुत्सार्थ खवीर्येणानलद्युतिः । समन्तपञ्चके पञ्च चकार रौधिरान् ह्रदानिति ॥ समन्तपञ्चके युद्धं कुरुपाण्डव सेनयोरिति च । तथा तत्रैव सम्भवपर्वणि १०८अध्याये जामदग्न्येन रामेण पितृवधमहत्यता राजा परशुना पूर्वं हैहयाधिपतिर्हत इति अनुसन्धेया ।

Digitized by Google

अश्व। राजन् कौरवेश्वर किमद्यापि युक्तायुक्त-विचारणया।

(१)प्रयत्नपरिबोधितःस्तुतिभिरद्य शेषे निशा
मकेशवमपाण्डवं भुवनमद्य निःसोमकम्।
दृयं परिसमाप्यते रणकथाद्य दोःशालिना
व्यपैतु तृपकाननातिगुरुरद्य भारो भुवः॥

---

(१) शेषे स्वप्स्यसि भविष्यत्यामीप्ये लट्। समरचिन्ताराहित्येन स्वाच्छन्द्यात् निद्राधिक्यं प्राप्स्यसीत्यर्थः। अतएव स्तुतिभिः वन्दिनां स्तवनैः प्रयत्नेन प्रयत्नाधिक्येन गाढनिद्रस्य प्रबोधने प्रयत्नाधिक्यमुचितमेवेति भावः। प्रतिबोधितः निद्राभङ्गं प्रापितः निशामिति अत्यन्तसंयोगे द्वितीया। समस्तां निशां व्याप्येत्यर्थः तेन तृतीयप्रहरे मन्त्रणार्थं निद्राभङ्गो नापेक्षित इति सूचितम्। गाढ निद्राप्राप्तौ हेतुमाह रणकथेति चिन्तनपुरःसररणकर्त्तव्यकार्यावधारणार्थं मन्त्ररूपा कथा। दोःशालिना दोर्भ्यां प्रशस्तबलत्वेन शलते श्लाघते इति दोःशाली बाहुबलवतेत्यर्थः परिसमाप्यते समूलं निवार्य्यते। तत्र हेतुःअकेशवमित्यादि केशवस्य तेषां प्रधान सहायत्वात् तस्य प्राग्निर्देशः निःसोमकं सोमवंशरहितम् तेन सात्यकिप्रभृतीनां तत्सहायानामपि नाशनमुक्तम् भुवोभारहरणार्थमागतस्य केशवस्य वधे तन्न स्यादिति देवानामभीष्टसिद्धि व्याघातइत्याशङ्क्य तदपि स्वयमेव कार्यमित्याह तृपेत्यादि तृपाएव काननानि तैरतिगुरुः।

Digitized by Google

कर्ण। द्रोणात्मज! वक्तुं सुकरमिदमध्यवसितुं दुष्करं, बहवः कौरवबले अस्य कर्मणः भुक्ताः।

अश्व। अङ्गराज एवं बहवः कौरवबले भुक्ताः, किन्तु दुःखोपहतः शोकावेगवशाद् ब्रवीमि, न पुनर्वीरजनाधिक्षेपेण।

कर्ण। मूढ, दुःखितस्याश्रुपातः, कुपितस्य चायुधद्वितीयस्य संग्रामावतरणमुचितं नैवंविधाः प्रलापाः।

अश्व। सक्रोधम्। अरे रे राधागर्भभारभूत! सूतापसद! किमेवमाक्षिपसि।

कर्ण।(१) सूतो वा सूतपुत्रो वा योवा कोवा भवाम्यहम्।
दैवायत्तं कुले जन्म, मदायत्तं तु पौरुषम्॥

अश्व। किमाह भवान् ममापि नामाश्रुत्याक्षो दुःखितस्याश्रुभिः प्रतिक्रियामुपदिशसि न शस्त्रेण पश्य।

---

(१) कुले सत्कुले जन्म दैवायत्तं भाग्याधीनं जात्यायुर्भोगानां कर्मविपाकतयैव शास्त्रे उक्तत्वात्। पौरुषं विक्रमः मदायत्तं न भाग्यायत्तमित्यर्थः।

Digitized by Google

(१)निर्वीर्यं गुरुशापभाषितवशात् किं मे तवेवायुधं
संप्रत्येव भयाद्विहाय समरं प्राप्तोऽसि किं त्वं यथा।
जातोऽहं स्तुतिवंशकीर्त्तनविदां किं सारथीनां कुले
क्षुद्रारातिकृताप्रियं प्रतिकरोम्यस्त्रेण नास्त्रेण किम्॥

कर्णः। सक्रोधम्। अरे रे वाचाट!, वृथाशस्त्र-ग्रहणदुर्विदग्ध!, वटो!।

---

(१) गुरोः परशुरामस्य शापभाषितं शापोक्तिः "क्षत्रोपधावाप्तमिदं तवास्त्रं न कर्म्मकाले प्रतिभास्यति त्वा" मित्युक्तरूपा तद्वशात् तदाख्या किं निर्वीर्यम् प्रभावरहितम् तच्छापाच्च रणभीरुतापि तस्य। सा च कथा महाभारते कर्णपर्व्वणि ४२ अध्यायेऽनुसन्धेया। निजशिष्यात् क्षत्रियात् पराजयं प्राप्य क्षत्रियाय विद्या न देयेति प्रतिज्ञावतः परशुरामस्य समीपे ब्राह्मणत्वेनात्मानं प्रख्याप्य कर्णेन विद्याधिगता तत्समये च एकस्मिन् दिवसे कर्णोरूपधानं कृत्वा सुप्ते रामे कश्चिदसुरूपिणेन्द्रेण तदूरुभेदनेन रुधिरस्य प्रस्रावणेऽपि गुरोर्निद्राभङ्गभियाऽचञ्चलतया स्थितस्य कर्णस्य प्रबुद्धगुरुणा तद्दर्शनेन भेदनसम्भवत्वरणेन क्षत्रियत्वं निर्द्धार्य्य "मिथ्याकथनेनं विद्यामधिजग्मुषः कर्णस्य, विद्या ते कर्मकाले विफला भविष्यतीतिप्रागुक्तशापो दत्तस्त्वेवंरूपा। क्षुद्रः क्षुल्लोऽनायाससाध्यो योऽरातिस्तेन कृतमप्रियमनिष्टं किमस्त्रेण चक्षुर्जलेन प्रतिकरोमि अस्त्रेण किं न, भवत इव मम शापपरिक्षित्येनास्त्राणामवीर्य्यत्वाभावात् अभीरुत्वा स्त्रैरेव तत् प्रतिकारोमीति भावः।

निर्वीर्यं वा सवीर्यं वा भया नोत्सृष्टमायुधम् ।
यथा पाञ्चालभीतेन पित्रा ते बाह्यशालिना ॥

अश्व । सक्रोधम् । अरे रथकारकुलकलङ्क! राधागर्भभारभूत! आयुधानभिज्ञ! तातमध्यधिक्षिपसि, अथवा,

(१)स भीरुः शूरो वा प्रथितभुजसारस्त्रिभुवने
कृतं यत्तेनाजौ प्रतिदिनमियं वेत्ति वसुधा ।
परित्यक्तं शस्त्रं कथमिति स सत्यव्रतधरः
पृथासूनुः साक्षी त्वमसि रणभीरो क्व नु तदा ॥

कर्ण । विहस्य । एवं भीरुरहं, त्वं पुनर्विक्रमैकरसः,(२)तव पितरमनुसृत्य महान् मे संशयो जातः, अपि च ।

---

(१) इयं वसुधा तद्वेत्ति बहूनां राज्ञां बधात् क्रमेण भूमेर्भारोऽपहृत इत्यतो भूमिः भारलाघवेनैव जानातीत्यर्थः अथवा वसुधापदेन तत्स्था लोकालक्ष्यन्ते ते च प्रतिदिनलोकक्षयदर्शनात् तत् कर्म जानन्ति न तु भवान् तदा तव ततः पलायनादिति भावः । शस्त्रत्यागे च यत् कारणं तत् पृथासूनुर्वेत्ति हे रणभीरो ! तदा तस्मिन् त्वं क्व तत्र नैव स्थितः तत्कथं तत्त्यागहेतुं परिज्ञानं ते स्यादित्याशयः ।

(२) अश्वत्थामोक्तमात्मनोभीरुत्वं प्रौढ्याभ्युपेत्य तच्च विक्रमप्रधानतया व्याजेन संस्तुत्य तस्य दुष्टकर्म दर्शयितुमसमर्थतया

Digitized by Google

अरे मूढ !

(१)यदि शस्त्रमुज्झितमशस्त्रपाणयो
न निवारयन्ति किमरीनुदायुधान् ।
यदनेन मौलिदलनेऽप्युदासितं
सुचिरं स्त्रियेव नृपचक्रसन्निधौ ॥

अन्व । सक्रोधं सकम्पञ्च । दुरात्मन् राजवल्लभ ! प्रगल्भ ! सूतापसद ! असम्बन्धप्रलापिन् ।

(२)कथमपि न निषिद्धो दुःखिना भीरुणा वा
द्रुपदतनयपाणिस्पर्शेन पित्रा ममाद्य ।
तव भुजबलदर्पाध्मायमानस्य वामः
शिरसि चरण एष न्यस्यते वारयैनम् ॥

तत्पितुर्वक्ष्यमाणं कर्म दुष्टतया उद्भाव्य तं निन्दति तव पितरमिति पितरं वक्ष्यमाणकर्म कुर्वाणमित्यादि । संशयः निवारणासामर्थ्येन भयेन शोकेन वा उदासितमित्येवं रूपः सन्देहः ।

(१) वीरैः शस्त्रमुज्झितं त्यक्तं तथापि किमशस्त्रपाणयोऽपि बाहुबलेनापि उदायुधान् उद्धृतास्त्रानरीन् न निवारयन्ति अपि तु निवारयन्त्येव तदनिवारणेन राजसमूहसन्निधौ स्त्रियेव भीतेन कातरेण असमर्थेन वा यदुदासितं तत् किंहेतुकमिति संशयः तथाच बाहुबलशालित्वेऽवश्यमेव निवारयेदतस्तस्य बाहुबलं नासीदिति भावः । एतेनात्मनो शूरम्मन्येनास्त्रवीर्याभावेऽपि बाहुबलशालित्वं सूचितम् ।

(२) आत्मनो भुजबलसूचनेन गर्वितं कर्णं प्रति तदुक्त्वा-

Digitized by Google

इति तथा कर्त्तुमुत्तिष्ठति ।

कपटुर्योधनौ । गुरुपुत्र, मर्षय, मर्षय इति निवारयतः

अश्व । चरणप्रहारम् नाटयति ।

कर्ण । सक्रोधमुत्थाय खड्गमाकृष्य । अरे दुरात्मन् ब्राह्मबन्धो आत्मश्लाघिन् !

(१)जात्या काममबध्योऽसि चरणं त्विदमुद्धृतम् ।
अनेन लूनं खड्गेन पतितं वेत्स्यसि क्षितौ ॥

अश्व । अरे मूढ । जात्या चेदबध्योऽहम् इयं सा जातिः परित्यक्ता । इति यज्ञोपवीतं छिनत्ति पुनश्च सक्रोधम् ।

व्यस्योत्तरं ददत् तदपमानसूचकं वामपादनिक्षेपमभिनयन्नाह भुजबलेन यो दर्पलेन ध्मायमानस्य विकत्थमानस्य तव शिरसि अयमुत्तोलितः वामः पुंसः सव्यवातीवापकृष्टः न तु दक्षिणः पादोनिक्षिप्यते करस्तु नैवेत्यर्थः ।

(१) जात्या ब्राह्मण्येन कामं तावत् अबध्यो न चेत् खड्गेन बध्यसे इत्यर्थः । अतो येनाङ्गेनापराद्धोऽसि तदङ्गमेव च्छिद्यते इत्याह उद्धृतमिदं चरणं खड्गेन लूनं च्छितौ पतितमेव वेत्स्यसि नादौ लघुहस्तत्वात् भवतोऽप्रतिकार्य्यत्वाच्च तद्वेदने ऽपि न प्रतिषेधो भविष्यतीत्याशयः ।

Digitized by Google

(१)अद्य मिथ्याप्रतिज्ञोऽसौ किरीटी क्रियते मया ।
शस्त्रं गृहाण वा त्यक्त्वा मौलौ वा रचयाञ्जलिम् ॥

उभावपि खड्गमालम्ब्य अन्योन्यं प्रहर्त्तुमुद्यतौ कृपदुर्य्योधनौ निवारयतः ।

दुर्य्यो । आचार्य्यपुत्र ! शस्त्रग्रहणेनालम् ।

कृप । वत्स सूतपुत्र शस्त्रग्रहणेनालम् ।

अश्व । मातुल! मातुल! किं निवारयसि अयमपि तातनिन्दाप्रगल्भः सूतापसदो धृष्टद्युम्नपक्षपात्येव ।(२)

कर्ण । राजन् न खल्वहं निवारयितव्यः ।

(३)उपेक्षितानां मन्दानां धीरसत्त्वैरवज्ञया ।
आत्मश्लाघाविकत्थना ॥

---

(१) किरिटी अर्जुनः मिथ्याप्रतिज्ञः विफलीभूता तव बध रूपाप्रतिज्ञा यस्य तथा क्रियते तव बधेन तस्य प्रतिज्ञायाः वैफल्यं सम्पाद्यते इति भावः । शस्त्रं युद्धार्थं गृहाण अथवा शस्त्रं त्यक्त्वा मौलौ अञ्जलिं विनयाञ्जलिं गृहाण नो चेद्वधइत्याशयः।

(२) धृष्टद्युम्नपक्षपाती तत्स्थानीयः तातनिन्दकत्वात् ।

(३) धीरसत्त्वैः धीरप्रकृतिभिरवज्ञया उपेक्षितानां मन्दानां खलबलानामपि एषा एवंविधा विकत्थना आत्मश्लाघा भवति ततोऽयं शासनीयइति भावः ।

Digitized by Google

अश्व। राजन् मुञ्चमुञ्चैनमासादयतु मङ्गुलान्त रनिष्पेषसुलभमस्तूनामवसादनम् अन्यच्च राजन् स्नेहेन कार्य्येण वा त्वमेनं तातधिक्षेपकारिणं दुरात्मानं मत्तः परिरक्षितुमिच्छसि तदुभयमपि(१) वृथैव पश्य।

(२)पापप्रियस्तव कथं गुणिनः सहायः
सूतात्मजः प्रमथराज्वयसम्भवस्य।
हन्ता किरीटिनमयं वृप मुञ्च कुर्य्यां
क्रीधादकर्णमपृथात्मजमद्य लोकम्॥

इति प्रहर्त्तुमिच्छति।

कर्ण। खड्गमुद्यम्य। अरे वाचाट ब्राह्मणाधम, एवं न भवसि। राजन् मुञ्च मुञ्च न खल्वहं वारयितव्यः। इति हन्तुमिच्छति।

दुर्योधन कृपौ। निवारयतः।

---

(१) एतद्विषयः स्नेहः एतत्कृतकार्य्यानुरोधित्वञ्चेत्युभयमपि वृथा निष्फलम्।

(२) आदौ असदृशत्वादस्मिन् स्नेहएव तवानुचित इत्युक्त्वा पश्चात् कार्य्यानुरोधित्वमपि निरस्यति अकर्णमपृथात्मजम् एतेन चिकीर्षितपृथात्मजवधस्य मयैव सम्पादनीयतया तदर्थमेतदनुरोधो वृथेति यत् प्रागुक्तं तत् समर्थितमिति बोध्यम्।

Digitized by Google

दुर्यो। कर्ण! गुरुपुत्र! कोऽयमद्य युवयोर्व्यामोहः।

कृप। वत्स! अन्यदेव(१)प्रस्तुतमन्यत्रावेग इति कोऽयं व्यामोहः स्वबलव्यसनं चेदमस्मिन् काले राजकुलस्यास्य युष्मत्त एवभवतीति वामः पन्थाः॥

अश्व। मातुल! न लभ्यते ऽस्य कटुप्रलापिनो रथकारकुलकलङ्कस्य दर्पः प्रादयितुम्।

कृप। वत्स अकालः खलु स्वबलप्रधानविरोधस्य।

अश्व। मातुल यद्येवम्।

(२)अयं पापो यावन्न निधनमुपेयादरिशरैः
परित्यक्तं तावत् प्रियमपि मयास्त्रं रणमुखे।
बलानां नाथेऽस्मिन् परिकुपितभीमार्ज्जुनभवे
समुत्पन्ने राजा प्रियसखमसुं वेत्तु समरे॥

इति खड्गमुत्क्षिपति।

---

(१) अन्यदेव पाञ्चालादिहननादि प्रस्तुतं विधीयितं मन्यत्र स्वबलविरोधएवावेग आसक्तिः अस्मिन् समये स्वबलयोः परस्परविरोधरूपं यद्व्यसनं तत् युष्मत्तः भवतो भवतीति पन्थाः उपायः वामः प्रतिकूलः।

(२) अस्मिन् कर्णे सेनापतौ सति परिकुपितभीमार्ज्जुनभवे जाते असुं प्रियसखं मां तदा वेत्तु पश्चात्तापेन अनिष्टवारणाय वा स्मरतु।

Digitized by Google

कर्ण । विहस्य । अपरित्यक्तमपि भवादृशैरायुधं ननु चिरपरित्यक्तमेव निष्फलत्वात् ।

(१)धृतायुधो यावदहं तावदन्यैः किमायुधैः ।
यद्वा न सिद्धमस्त्रेण मम तत् केन सेत्स्यति ॥

नेपथ्ये । आः दुरात्मन् द्रौपदीकेशाम्बरकर्षण! महापातकिन् धार्त्तराष्ट्रापसद! चिरस्य खलु कालस्य मत्समुखमागतोऽसि अरे क्षुद्रपशो! क्वेदानीं गम्यते। अपि च भो भो राधेयदुर्य्योधनसौबलप्रभृतयः पाण्डवविद्वेषिणश्चापपाणयो मानधनाः शृण्वन्तु भवन्तः ।

(२)स्पृष्टा येन शिरोरुहे नृपशुना पाञ्चालराजात्मजा
येनास्याः परिधानमप्यपहृतं राज्ञां गुरूणां पुरः ।
यस्योरःस्थलशोणितासवमहं पातुं प्रतिज्ञातवान्
सोऽयं भङ्गजपञ्जरे निपतितः संरच्यतां कौरवाः ॥

---

(१) यावदहं धृतायुधस्तावदन्यैरन्यधृतैः आयुधैः किं प्रयोजनं यन्मामस्त्रेण न सिद्धं तदन्यास्त्रेण कथं सेत्स्यति अपि तु नैवेत्यर्थः ।

(२) नापशुरिव अकृत्यस्य परस्त्रीधर्षणस्य कारकत्वात् राज्ञां गुरूणाञ्च भीष्मादीनां पुरोऽग्रे परिधानं वस्त्रमपहृतं गुरुसन्निधाने क्रीड़ाकरकार्य्यकरणमत्यन्तानुचितमिति भावः । भुजौ पञ्जरमिव बन्धनहेतुत्वात् तत्र निपतितः प्राप्तः कौरवाः संरच्यतामिति साहङ्कारोक्तिरेषा ।

Digitized by Google

सर्वे आकर्णयन्ति ।

अश्व । अङ्गराज! सेनापते! जामदग्न्यशिष्य!(१) द्रोणोपहासिन्! भुजबलपरिरक्षितसकललोक ! धृतायुध इति पठित्वा दूरं तदासन्नतरमेव संवृत्तं रथैनं सम्प्रतं भीमादुद्दुःशासनम् ।

कर्ण । आः का शक्तिर्वृकोदरस्य मयि जीवति युवराजस्य च्छायामप्याक्रमितुं । मयुवराज न भेतव्यं न भेतव्यमयमहमागतोऽस्मि इति निष्क्रान्तः ।

अश्व । राजन् कौरवनाथ अभीष्मद्रोणं सम्प्रति कौरवबलमालोड़यन्तौ भीमार्जुनौ राधेयेनैवंविधेनान्येन वा न शक्यते निवारयितुम् अतः स्वयमेव भ्रातुः प्रतीकारपरो भव ।

दुर्यो । आः का शक्तिः दुरात्मनः पवनतनयस्यान्यस्य वा मयि जीवति शस्त्रपाणौ वत्सस्य च्छायामप्याक्रमितुम् वत्स! न भेतव्यं न भेतव्यं कः कोऽत्र भोः रथमुपनय । इतिनिष्क्रान्तः ।

---

(१) जामदग्न्यशिष्यत्वेन स्पर्द्धमानः द्रोणमधिक्षीपसीति द्योतयन् क्रमेण सम्बोधनद्वयम् सेनापते इत्यनेन असमर्थस्य भवत स्तत्कर्मणि अभिषेकादयोग्यपदप्राप्तत्वेन गर्वितत्वं द्योतितम् भुजबलेत्यादिविशेषणं धृतायुधइत्यादिना यदात्मनो गुणश्लाघा कृता तस्या अयथातथ्यं द्योतकोपहासपरम् ।

Digitized by Google

नेपथ्ये। कलकलः।

चत्र। अपतो विलोक्य। मातुल हा धिक् कष्टम्! एष खलु भ्रातुः प्रतिज्ञाभङ्गभीरुः किरीटी समं दुर्य्योधनराधेयौ शरवर्षैर्दुर्व्वारैरभिद्रवति, हा कष्टं! सर्व्वथा पीतं दुःशासनशोणितं भीमेन, न खलु विपक्षे दुर्य्योधनानुजस्यैनां विपत्तिमवलोकयितुम्, अद्दतमनुमतं नाम, मातुल! शस्त्रं शस्त्रम्।

(१)सत्या दृष्टतं श्रेयो धिक् स्वर्गं नरकोऽस्तु मे॥
भीमाद्दुःशासनं भ्रातुं त्यक्तमत्यक्तमायुधम्॥

इति खड्गं गृहीतुमिच्छति।

नेपथ्ये। महात्मन् भारद्वाजसूनो! न खलु सत्यवचनमनुल्लङ्घितपूर्व्वमुल्लङ्घयितुमर्हसि।

उभौ। वत्स, अशरीरिणी वाणी भवन्तमद्दतादभिरक्षति।

---

(१) शस्त्रपरित्यागः प्रतिज्ञातस्यास्य चरणोऽसत्यमाशङ्क्य असत्यकार्य्यं नरकमपेक्ष्य दुःशासनवधजन्यदुःखमधिकमन्यमान आह सत्यादप्यद्दतमिति त्यक्तं कृतवा प्रतिज्ञया मुक्तमायुधं दुःशासनं भीमाद्दृष्टिमत्यक्तं पुनर्गृहीतमस्त्रं इत्यर्थः।

Digitized by Google

अश्व। कथमियममानुषी वाग् नानुमनुते संग्रामावतरणं मे, भोः कष्टम्। आः पक्षपातिनो देवा अपि पाण्डवानाम्। सर्व्वथा पीतं दुःशासनशोणितं भीमेन, भोः कष्टम्।

दुःशासनस्य रुधिरे पीयमानेऽप्युदासितम्।
दुर्य्योधनस्य कर्त्तारि किमन्यत् प्रियमाहवे॥

मातुल! राधेयक्रोधवशादनार्य्यमस्माभिराचरितम् अतस्त्वमपि तावदस्य राज्ञः पार्श्वपरिवर्त्ती भव।

कृप। गच्छाम्यहमत्र प्रतिविधातुं, भवानपि शिविरसन्निवेशमेव प्रतिष्ठताम्।

उभौ परिक्रम्य निष्क्रान्तौ।

इतिषष्ठीयोऽङ्कः।

इति श्रीतारानाथतर्कवाचस्पति भट्टाचार्य्य
विरचिते वेणीसंहारनाटक व्याख्याने
अश्वत्थामनामकषष्ठीयाङ्कव्याख्या।

Digitized by Google

अथ चतुर्थोऽङ्कः ।



ततः प्रविशति प्रहारमूर्च्छितं रथस्थं दुर्योधनमपहरन् सूतः ।

सूत । ससंभ्रमम् परिक्रामति ।

नेपथ्ये । भो भो बाहुबलावलेपप्रवर्त्तितमहासमरदोहदाः कौरवपक्षपातपणीकृतप्राण(१) द्रविणसञ्चया नरपतयः संस्तभ्यन्तां, हृतदुःशासनपीतावशेषशोणितस्नपितबीभत्सवेषभृकोदरदर्शनविषादपरिस्खलत्प्रहरणानि रणात् प्रद्रवन्ति बलानि ।

सूत । विलोक्य । कथमेष धवलचपलचामरचुम्बितकनककमण्डलुना शिखरावनद्धवैजयन्तीसूचितेन हृतगजवाजिनरकलेवरसहस्रसंमर्दविषमोद्खातक्षतकलकलकिङ्किणीजालमालिना रथेन शरवर्षस्तम्भितपरबलपराक्रमप्रद्रुतमात्मबलमाश्वासयन् कृपः किरीटिनाभियुक्तमङ्गराजमनुसरति । हन्त जातमस्माकलानामवलम्बनम् ।

---

(१) कौरवपक्षपातेन तत्स्नेहेन तत्साहाय्येन तदर्थमिति यावत् पणीकृतः प्राणएव द्रविणसञ्चयो यैः यथा द्यूतादौ द्रविणसञ्चयः पणीक्रियते एवं रणद्यूते तैः प्राणएव पणीकृत इत्यर्थः ।

Digitized by Google

नेपथ्ये । कलकलानन्तरम् ।

भीम । भो भो अस्मद्दर्शनभयस्खलितकार्मुकक्षत्रियातोमरशक्तयः कौरवचमूभटाः पाण्डवपक्षपातिनश्च योधाः न भेतव्यम् न भेतव्यम्, अयमहं निहतदुःशासनपीवरोरःस्थलच्छतजासवपानमदोद्धतो रभसगामी स्खलावशिष्टप्रतिज्ञामहोत्सवः(१)कौरवराजस्य द्यूतनिर्जितो(२)दासः पार्थमध्यमो भीमसेनः सर्व्वान् भवतः साक्षीकरोमि श्रूयताम् ।

(३)राज्ञोमानधनस्य कार्मुकभृतो दुर्य्योधनस्याग्रतः
प्रत्यक्षं कुरुबान्धवस्य च तथा कर्णस्य भृत्यस्य च ।
पीतं तस्य मयाद्य पाण्डववधूकेशाम्बराकर्षिणः
कोष्णं जीवतएव तीक्ष्णकरजक्षुण्णादसृग् वक्षसः ॥

---

(१) स्खलमवशिष्टा दुर्य्योधनोरुभङ्गरूपा या प्रतिज्ञा तया महत्सवो यस्य प्रतिज्ञाया स्खलावशिष्टत्वात् जातानन्दसन्दोह इत्यर्थः ।

(२) द्यूतेन निर्जितःअतएव दासः दासत्वेन पूर्व्वमुपहसित इत्युक्त्या च अपकारस्मारणम् अयमित्यनेन दुःशासनोरःस्थलच्छतजासवपानेनात्मनो मत्तता ख्यापिता ।

(३) राज्ञः इति मानधनस्येति कार्मुकभृत इति च विशेषणत्रयेण राज्ञोऽपमानोऽतीव दुःसहः विशेषतः मानधनस्य तत्रापि चापधारित्वेऽपि प्रतीकाराक्षमत्वमित्येदपि अपञ्चानायैवेति रुचि

हूत श्रुत्वा, सभयम्। अये आसन्न एष दुरात्मा कौरवराजपुत्रमहावनोत्पातमारुतः, अनुपलब्धसंज्ञश्च तावदत्र महाराजः, भवतु सुदूरमपनयामि स्यन्दनम्, कदाचित् दुःशासन दृष्वाप्यनन्यनार्यो ऽनार्यमाचरिष्यति। त्वरितं परिक्रम्यावलोक्य च। अये अयमसौ सरसीसरोजविलोलनग्रीतलसुरभि(१)मातरिश्वसंवाहितसान्द्रकिसलयो न्यग्रोधपादपः, उचिता विश्रामभूरियं समरव्यापारखिन्नस्य वीरजनस्य। अतस्थश्चायमयत्नोपवीजितताल(२)वृन्तेन हरिच-

---

तम्। यस्य बलाश्रयणेन यस्य च मन्त्रणेनास्मद्विरोधिता कृता तयोः कर्णसौबलयोरपि समत्वं तत्रापि कुरुबान्धवस्य कार्मुकभृत इति च विशेषणं योज्यम्। तत्र कर्णपक्षे कुरूणां मित्रस्येत्यर्थः। शकुनिपक्षे बन्धुशब्दस्य पितृमात्रवाचकतया तत्सबन्धित्वात् बान्धवस्य मातुलस्येत्यर्थः। तीक्ष्णैः करजैरङ्गुल्यग्रैर्नान्यसाधनापेक्षैरभिभावः क्षुण्णात् जीवत एव तस्य वक्षसः कोष्णं रुधिरं पीतम्।

(१) सरस्याविलोलनेन ग्रीतलः सरोजस्य विलोलनेन च सुरभिः इति यथाक्रममन्वयो बोध्यः। तादृशप्रभातमारुतेन वाहितः चालितः सान्द्रः निरन्तरः किसलयो यस्य।

(२) अयत्नेन प्रयत्नं विनापि अनायासेनेत्यर्थः। अयत्नम् अयत्नसाध्यं वा यदुपवीजितं व्यजनचालनादि तदेव तालवृन्तमिव व्यजनकार्यमिव यस्य।

Digitized by Google

न्दनच्छटाशीतलेनाप्रयत्नसुरभिणा दशापरिणाम१ योग्येन सरसीसमीरणेन च विगतक्लमोभविष्यति महाराजः। लूनकेतुश्चायं रथोऽनिवारित एव प्रवेक्ष्यति च्छायामिति। प्रवेश्य रूपयित्वा। कः कोऽत्र। समन्तादवलोक्य। कथं न कश्चित्, परिजनः। नूनं तथाविधस्य दृकोदरस्य दर्शनादेवंविधस्य च स्वामिनस्त्रासेन(२) शिविरसन्निवेशमेव प्रविष्टः,(३) भोः कष्टम् कष्टम्।

४)दत्त्वा द्रोणेन पार्थादभयमपि न संरक्षितःसिन्धुराजः क्रूरं दुःशासनेऽस्मिन् हरिण इव हतं भीमसेनेन कर्म। दुःसाध्याभप्यरीणां लघुमिव समरे पूरयित्वा प्रतिज्ञां नाहं मन्ये सकामं कुरुकुलविमुखं दैवमेतावतापि॥

---

(१) दशायाअवस्थाया मूर्च्छावस्थाया इति यावत् परिणाम अन्यथाभावस्तच्छान्तिरिति यावत् तत्र योग्येन समर्थेन।

(२) एवंविधस्य मूर्च्छां गतस्य स्वामिनस्त्रासेन जीविष्यति नवेति संशयेन अतएव भीत्यर्थत्वाभावाद्न पञ्चमी।

(३)प्रविष्टइति कर्त्तरि क्तः परिजनविशेषणम्।

(४) अभयं दत्त्वा पार्थादभयं नास्तीति अभयं प्रदर्श्य पार्थात् सिन्धुराजो जयद्रथो न रक्षितः एवञ्च कुरुबलहानिः। भीमेन हरिणइव अनायासवध्यत्वात् स्वगतत्वे अस्मिन्

Digitized by Google

राजानमवलोक्य। कथमद्यापि न चेतनामुपलभते महाराजः, भो कष्टम्। निश्वस्य।

(१)मदकलितकरेणुभज्यमाने
विपिन इव प्रकटैकशालशेषे।
हतसकलकुमारके कुलेऽस्मिं
स्वमसि विधेरवलोकितः कटाक्षैः॥
ननु भो हतविधे! भरतकुलविमुख।

दुःशासने क्रूरं कर्म्म वक्षःस्थलविदारणपूर्व्वकरुधिरपानं कर्म्म अरीणां अत्येतीति शेषः दुःसाध्यामपि प्रतिज्ञां लघुमिव पूरयित्वा तादृशं कर्म कृतमित्यन्वयः कुरुकुलविमुखं तत्प्रतिकूलं दैवं नियतिः एतावताऽपि दुःशासनवधपर्य्यन्तकरणेनापि सकामम् सम्पूर्ण मनोमथं न इत्यहं मन्ये इत्युत्प्रेक्षे नो चेत् राज्ञः कथमीदृशी दशेति भावः।

(१) मदेन कलितः मत्तः करेणुः करिशावकः भीमसेनरूपः तेन भज्यमाने प्रकटः स्पष्टएक एव शालो वृक्षः शेषो यत्र तादृशे हतसकलकुमाररूपवृक्षसमूहे विपिनइव अस्मिन् कुले अर्थात् वर्त्तमानस्थे विधेः कुरुकुलविमुखभाग्यस्य कटाक्षैरवलोकितः मया विमुखत्वेऽवलम्बितेऽपि कथमयमेकोऽपीदानीम् शिष्यते इति बुद्ध्या दृष्ट इत्यर्थः। त्वमिति दर्शनात् महाराजसम्बोधनकमेवैतद्वाक्यमिति बोध्यम्।

Digitized by Google

(१)अक्षतस्य गदापाणेरनारूढस्य संशयम् ।
एषापि भीमसेनस्य प्रतिज्ञा पूर्य्यते त्वया ॥

दुर्यो। अनैरुपलब्धसङ्गः आः का शक्तिरस्ति पवनतनयस्य वृकोदरस्य मयि जीवति दुर्य्योधने प्रतिज्ञां पूरयितुं,(२)वत्स! दुःशासन! न भेतव्यं न भेतव्यम्, अयमहमागतोऽस्मि, सूत! प्रापय रथं तमुद्देशं यत्र वत्सो दुःशासनस्तिष्ठति ।

सूत। आयुष्मन् अक्षमाः सम्प्रति वाहास्ते रथमुद्वोढुम्, । अवमार्य्य। [वयञ्च] ।

दुर्यो। रथादवतीर्य्य सगर्वं साकूतञ्च। किं स्यन्दनगमनकालातिपातेन ।

---

(१) भीमेन ऊरुभङ्गार्थं युद्धकरणे उभयोश्च युद्धे भीमस्य शरीरक्षतादिकं जीवनं भवेत् न वेति संशयम् संशयगोचरतामनारूढस्याप्राप्तस्य, दुर्योधनस्य गदायुद्धे नैपुण्यात् भीमस्य जीवने । अवश्यमेव संशयो भवेदिति सूचितम् । एषा ऊरुभङ्गफलीभूता बधरूपा प्रतिज्ञा पूर्य्यते पूर्त्तिं प्राप्यते इति ।

(१) सूतपठितश्लोकशब्दस्य प्रतिज्ञा पूर्य्यते इति भागस्यो द्यारणसमये लब्धसंज्ञतया तच्छ्रवणे दुःशासनोरःस्थलासव पानप्रतिज्ञापूरणपरतां मत्वा तत्प्रतीकारार्थमुद्यतस्य राज्ञः का शक्तिः प्रतिज्ञां पूरयितुमित्युक्तिरिति बोध्यम् ।

सूत । सवैलक्ष्यं सकरुणञ्च । मर्षयतु आयुष्मान् ।

दुर्यो । धिक् सूत । किं रथेन, केवलमरातिविमर्द-संघट्टसञ्चारी दुर्योधनः खल्वहं, तद्गदामात्रसहायः समरभुवमवतरामि ।

सूत । आयुष्मन् एवमेतत् कः सन्देहः ।

दुर्यो । यद्येवं किमेवं भाषसे । पश्य,

(१) बालस्य मे प्रकृतिदुर्ललितस्य पापः,
पापं व्यवस्यति समक्षमुदायुधोऽसौ ।
अस्मिन्निवारयसि किं व्यवसायिनं मां
क्रोधो न, नापि करुणा, न च तेऽस्ति लज्जा ॥

सूत । सकरुणं पादयोर्निपत्य । एतद्विज्ञापयामि आयुष्मन् सम्पूर्णप्रतिज्ञेन निकृत्तेन भवितव्यमिदानीं दुरात्मना वृकोदरहतकेन अत एवं ब्रवीमि ।

---

(१) बालस्य अतएव प्रकृत्या रूक्षभावेन चञ्चलस्य दुष्टत्वेन द्रौपदीकेशाम्बराकर्षणादिकं बालभावादेव कृतमिति सूचितम् मे समक्षम् पापः उदायुधः सन् पापं वक्षःस्थलविदारणरूप व्यवस्यति करोति अस्मिन् विषये एतत्प्रतीकाराय व्यवसायिनं कृतोद्यमं मां निवारयसि अत्र ते तव क्रोधो न, शत्रुधर्षणेऽपि क्रोधाभावः, करुणा न, परदुःखप्रहरणेच्छाभावः । लज्जा न, शत्रुणा समक्षं प्रतिज्ञा पूर्यते तत् सहनादपमानाबोधाच्च न लज्जेत्याशयः ।

Digitized by Google

दुर्यो । सहसा भूमौ पतन् । हा! वत्स! दुःशासन!, हा मदाज्ञाविरोधितपाण्डव!, हा विक्रमैकरस!, हा मदङ्कदुर्ललित!(१) हा अरातिकुलगजघटासिंहेन्द्र! हा युवराज! क्वासि प्रयच्छ मे प्रतिवचनं ।

इति निश्चेष्ट मोहमुपगतः ।

सूत । राजन् समाश्वसिहि समाश्वसिहि ।

दुर्यो । संज्ञां लब्धा निश्चेष्ट ।

(२) युक्तोयथेष्टमुपभोगसुखेषु नैव
त्वं लालितोऽपि हि मया न वृथाग्रजेन ।
अस्यास्तु वत्स तव हेतुरहं विपत्ते
र्यत् कारितोऽस्यविनयं नच रक्षितोऽसि ॥

इति पतति ।

---

(१) मदङ्के दुर्ललितं चाञ्चल्यरूपं चेष्टा यस्य ।

(२) उपभोगसुखेषु भोजनाच्छादनादिसम्भोगजनकव्यापारेषु न लालितः न पालितः अतएव मयि वृथाग्रजत्वम् । अस्याः भीमसेनकृतवञ्चोविदारणरूपाया विपत्तेः अहमेव हेतुः द्रौपद्याः केशाम्बरकर्षणादेर्मदाज्ञयैव कृतत्वात् । अविनयं द्रौपदीकेशग्रहादिरूपं कारितः त्वत्कृतापकारप्रतीकर्त्तुर्भीमात् न च रक्षितः ।

Digitized by Google

सूत । आयुष्मन् समाश्वसिहि ।

दुर्यो । धिक् सूत किमनुष्ठितं भवता ।

(१) रक्षणीयेन सततं बालेनाज्ञानुवर्त्तिना ।
दुःशासनेन भ्रात्राहमुपहारेण रक्षितः ॥

सूत । महाराज! मर्म्मभेदिभिरिषुतोमरशक्ति-प्रासवर्षैर्महारथानामपहृतचेतनत्वान्निश्चेतनः कृतो महाराज दूत्यमपहृतो मया रथः ।

दुर्यो । सूत! विरूपं कृतवानसि,

(२) तस्यैव पाण्डवपशोरनुजद्विषो मे
*चोदैर्गदाग्निकृतैर्न विबोधितोऽस्मि ।
यद्येव नाधिशयितो रुधिरार्द्रशय्यां
दौःशासनीं यदहमद्य वृकोदरो वा ॥

---

(१) देवादिभ्यः अनिष्टनिवारणार्थं दीयमानो बल्यादि-रूपहार स्तथाच भीमाय एतादृशं भ्रातरमुपहारत्वेन दत्त्वाऽहं रक्षितः इत्यनुचितं कृतमित्यर्थः ।

(२) ममानुजद्विषस्तस्य गदारूपवज्रकृतैः चोदैर्निष्पेषैस्तत्कृत-ध्वनिभिरेवेत्यर्थः ।

* चोभैरिति पाठे तत्कृतनोदनैः । यदि यस्मात् रणभूमितोऽपवाहनात् हेतोः न विबोधितोऽस्मि अनपयाहे तु उक्तहेतुभिरवश्यं बोधितः स्यामित्यर्थः । यद्येव पाठस्तु समीचीनः हि यस्मात् यद्न विबोधितोऽस्मीत्यर्थः । यच्च प्रागुक्तहे

निःश्वस्य ननोविलोक्य । ननु भो हतविधे! कृपावि-
रहित! भरतकुलविमुख!

(१)अपि नाम भवेन्मृत्युर्न च हन्ता दकोदरः ।

सूत । शान्तं पापं, महाराज! किमिदम् ।

दुर्यो । घातिताशेषबन्धो मे किं राज्येन जयेन वा॥

ततः प्रविशति सप्रहारः पुरुषः ।

पुरुषः । अज्जा अवि णाम दूमस्सिं उद्देसे सा-
रहिदुइओ दिट्ठो तुह्मेहिं महाराअदुज्जोहणो
ण वेत्ति । कहं ण कोवि मन्तेदि, होदु, बद्धपरि-
अराणं पुरिसाणं समूहो दीसद् एत्थ गदुअ पुच्छिअ

तोरेव दौःशासनीं तद्ग्रहीतां रुधिरार्द्रश्यामहं दकोदरो वा अद्यैव नाधिशयितः अनपवाहने तु अहैतुभिः बोधितः सन् भीमेन सह युध्यमानेन हतः अहमथवा मया हतो दकोदरो वा तामधिशयितः स्यादित्यर्थः । एवञ्च एतद्हृदयं यन्न संभूतं तत्रा पवाहनमेव हेतुरतोविरूपताकरणं यदुक्तं तत्समर्थितम् ।

(४)यथेष्टं मूर्च्छाशोकरोगादिना मृत्युर्भवेदपि न तु दकोदरहस्तात् मरणं भवेदित्याशयः।

र्थ्याः ! अपि नाम अस्मिन्नुद्देशे सारथिद्वितीयो दृष्टो युधा भिः दुराजदुर्योधनो नवेति । कथं न कोऽपि मन्त्रयते, भवतु बद्धपरिकराणां पुरुषाणां समूहो दृश्यते अत्र गत्वा प्रक्ष्यामि

Digitized by Google

विलोक्य। कहं एदे क्खु सल्लाभिणो गाढ़प्प-हारस्स घणसन्नाहजालदुब्भेज्जमुहेहिं कङ्कवत्त-हिं हिअआदो सल्लाइं उद्धरन्ति ता क्खु एदे ण जाणन्ति, होदु, अण्णदो विचिणस्सं इमे क्खु अवरे अब्भदरा संकलिदा वीरमाणुसा ता, एत्थ गदुअ पुच्छिस्सं। उपगम्य। हंहो जाणह कहिं उद्दे से-कुलणाहो वट्टदु त्ति। कधं एदेवि मं पेक्खिअ अहिअदरं रोअन्ति। हहा। ता णूणं एदेवि जाणन्ति। हा दुक्करं क्खु एत्थ वट्टदु, एसा वीर-मादा समरविणिहिदं पुत्तअं सुणिअ रत्तंसुअणि-वसणाए समग्गभूसणाए बद्धए सह अणुमरेदि।

कथमेते खलु खड्गिनो गाढप्रहारस्य घनसन्नाहजालदुर्भेद्यमु-खैः (निविड़सन्नाहजालमिव दुर्भेद्यायं येषां तैः) कङ्कपत्रैः (शल्योद्धारयन्त्रभेदैः) हृदयात् शल्यानि उद्धरन्ति, तत् खल्वेते न जानन्ति। भवतु अन्यतो विचेष्यामि, इमे खलु अपरे प्रभूत-तराः सङ्कलिताः वीरमानुषाः, तदत्र गत्वा प्रक्ष्यामि। अहंहो जानीथ कस्मिन्नुद्देशे कुरुनाथो वर्त्तत इति। कथमेतेऽपि मां दृष्ट्वा अधिकतरं रुदन्ति, तन्न खल्वेतेऽपि जानन्ति। हा दुष्करं खलु अत्र वर्त्तते। एषा वीरमाता समरविनिहितं पुत्रकं श्रुत्वा रक्तांशुकनिवसनया समग्रभूषणया बध्या सह अनुम्रियते।

Digitized by Google

सखाघम्। साऊ वीरमादे साऊ अण्णम्मि वि जम्मान्तरे अणिहदपुत्तआ ऊविस्सदि होदु अण्णदो [विचिणिस्सं।] अन्यतोविलोक्य। अअं अवरो वज्जप्पहारणिहदकाओ अकिदव्वणप्पडिआरो एव्व जोहसमूहो दूमं सुण्णासणं तुरङ्गमं उवालहिअ रोदिदि णूणं एदाणं एत्थ एव्व सामी वावादिदो ता णऊ एदे वि जाणन्ति होदु अण्णदो गदुअ पुच्छिस्सं। सर्वतोविलोक्य। कहं सव्वो एव्व अवत्थाणुरूवं व्वसणं अणुभवन्तो भाअधेअविमुहदाए पज्जाउलो जणो ता कं एत्थ पुच्छिस्सं कं वा उवालहिस्सं होदु सअं

साधु वीरमातः, साधु अन्यस्मिन्नपि जन्मान्तरे अनिहतपुत्रका भविष्यसि। भवतु अन्यतो विचेष्यामि। अयमपरो वज्रप्रहारनिहतकायोऽकृतव्रणप्रतीकार एव योधसमूहदूमं शून्यासनं तुरङ्गम मुपालभ्य रोदिति नूनमेषामप्येव स्वामी व्यापादितः तन्न त्वेतेऽपि जानन्ति, भवतु अन्यतो गत्वा प्रक्ष्यामि। कथं सर्व एव अवस्थानुरूपं व्यसनमनुभवन् भागधेयविमुखतया पर्याकुलो जनः तत् कमत्र प्रक्ष्यामि कं वा उपालप्स्ये। भवतु स्वय-

---

[पुच्छिस्सं।]

एव्व एत्थ विचणिस्सं ! परिक्रम्य। देव्वं दाणीं उवालहिस्सं हंजो देव्व! एआदसाणं अक्खोहिणीणं(१) णाहो जेट्ठो भादुसदस्स भत्ता गाङ्गेयजयद्दथ-द्दोणकराअसल्लकिवकिदवम्म अस्सत्थामप्पमुहस्स रा अचक्कस्स सअलपुहिवीमण्डलेक्कणाहो महाराअ

---

(१) अक्षौहिण्यां प्रसंख्याता रथानां द्विजसत्तमाः।
संख्यागणिततत्त्वज्ञैः सहस्राण्येकविंशतिः।
शतान्युपरि चैवाष्टौ तथा भूयश्च सप्ततिः॥ (२१८७० रथाः)
गजानाञ्च परीमाणं तावदेव निर्दिशेत्। (२१८७० गजाः)
ज्ञेयं शतसहस्राणि सहस्राणि नवैव तु।(१०९३५० नराः)
नराणामपि पञ्चाग्र्यशतानि त्रीणि चानघाः॥
पञ्चषष्टिसहस्राणि तथाश्वानां शतानि च।
दशोत्तराणि षट् प्राज्ञैर्यथावदिह संख्यया॥(६५६१० वाजिनः)
आदिपर्वणि २अध्यायोक्ताक्षौहिणीसंख्या ज्ञेया।

मेवात्र विचेष्यामि। भवतु दैवमिदानीमुपालप्स्ये, अहो दैव! एकादशानामक्षौहिणीनां नाथो ज्येष्ठो भ्रातृशतस्य भर्त्ता गाङ्गेयजयद्रथद्रोणाङ्ग राजशल्यकृपकृतवर्म्माश्वत्थामप्रमुखस्य राजचक्रस्य सकलपृथिवीमण्डलैकनाथो महाराजदुर्योधनोऽपि

दुज्जोहणोवि अण्णेसीअदि (१) ण जाणे कस्सिं उद्देसे सो वट्टइ त्ति । विचिन्त्य निश्चित्य च । अह वा किं एत्थ देव्वं उवालहामि जदो तस्स क्खु एदं (२)निब्भच्छिदबिउलवअणवीअस्स (३) परिब्भदपिदामहहिदोवदेसङ्कुरस्स(४)सउणिहदअप्पोत्साहणादिविरूढमूलस्स (५) जदुगेहदूदबिसंसाहिणो(६) संभूदचिरआलसंबद्धवेरालवालस्स पञ्चालिआकेस

(१) अन्विष्यते इत्यनेन बहुसैन्यानां विनाशात् परिजनाहततत्वाभावेन क्वचित् स्थीयतेऽत्यनुसन्धानं कर्त्तव्यं तच्च दुर्भाग्य कृतमित्याशयः ।

(२) निर्भर्त्सितमवज्ञातं यत् विदुरवचनं तदेव बीजं यस्य ।

(३)परिभूतःपितामहहितोपदेशःभीष्महितकथनमङ्कुरोयस्य ।

(४)शकुनिरेव हतकः सर्व्वानिष्टकरत्वात् आशस्यानाशः तस्य यत् प्रोत्साहनादि उत्तेजनादि तेन विरूढं जातं मूलं यस्य ।

(५) जतुगृहं द्यूतं विषञ्च तान्येव शाखी दुश्चरितद्रुमस्य ।

(६) संभृतः सञ्चितः चिरकालसम्बन्धो यस्य चिरसञ्चित-

अन्विष्यते न जाने कस्मिन्नुद्देशे स वर्त्तत इति । अथवा किमत्र दैवमुपालभे तस्य खल्विदं निर्भर्त्सितविदुरवचनबीजस्य परिभूतपितामहहितोपदेशाङ्कुरस्य शकुनिहतकप्रोत्साहनादिविरूढमूलस्य जतुगृहद्यूतविषशाखिनः संभृतचिरकालसंबद्धवैरालवालस्य पाञ्चालिकाकेश-

Digitized by Google

ग्गहणकुसुमस्स फलं (१) परिणमदि (२)। अन्यतो विलोक्य। जहा एत्थ एसोबिबिहरअणप्पहासबलिद-रूरकिरणप्पसूदसक्कचावसहस्सपूरिददसदिसामुहो (३)लुणकेदुबंसो रहो दीसइ ता अहं तक्केमि अवस्सं एदिना महाराअदुज्जोहणस्स बिस्सामुद्देसेण होदव्वं। *

उपसृत्य दृष्ट्वा च। जअदु जअदु महाराओ। †

सूत। विलोक्य आयुष्मन्! समरात् सुन्दरकःप्राप्तः।

मित्यर्थः तादृशं यद् वैरं विद्वेषः तदेवालवालो यस्य सिक्तजलधारणार्थं दृक्षमूले मृत्तिकादिरचितक्षुद्रसेतुविशेषआलवालः।

(१) पद्मालिकायाः केशग्रहणमेव कुसुमं यस्य।

(२) तादृशदृक्षस्य फलमिव फलं कार्यं परिणमति मरत कुलक्षयरूपतया जायते इत्यर्थः।

(३) विविधरत्नप्रभया संबलितेन मिलितेन सूर्यकिरणेन प्रसूतं जनितं यदिन्द्रचापसहस्रं तेन पूरितं दशदिशामुखं येन।

ग्रहणकुसुमस्य फलं परिणमति। यथा अत्रैष विविधरत्नप्रभासंवलितसूर्यकिरणप्रसूतशक्रचापसहस्रपूरितदशदिग्मुखोलूनकेतुवंशो रथो दृश्यते तदहं तर्कयामि अवश्यमेतेन महाराजदुर्योधनस्य विश्रामोद्देशेन भवितव्यम्।

† जयतु जयतु महाराजः।

Digitized by Google

दुर्यो। विलोक्य। अये सुन्दरक! कच्चित् कुशलमङ्गराजस्य।

सुन्द। देव कुशलं शरीरमात्रेण। *

दुर्यो। ससंभ्रमम्। सुन्दरक! किं किरीटिनोऽस्य निहता धौरेयकाः, हतः सारथिः भग्नो वा रथः।

सुन्द। देव ण रहो भग्गो से मणरहोवि॥†

दुर्यो। सरोषम्। अरे किमेवमस्पष्टकथितैराकुलमपि मे मनः पर्य्याकुलयसि तदग्रेसरतो विस्पष्टं कथ्यताम्।

सुन्द। जं देवो आणवेदि। अए देवस्स मउडमणिप्पहावेण अवणीदा मे रणप्पहारवेअणा। इति साटोपं परिक्रम्य। सुणादु देवो अज्ज दाव कुमारदुग्गासणबद्ध इत्यर्धोक्ते सुखमास्तेति। ‡

---

* देव! कुशलं शरीरमात्रेण।

† देव! न रथो भग्नः, अस्ति मनोरथोऽपि।

‡ यद्देव आज्ञापयति। अये देवस्य मुकुटमणिप्रभावेणापनीता मे रणप्रहारवेदना। शृणोतु देवः, अद्य तावत् कुमारदुर्गासनबद्ध।

Digitized by Google

सूत। सुन्दरक कथय कथितमेव दैवेन।

दुर्यो। कथ्यतां श्रुतमस्माभिः।

सुन्द। सुणादु देवो अज्ज दाव कुमालदुस्सासणबहामरिसिदेण सामिणा अङ्गराएण कुडिलभिउडीभङ्गभीसणललाडवट्टेण अविस्सादसन्धाणमोक्खेण सिलीमुहसंघादवरिसिणा अभिजुत्तो सो दुराआरो मज्झमपण्डवो भीमसेणहदओ। *

उभौ। ततस्ततः।

सुन्द। तदो देव! उभअबलमिलन्तदीअन्तकरितुरअपदादिसमुब्भूदधूलिणिवहेण पल्लत्थतत्तङ्गअघडासंघादेण अ बित्थरन्तेण अन्धआरेण अन्धकिदं उभअबलं ण भुवणतलं लक्खीअदि। †

---

* शृणोतु देवः अद्य तावत् कुमारदुःशासनवधामर्षितेन स्वामिनाङ्गराजेन कुटिलभ्रूकूटीभङ्गभीषणललाटपट्टेन अविज्ञातसन्धानमोक्षेण शिलीमुखसंघातवर्षिणा अभियुक्तः स दुराचारो मध्यमपाण्डवो भीमसेनहतकः।

† ततो देव उभयबलमिलद्दीर्यत्करितुरगपदातिसमुद्भूतधूलिनिवहेन पर्य्यस्ततत्तङ्गजघटासंघातेन च विस्तीर्यमाणेनान्धकारेण अधीकृतमुभयबलं न भुवनतलं लक्ष्यते।

Digitized by Google

उभौ । ततस्ततः ।

सुन्द । तदो देव ! दूराकड्ढिदधणुग्गुणच्छोटण-टङ्कारगम्भीरभीसणेण (१) अन्धआरेण जाणीअदि गज्जिदं पलअजलहरेण त्ति ।*

इर्ष्यो । ततस्ततः ।

सुन्द । †तदो देव दोहिण्णं ताणं अण्णोण्णसिंहणा दगज्जिदपिसुणं(२)बिबिहपरिमुक्कप्पहरणाहदकव-असंगलिदज्जलणविज्जुअं (३) बहललुहिलबिन्दु

---

(१) अन्धकारस्य मेघतुल्यश्यामलतया धनुष्टङ्कारस्य गर्ज्जितसाम्ये न च भातत्वात् प्रलयमेघेन गर्ज्जितमिति ज्ञायते इत्युत्प्रेक्ष्यते इत्यर्थः ।

(२) अन्योन्यमुद्दिश्य सिंहनादः सिंहस्येव शब्दः स एव गर्ज्जितस्य मेघनादस्य पिशुनः सूचकः यत्र ।

(३) विविधैः परिमुक्तैः प्रहरणैः शस्त्रैराहतात् आघट्टितात् कवचात् लौहमयसन्नाहात् संगलिता स्फुरिता ज्वलनएव विद्युद्यत्र विद्युच्चक्रमिति पाठे विद्युत्समूहोयत्रेति वाक्यम् ।

---

* ततो देव! दूराकृष्टधनुर्गुणास्फोटनटङ्कारगम्भीरभीषणेनान्धकारेण ज्ञायते गर्जितं प्रलयजलधरेणेति ।

† ततो देव ! द्वयोस्तयोरन्योन्यसिंहनादगर्जितपिशुनं विविधपरिमुक्तप्रहरणाहतकवचसंगलितज्वलनविद्युत्कं बहलरुधिर

Digitized by Google

खज्जोअभासुरं गम्भीरत्थणिदचावपजलहरप्पसरिदसर धारासहस्सवरिसदुद्दंसणं (१) संभूदं समरदुद्दिणं।

दुर्यो। ततस्ततः।

सुन्द। *तदोअ देव! एदस्मिं अन्तरे जेट्ठस्स भादुणो पराभवसङ्किणा धणञ्जएण वज्जणिग्घादणिग्घोसविसमरहरसिद हओ (२) सिहरट्ठिदवाणरो (३) तुरङ्गमसंवाहणवावदवासुदेवसङ्खचक्कगदासि

---

(१) गम्भीरं स्तनितं गर्ज्जितं यस्य तादृशश्चापएव जलधरो मेघस्तस्मात् प्रसरत् यत् शराणाम् धारासहस्रं धारारूपतां प्राप्तं शरसहस्रमित्यर्थः तद् यत्र एवंभूतेन वर्षेण शरनिक्षेपरूपेण दुर्दर्शनम्।

(२) वज्रनिर्घातः वज्रशब्दइव यो निर्घोषः रथचक्रकठोरशब्दस्तेन विह्वलराश्चञ्चला हेषिता हया यत्र हेषणा वाजिशब्दः।

(३) शिखरस्थितवानरः कपिध्वजः।

विन्द्खद्योतभासुरं गम्भीरस्तनितचापजलधरप्रसरच्छरधारासहस्रवर्षदुर्दर्शनं सम्भूतं समरदुर्दिनम्।

* ततश्च देव! एतस्मिन्नन्तरे ज्येष्ठस्य भ्रातुः पराभवशङ्किना धनञ्जयेन वज्रनिर्घातनिर्घोषविह्वलहेषितहयः शिखरस्थितवानरस्तुरङ्गमसंवाहनव्यापृतवासुदेवशङ्खचक्रगदासिवाञ्छित

तच्छिद्दचदुलचउब्भाऊदुइंसणो (१)आपूरिअपञ्चज
ण्णदेअदत्त(२)तारारसिदद्दिडिरवभरिददसदिसामु-
हकुहरो(२)धाविदो तं उइंसं रहवरो। *

इत्यर्थौ। ततस्ततः।

सन्द। तदो भीमसेणधणञ्जएहिं अभिजुत्तं
पिदरं पेक्खिअ ससंभमं विअलिअं अवधूणिअ रअ-

(१) वाहानामश्वानां वाहने चालने व्याप्तस्य वासुदेवस्य शङ्खादिलाञ्छितैः चतुर्भिर्बाहुभिः दुर्दर्शनः यद्यपि वासुदेवस्य चतुर्भुजतया समुद्भवेऽपि जन्मोत्तरमेव द्विभुजता जातेति भागवतमद्भुतं बालकमम्बुजेक्षणं चतुर्भुजं शङ्खगदाद्युदायुधमिति, पित्रोः संपश्यतोः सद्यो बभूव प्राकृतः शिशुरिति च १० स्क० ३ अध्याये उक्ता तथापि भारतयुद्धकाले विपक्षसैन्यानां त्रासनार्थं पुनश्चतुर्भुजता प्रकटिता "तेनैव रूपेण चतुर्भुजेन सह स्वबाहो भव विश्वमूर्त्ते इति गी० ११ अ० विश्वरूपदर्शनात् भीतस्यार्जुनस्य भगवन्तं प्रति तेनैवेत्युक्त्या चतुर्भुजतान्वितेति सूचितम्।

(२) पाञ्चजन्यः कौरवशङ्खः देवदत्तः अर्जुनशङ्खः पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जय इति गीतायामुक्तत्वात्।

तच्चटुलचतुर्बाहुदुर्दर्शनआपूरितपाञ्चजन्यदेवदत्ततारारसितदशदिग्मुखकुहरो धावितरत्नमुद्देशं रथवरः।

* ततो भीमसेनधनञ्जयाभ्यामभियुक्तं पितरं प्रेक्ष्य ससंभ्रमं

णसीसअं, आकण्णाकड्ढिदकठिणकोदण्डज्जोओ दाहिणहत्थविक्खित्तसरपुङ्खबन्धणो(१) विघट्टणत्तुवराइदसारहीओ तं देसं उवगदो कुमारविसेणो ।*

इत्यौ । सावष्टम्भम् । ततस्ततः ।

सन्द । तदोअ देव! तेण आअच्छन्तेण एव्व कुमारविसेणेण विदलिदसिहासामलसिणिद्धपुङ्खेहिं(२) कठिणकङ्कवत्तेहिं किसणवरणेहिं सिलासिणिसिदसामलसल्लबन्धेहिं कुसुमिदो विअ तरु मुञ्चन्तएण सिलीमुहेहिं पच्छादिदो धणञ्जअस्स रहवरो।†

उभौ । सहर्षम् । ततस्ततः ।

---

(१) दक्षिणहस्तोविक्षिप्तो यत्र तादृशं शरपुङ्खबन्धनं यस्य ।

(२) विदलिता चूर्णा पिष्टेति यावत् शिखा तज्जन्याञ्जनमिव श्यामला स्निग्धाः चिक्कणाः पुङ्खा येषाम् ।

विगलितमवधूय रत्नगीर्षक माकर्णाकृष्टकठिनकोदण्डज्यो दक्षिणहस्तविक्षिप्तशरपुङ्खबन्धनो विघट्टनत्वरायितसारथिक स्त देश मुपगतः कुमार द्रुषसेनः ।

† ततश्च देव! तेनागच्छतैव कुमारद्रुषसेनेन विदलितशिखाश्यामलस्निग्धपुङ्खैः कठिनकङ्कपत्रैः कृष्णवर्णैः शिलानिशितश्यामलशल्यबन्धैः कुसुमित इव तरु मुञ्चतेन शिलीमुखैः प्रच्छादितो धनञ्जयस्य रथवरः ।

Digitized by Google

तदो देव! तीक्खविक्खित्तणिसिदभल्लवाणवरिसिणा धणुच्छएण ईसि विहसिअ भणिदं, अरे रे विससेणे पिदुणो वि दाव दे ण जुत्तं मह अभिमुहं ठादुं किं उण भवदो बालस्स, ता गच्छ अवरेहिं कुमारेहिं आओधेहि, एव्वं वाचं णिसमिअ गुरुअणाहिक्खेवेण उद्दीविअकोवोपरत्तमुहमण्डलविअम्भिअभिउडीभङ्गभीसणेण चावधारिणा कुमारविससेणेण वि मम्मभेदएहिं परुसविसमेहिं सुदिवहकिदप्पणएहिं(१) णिभच्छिदो गण्डीवी वाणेहिं ण उण दुट्ठवअणेहिं ॥*

(१) श्रुतेः कर्णस्य पक्षे श्रुत कृतप्रणयैः आकर्षाकृष्टैरित्यर्थः दृष्टवचनपक्षे श्रुतेः अवधस्य वधे कठोरतया श्रुतियोग्यता राहित्ये कृतप्रणयैः कृतानुबन्धैः ।

* ततो देव! तीक्ष्णविक्षिप्तनिशितभल्लबाणवर्षिणा धनुश्छेदेन ईषद्विहस्य भणितम्, अरे रे दृषसेन पितरपि तावत्ते न युक्तं ममाभिमुखं स्थातुं, किं पुनर्भवतो बालस्य, तद्गच्छापरैः कुमारैरायुध्यस्व, एवं वाचं निशम्य गुरुजनाधिक्षेपेणोद्दीपितकोपोपरक्तमुखमण्डलविजृम्भितभ्रुकुटीभङ्गभीषणेन चापधारिणा कुमारदृषसेनेनापि मर्मभेदकैः परुषविषमैः श्रुतिपथकृतप्रणयैर्निर्भर्त्सितो गाण्डीवी बाणैर्न पुनर्दुष्टवचनैः । पक्षे श्रुतिवधकृतप्रणयैः ।

राजा । साधु वृषसेन! साधु, सुन्दरक! ततस्ततः ।

सुन्द । तदो अ देव! णिसिद्धसराभिघादवेअणोपजादमण्णुणा(१)गण्डीविणा चण्डगण्डीवजीआसद्दणिज्जिदवज्जणिग्घादघोसेण बाणणिवडणपडिसिद्धदंसणप्पसरेण पत्थुदं सिक्खाबलाणुरूवं किंवि अच्छरीअं । *

दुर्यो । साकूतम् ततस्ततः ।

सुन्द । तदो अ देव! तं पेक्खिअ तस्स सत्तुणो समरव्वावारचडरत्तणं अविभाविअतूणीमुहधणुग्गुणगमणागमणबाणसन्धाणमोक्खचडुलकरअलेण (२) कुमालविसेसेण सविसेसं पत्थुदं समलकम्मं । †

(१) निशितानां तीक्ष्णीकृतानां शराणामभिघातेन जातोमन्युः क्रोधोयस्य ।

(२) अविभावितयोः अज्ञातयोः तूणीमुखधनुर्गुणयोः गमनागमनयोः सन्धानमोक्षणयोः गुणसंयोजनपरित्यागयोश्च चटुलं-चञ्चलं करतलं यस्य तेन ।

* ततश्च देव! निशितशराभिघातवेदनोपजातमन्युना गाण्डीविना चण्डगाण्डीवज्याशब्दनिर्जितवज्रनिर्घातघोषेण बाणनिपतन प्रतिषिद्धदर्शनप्रसरेण प्रस्तुतं शिक्षाबलानुरूपं किमप्याश्चर्यम् ।

† ततश्च देव! तत् प्रेक्ष्य तस्य शत्रोः समरव्यापारचतुरत्वमविभावितत्तूणीमुखधनुर्गुणगमनागमनसन्धानमोक्षचटुलकरतलेन कुमारदृषसेनेनापि सविशेषं प्रस्तुतं समरकर्म्म ।

Digitized by Google

दुर्यो। ततस्ततः।

छन्द। तदोअ देव! परिसेसिदरणब्बावारेसु विमुक्कचिरणिवट्टिदवेराणुबन्धो दोण्हं वि कुरुराअपण्डवबलेसु साहु विससेण! साहु त्ति कलअलमुहरो वीरलोओ आलोइदुं पउत्तो। *

दुर्यो। सविस्मयम्। ततस्ततः।

छन्द। तदोअ देव! अवहीरिदसअलधाणुक्कचक्कपराक्कमसालिणो सुदस्स तहाविहेण समलकम्मालम्भेण हरिसरोसकरुणासङ्कासङ्कडे अणुवट्टमाणस्स, सामिणो अङ्गराअस्स णिवडिआ सरपडदु भीमसेणे, वाप्पआउला दिट्ठी कुमालविससेणे।†

दुर्यो। सविस्मयम्। ततस्ततः।

---

* ततश्च देव! परिशेषितरणव्यापारो विमुक्तचिरनिर्वर्त्तितवैरानुबन्धो द्वयोरपि कुरुराजपाण्डवबलेषु साधु दृषसेन! साधु इति कलकलमुखरो वीरलोक आलोकयितुं प्रवृत्तः।

† ततश्च देव! अवधीरितसकलधानुष्कचक्रपराक्रमशालिनः सुतस्य तथाविधेन समरकर्म्मारम्भेण हर्षरोषकरुणाशङ्कासङ्कटे ऽनुवर्त्तमानस्य स्वामिनो ऽङ्गराजस्य निपतिता शरपदवति भीमसेने, वाष्पाकुला दृष्टिः कुमारदृषसेने।

Digitized by Google

उन्द। तदोअ देव! उभअबलप्पउत्तसाहुकारामरिसिदेण सरवरिसपज्जलिदेण गण्डीविणा तुरगेसु सारहिं बि रहवरे धणुं बि जीआइं बि णलिन्दलच्छणे सिदादवत्ते ब्यावारिदा समं सिलीमुहा। *

दुर्यो। सभयम्। ततस्ततः।

उन्द। तदोअ देव! बिरहो लुणगुणकोदण्डो परिब्भमणमेत्तब्यावारप्पडिसिद्धसरसंपादो मण्डलाइं(१)बिरइदुं पउत्तो कुमालो। †

दुर्यो। साशङ्कम्। ततस्ततः।

---

(१) मण्डलानि मण्डलाकारगतिभेदान् यैः शत्रुत्यक्तशराणां शरीरप्रवेशो न भवति तानीत्यर्थः।

---

* ततश्च देव! उभयबलप्रदत्तसाधुकारामर्षितेन शरवर्षप्रज्वलितेन गाण्डीविना तुरगेषु सारथावपि रथवरे धनुष्यपि ज्यावामपि नरेन्द्रलाञ्छने सितातपत्रे व्यापारिताः समं शिलीमुखाः।

† ततश्च देव! विरथो लूनगुणकोदण्डः परिभ्रमणव्यापारमात्रप्रतिषिद्धशरसंपातो मण्डलानि विरचयितुं प्रवृत्तः कुमारः।

Digitized by Google

सूत्र। तदो देव! सुदरट्ठविद्धंसणामधेएहिं विदेण सामिणा अक्करायेण अगणिअभीमसेणाभिजोएण पल्लत्थो धणञ्जअस्स उवरि सिलीमुहासारो। कुमालविसएणो वि परिजणोवणीदं अण्णं रहं आरुहिअ पुणोवि पवुत्तो धणञ्जआभिजोए, भणिदं च कुमालेण रे रे तादाहिक्खेवमुहल! मज्झमपण्डव! मह सरा तुह सरीरं उज्झिअ अण्णत्थं ण णिवड़न्ति त्ति भणिअ सरसहस्सेहिं पण्डवसरीरं पच्छादिअ सिंहणादेण गज्जिदुं पउत्तो। *

इर्षो। सविस्मयम्। अहो बालस्य पराक्रमो सुग्धस्वभावस्यापि, ततस्ततः

---

* ततश्च देव! सुतरथविध्वंसनामधेयेन विदेन स्वामिना अक्करायेण अगणितसीमसेनाभियोगेन पर्यस्तो धनञ्जयस्योपरि शिलीमुखासारः। कुमारदृषसेनोऽपि परिजनोपनीतमन्यं रथमारुह्य पुनरपि प्रवृत्तो धनञ्जयाभियोगे। भणितञ्च कुमारेण रे रे तातापिक्षेपमुखर! मध्यमपाण्डव! मम शरास्तव शरीरमुज्झित्वा अन्यस्मिन् न निपतन्तीत्युक्त्वा शरसहस्रैः पाण्डवशरीरं प्रच्छाद्य सिंहनादेन गर्जितुं प्रवृत्तः।

Digitized by Google

सूत्र। तदोअ देव! तस्स सरसहस्सपादं अवधुणिअ किरीडिणा गहिदा रहोत्तङ्गादो खणन्तकणअकिङ्किणीजालझङ्कारविरावणी मेहोवरोहविमुक्कणहत्थलणिम्मला णिसिदसामलसिणिद्धमुही विविहरअणप्पहाभासुरभीसणरमणिज्जदंसणा सत्ती सोवहासं विमुक्का अ धणञ्जएण कुमालाभिमुहं।*

दुर्यो। सविषादम्। अहह।

सूत्र। तदोअ देव पज्जलन्तीं सत्तिं पेक्खिअ विगलिदं अङ्गराअस्स हत्थादो सरं धणु, हिअआदो वीरसुलहो उच्छाहो, णअणदो बाप्पसलिलं, वअणदो, रसिदं हसिदं, अ धणञ्जएण, सिंहणादं

---

* ततश्च देव! तस्य शरसहस्रपातमवधूय किरीटिना गृहीता रथोत्सङ्गात् क्वणत्कनककिङ्किणीजालझङ्कारविरावणी मेघोपरोधविमुक्तनभस्तलनिर्म्मला निशितश्यामलस्निग्धमुखी विविधरत्नप्रभाभासुरभीषणरमणीयदर्शना शक्तिः। सोपहासं विमुक्ता च धनञ्जयेन कुमारा मिमुखम्।

† ततश्च देव! प्रज्वलन्तीं शक्तिं प्रेक्ष्य विगलितमङ्गराजस्य हस्तात् सशरं धनुः, हृदयात् वीरसुलभ उत्साहो, नयनाद्बाष्पसलिलं, वदनादूसितं, हसितञ्च धनञ्जयेन, सिंहनादो विनादितो

विसादिदं विओदलेण अ दुक्कलं दुक्कलं सिु आकु-न्दिदं कुरुबलेण ।

इर्यो । सविषादम् । ततस्ततः ।

सन्द । तदोअ देव ! कुमालविसवेणेण आकण्णा-किट्टणिसिदखुरप्पेण सुचिरं णिज्झट्ठअ अद्धपहे एव्व भाइरहीं विअ भअवदा विसमलोअणेण तिधा किदा सत्ती । *

इर्यो । साधु दुष्षसेन! साधु । ततस्ततः ।

सन्द । तदोअ देव! एदस्सिं अन्तरे किदकल-कलमुहरेण वीरलोअसाड्डवादेण अन्तरिदो सम-रतूररवो सिद्धचालणगणविमुक्ककुसुमप्पकरेण प-च्छादिदं समलाङ्गणं । †

दकोदरेण च, दुष्करं दुष्करं मित्याक्रन्दितं कुरुबलेन ।

* ततश्च देव ! कुमारदुष्षसेनेन कर्णाकृष्टनिशितक्षुरप्रेण सुचिरं निर्ध्यार्थ अर्द्धपथे भागीरथीव भगवता विषमलोचनेन त्रिधा कृता शक्तिः । "तां दधार हरोराजन् गङ्गां गगनमेखलाम् ।
सा बभूव विसर्पन्ती त्रिधा राजन् समुद्रगा" ।। इति वन-पर्व्वणि १०६ अध्याये ।

† ततश्च देव! एतस्मिन्नन्तरे कृतकलकलमुखरेण वीरलोकसाधु वादेनान्तरितः समरतूर्य्यरवः सिद्धचारणगणविमुक्तकुसुमप्र-करेण प्रच्छादितं समराङ्गणम् ।

Digitized by Google

दुर्यो । अहो बालस्य पराक्रमः । ततस्ततः ।

चन्द । तदो अ देव! भणिअं सामिणा अक्करराएण भो बिओदल असमत्तो तुह मह वि समलव्वावारो ता अणुमण्ण मं मुहुत्तअं पेक्खामहे दाव क्खणमेत्तं मह वच्छस्स तुह भादुणो धणुव्वेद सिक्खाणिउणत्तणं तुह वि एदं पेक्खणिज्जं त्ति । तदो विरदा रणव्वावारणिव्वन्धादो मुहुत्तअं पसमिदवेरा जादा दुवे अवि पेक्खआ भीमसेणाक्करराआ । *

दुर्यो । साभिप्रायम् । ततस्ततः ।

चन्द । तदो अ देव! एदस्मिं अन्तरे सत्तिखण्डणामधरिसिदेण गण्डीविणा एवं भणिदं अरे रे दुज्जोहणप्पमुहा । इत्यर्धोक्ते लज्जां नाटयति । । †

---

* ततश्च देव! भणितं स्वामिना अङ्करराजेन भो वृकोदर असमाप्तस्त्वं ममापि समरव्यापार स्तदनुमन्यतां मां मुहूर्तं प्रेक्षामहे तावत् क्षणमात्रं वत्सस्य तव भ्रातुर्वृकोदरिज्ञानिपुणत्वं तवाप्येतत् प्रेक्षणीयमिति । ततो विरतौ रणव्यापारनिर्बन्धात् मुहूर्तं प्रशमितवैरौ जातौ द्वौ च प्रेक्षकौ भीमसेनाङ्करराजौ ।

† ततश्च देव ! एतस्मिन्नन्तरे शक्तिखण्डनामर्षितेन गाण्डीविना एवं भणितम् अरे रे दुर्योधनप्रमुखाः ।

Digitized by Google

दुर्यो। सुन्दरक! कथ्यतां परवचनमेतत्।

सुन्द। सुणादु देवो अरे दुज्जोहणप्पमुहा कुरुबलसेणापब्भवो अरे अविणअणदीकण्णधार! कण्ण! तुह्मेहिं मह परोक्खं एआइ पुत्तओ अहिमण्णु ब्भावादिदो अहं उण तुह्माणं पेक्खन्ताणं एव्व कुमालविससेणं सुमरिदव्वसेसं करोमि(१)त्ति भणिअ सगव्वं आप्फालिदं णेण णिग्घादघोसभीसणज्जारवं, गण्डीवं, सामिणा वि सज्जीकिदं कालपुट्ठं।*

दुर्यो। सावहित्थम्। ततस्ततः।

---

(१) स्मर्त्तव्यं स्मरणं भावे तव्यः। तदवशेषो यस्य स्मरणीय मात्रं न तु दर्शनीयमित्यर्थः।

---

* श्रृणोतु देवः। अरे दुर्योधनप्रमुखाः कुरुबलसेनाप्रभवः! अरे अविनयनदीकर्णधार! कर्ण! युष्माभिर्म्मम परोक्षम् एकाकी पुत्रकोऽभिमन्यु र्व्यापादितो ऽहं पुन र्युष्माकं प्रेक्षमाणानाम्(१) एनं कुमारवधसेनं स्मर्त्तव्यशेषं करोमीति भणित्वा सगर्व्वमास्फालितम् अनेन निर्घातघोषभीषणज्यारवं गाण्डीवं, स्वामिनापि सज्जीकृतं कालपृष्ठम्। (कर्णधनुषोनाम)। (१) प्रेक्षमाणानन्नादृत्व षष्ठी चानादरे पा० २, ३, १८, सू० अनादरे षष्ठी।

Digitized by Google

सूत्र। तदो अ देव! एदस्मिं अन्तरे पडिसिद्ध-भीमसेणसमरकम्मालम्भेण गण्डीविणा विरइदा अङ्गराअविससेणरहकूलंकसे दुवे वाणवड्डीओ। तेहिं वि दुवेहिं अन्नोन्नसिणेहदंसिदसिक्खाविसे-सेहिं अभिजुत्तो मज्झमपण्डवो। *

इर्यो। ततस्ततः।

सूत्र। तदो अ देव! गण्डीविणा तारारसिदजी-आणिग्घोसमेत्तविसादवाणवरिसेण तह आअ-रिदं जह पत्तिहिं ण णहत्तलं ण सामी ण रहो ण धरणी ण कुमालो ण केदुवंसो ण बलाइं ण सारही ण तुलङ्गमो ण दिसाओ ण बीरलोओ अ संकक्खीअदि। †

---

* ततश्च देव! एतस्मिन्नन्तरे प्रतिषिद्धभीमसेनसमरकर्म्मार म्भेण गाण्डीविना विरचिते अङ्गराजदृषसेनरथकूलङ्के दे वाणवद्यौ। ताभ्यामपि द्वाभ्यामन्योन्यस्नेहदर्शितशिक्षाविशे-षाभ्यामभियुक्तो मध्यमपाण्डवः।

† ततश्च देव! गाण्डीविना तारारसितज्यानिर्घोषमात्र-

*विज्ञातवाणवर्षेण तथाचरितं पत्तिभि र्यथा न नभस्तलं न स्वामी न रथो न धरणी न कुमारो न केतुवंशो न बलानि न सारथि र्न तुरङ्गमो वीरलोकश्च संलक्ष्यते। * वाणवर्षाणां शीघ्रत्वात् सन्धानादि न विभावितंकिन्तु उद्यावातेन वाणवर्षैरनुमितइत्यर्थ।

Digitized by Google

दुर्यो । सविस्मयम् । ततस्ततः ।

सुन्द । तदो अ देव! क्खणमेत्तं एव्व अदिक्कन्ते सरसंपादे सहरिसणिसिंहणादे पण्डवसेण्णे सविसाद-विमुक्काक्कन्दे कौरवबले समुत्थिदो महन्तो कलअलो हा हदो कुमालविससेणो त्ति । *

दुर्यो । सवाष्पामर्षम् । ततस्ततः ।

सुन्द । तदो अ देव! कुमालं हदसारहि तुलङ्गं लुणादवत्तचामरकेदुबंसं सग्गप्पब्भट्ठं विअ सुलसुमालं हिअअमम्मभेदिणा एक्केण सिलीमुहेण भिण्णदेहं रहमज्झे पल्लत्थम् पेक्खिअ अहं आअदो । †

दुर्यो । साक्षम् । अहह कुमारदृढसेन ! अल-मतः परं श्रुत्वा, हा वत्स! दृढसेन! हा महद्भुदुर्ल-लित ! हा महाशाकर ! हा गदायुद्धप्रिय ! हा

---

* ततश्च देव! क्षणमात्रमेवातिक्रान्ते शरसंपाते सहर्ष सिंह-नादे प्राण्डवसैन्ये सविषादविमुक्ताक्रन्दे कौरवबले समुत्थितो-महान् कलकलः, हा हतः कुमारदृढसेन इति ।

† ततश्च देव! कुमारं हतसारथितुरङ्गं लूनातपत्रचापचाम-रकेतुवंशं स्वर्गप्रभ्रष्टमिव सुरकुमारं हृदयमर्म्मभेदिना एकेन शीलीमुखेन भिन्नदेहं रथमध्ये पर्य्यस्तम् प्रेक्ष्य अहमागतः ।

शौर्यसागर! हा राधेयकुलप्ररोह! हा प्रियदर्शन! हा दुःशासननिर्व्विशेष! हा सर्व्वगुरुवत्सल! प्रयच्छ मे प्रतिवचनम् ।

(१) पर्य्याप्तनेत्रमचिरोदितचन्द्रकान्त
मुद्भिद्यमाननवयौवनरम्यशोभम् ।
प्राणापचारपरिवर्त्तितदृष्टि दृष्टं
कर्णेन तत् कथमिवाननपङ्कजं ते ॥

सूत । आयुष्मन् अलमत्यन्तशोकावेगेन ॥

दुर्य्यो । सूत ! मुग्धवन्तो हि दुःखभाजो भवन्ति, अस्माकं पुनः ।

(२) प्रत्यक्षं हतबन्धूनामेतत् परिभवाग्निना ॥
हृदयं दह्यते ऽत्यर्थं कुतो दुःखं कुतोऽन्यथा ॥

---

(१) पर्य्याप्तं संपूर्णं दीर्घमिति यावत् नेत्रं यस्य । अचिरोदितः बालोदितश्चन्द्रइव कान्तम् उद्भिद्यमानेनाविर्भवता नवयौवनेन रम्या श्रीमा यस्य तत् प्राणानामपचारे वियोगे तत्काले इत्यर्थः । परिवर्त्तिता अन्यथाभूता दृष्टिर्दर्शनमस्य एतादृशं तस्य मुखाब्जं कर्णेन कथं दृष्टं रम्यवस्तुनो मरणकाले विकृतिभावे तद्दर्शने बन्धूनामतीव दुःखदायकत्वमिति भावः ।

(२) प्रत्यक्षम् अक्ष्णः समीपे हतबन्धूनां शत्रुभिर्हतस्वजनानामस्माकमित्यन्वयः परिभवएव अग्निस्तेन बन्धुमरणजन्यतिर-

Digitized by Google

इति मोहमुपगतः।

सूत। समाश्वसितु समाश्वसितु महाराजः;

इति पटान्तेन वीजयति।

दुर्यो। लब्धसंज्ञः। भट्टा! सुन्दरक!, वथस्सेन किं प्रतिपन्नमङ्गराजेन।

सुन्द। तदोअ देव! तधाहदस्स पुत्तस्स दंसणेण संगलिदं असंसुजलं उज्झिअ अणवेक्खिदपरप्पहरणेण सामिणा अङ्गराएण अभिजुत्तो धणञ्जओ। तदो तं सुदबहामरिसिदं विमुक्कजीविदासं तधा परिक्कमन्तं पेक्खिअ भीमणउलसहदेवपञ्चालप्पमुहेहिं अन्तरिदो धनञ्जअस्स रहो। *

दुर्यो। ततस्ततः।

क्षारवह्निना एतत् हृदयं दह्यते एवञ्च हृदयरूपाधारस्य दाहे कृतस्तरां दुःखव्यथयोः स्थितिरनेनात्मनदुःखभारो दर्शितः। एवञ्चात्माकमपुण्यभागित्वात् दुःखभागित्वमपि नेति यत् पुण्यवतोदुःखभागित्वमुक्तं तत्समर्थितमिति वेदितव्यम्।

---

* ततश्च देव! तथाहतस्य पुत्रस्य दर्शनेन संगलितमश्रुजलमुज्झित्वा अनपेक्षितपरप्रहरणेन स्वामिना अङ्गराजेनाभियुक्तो धनञ्जयः। ततश्च सुतवधामर्षितं विमुक्तजीवितार्थं तथा परिक्रामन्तं प्रेक्ष्य भीमनकुलसहदेवपाञ्चालप्रमुखैरन्तरितो धनञ्जयस्य रथः। अन्तरित आहृतः।

Digitized by Google

सुन्द । तदो अज्जुणचावमहाप्पलअपओधरणि-पडिदसरधारासहस्सेहिं पूरिदेसु दिसामुहेसु सल्लेण भणिदो सामी अङ्गराओ, जहा अङ्गराअ! हदतुलक्कमो मथिदचक्कणेमिकूवरो दे रहो ता ण जुत्तं भीमाज्जुणेहिं अहिजुज्जिदुंत्ति भणिअ निव्वट्टिदो रहो, ओदारिदो सामी सन्दणादो बहुप्पआरं अ आस्सासिदो । *

दुर्यो । ततस्ततः ।

सुन्द । तदोअ सामिणा सुदूरं विलम्बिअ परिअणो अभिहिदो अण्णं रहं मे उवणेहि त्ति परिअणोवणीदं अण्णं रहं पेक्खिअ मदू दिण्णदिट्ठी सुन्दरअ! एहि त्ति भणिदं अ, अहं बि उवगदो समीवं ।

---

* ततश्च अर्ज्जुनचापमहाप्रलयपयोधरनिःसृतशरधारासहस्रैः पूरितेषु दिशामुखेषु शल्येन भणितो स्वाम्यङ्गराजः, यथा अङ्गराज!, हतद्वरङ्गमो मथितचक्रनेमिकूबरस्ते रथस्तन्न युक्तं भीमार्ज्जुनाभ्यामभियोक्तुमिति भणित्वा नियर्त्तितो रथःअवतीर्णः स्वामी स्यन्दनात्, बहुप्रकारञ्च आश्वासितः । कूबरोऽस्त्री युग्यधुर इत्यमरः ।

† ततश्च स्वामिना सुचिरं विलम्ब्य परिजनोऽभिहितोऽन्यं रथमुपनयेति । परिजनोपनीतमन्यं रथं प्रेक्ष्य मयि दत्तदृष्टिः सुन्दरक! एहीति भणितश्च, अहमुपागतः समीपम्। ततोऽपनीय

तदो अवणीअ सीसट्ठाणादो पट्टिअं सरीरसंगलिदेहिं सोणिअबिन्दुहिं दिग्धवअणं वाणं कदुअ अहिलिहिदो एसो देवस्स संलेहो, इति पत्रिकामर्पयति ।

दुर्यो । गृहीत्वा वाचयति । यथा स्वस्ति महाराज दुर्योधन ! समाराङ्गणात् कर्ण एतदन्तं कण्ठे गाढमालिङ्ग्य विज्ञापयति ।

(१)अस्त्र ग्रामविधौ कृती न समरेष्वस्ति तुल्यःपुमान्
भ्रातृभ्योऽपि ममाधिकोऽयमनुना जेयाः पृथासूनवः।
त्वत्सम्भावित इत्यहं न च हतो दुःशासनारिर्मया,
त्वं दुःखप्रतिकारमेहि भुजयोर्वीर्य्येण बाष्पेण वा ॥

---

(१)इति अनेन पूर्व्वार्द्धकथितप्रकारेण अहं सम्भावितः अध्यवसितः।एवं सम्भावितेन मया पुनः दुःशासनारिरपि न निहतः तथाच दुःशासनस्य त्राणं न कृतं नापि तद्वधकर्त्तृहननरूपप्रतीकारोऽपि कृतस्तथाच जीवता मया तव न किमपि कृतमित्यर्थः इदानीं त्वं स्वयमेव भुजयोः वीर्य्येण बाष्पेण वा दुःखप्रतीकारम् एहि कुर्व्वित्यर्थः । एतेनात्मनो निर्व्वेदो दर्शितः । निर्व्वेदाच्च मरणाध्यवसायइति ध्वनितम् ।

शीर्षस्थानात् पत्रिकां, शरीरसंगलितैः शोणितविन्दुभिः दिग्धवदनं वाणं कृत्वा अभिलिखित एष देवस्य संलेखः ।

Digitized by Google

दुर्यो। वयस्य! कर्ण! कर्ण! किमिदं हतभ्रातृशतं मामपरेण वाक्शल्येन घट्टयसि। भद्र! सुन्दरक! अथेदानीं किमारब्धो ऽङ्गराजः।

सुन्द। देव! अवनीतशरीरावरणो(१)ऽप्यवहृकिंदणिच्चणिच्चओ सअं एव्व समलं मग्गदि। *

दुर्यो। श्रुत्वा सत्वरमुत्तिष्ठन्। सुन्दरक! त्वमपि मद्वचनात् त्वरिततरं गत्वा वयस्यमङ्गराजं प्रबोधय न खलु जयाकाङ्क्षी भवानिदानीम्, अभिन्न एवायमावयोः संकल्पः, किन्तु,

(२)हत्वा पार्थान् सलिलमशिवं बन्धुवर्गाय दत्त्वा
मुक्त्वा बाष्पं सह कतिपयैर्मन्त्रिभिश्चारिभिश्च।
कृत्वा ऽन्योन्यं सुचिरमपुनर्भावि गाढोपगूढं
संत्यक्ष्यावो हततनुमिमां दुःखितौ निर्वृतौ वा॥

---

(१) अपनीतमपसारितं शरीरावरणं शरीराच्छादकं कवचं येन। अथवा अपनीतशरीररक्षकः मरणोद्यतस्य शरीररक्षके यत्नाभावात्।

(२) अशिवममङ्गलमन्त्येष्टिसमये देयं जलं दत्त्वा जलेन तर्पयित्वेत्यर्थः। अस्माकं दुःखेन दुःखिभिर्मन्त्रिभिरिरिभिः तेषामपि

---

* देव! अपनीतशरीरावरणः आत्मवधव्रततन्निश्चयः स्वयमेव समरं मार्गयते।

Digitized by Google

अथवा शोकं प्रति मया न किञ्चित् सन्देष्टव्यम्।

वृषसेनो न ते पुत्रो न मे दुःशासनो ऽनुजः।
त्वां बोधयामि किमहं त्वं मां संस्थापयिष्यसि (१)॥

सूत्र। जं देवो आणवेदि * इति निष्क्रान्तः।

दुर्यो। अये नेमिध्वनिरिव।

सूत। आयुष्मन् एष सद्य एव संवर्द्धितो नेमिध्वनिः (२)।

दुर्यो। नूनं परिजनोपनीतो रथः, गच्छ त्वं, सज्जीकुरु

सूत। यथाज्ञापयति देवः। इति निष्क्रम्य पुनःप्रविशति।

दुर्यो। विलोक्य। किमिति नारूढोऽसि।

स्वगर्वितनाशात् समानदुःखैः शत्रुभिश्च सह बाष्पं मुक्त्वा अपुनर्भावि जन्मान्तरे स्वकर्मानुसारेण विभिन्नस्थानविभिन्नजातिप्राप्त्या पुनः असम्भावनीयं गाढोपगूढं दृढालिङ्गनमन्योन्यं सुचिरं कृत्वा दुःखितौ हतबान्धवशोकेन सन्तप्तौ निर्दहतौ तद्दुःखप्रतीकारकरणेन तप्तौ सन्तौ इमां शोकव्याकुलां हततनुं त्यक्तावः नेदानीम्। अधुना वैरनिर्यातनाया अवश्यकर्त्तव्याया अवशेषत्वान्न तनुमोक्ष उचितइति भावः।

(१) संस्थापयिष्यसि शान्त्वयिष्यसि।

(२) एष श्रूयमाणः नेमिध्वनिः रथचक्रशब्दः सद्यएव श्रवणोत्तरकालएव संवर्द्धितः क्रमेण उपचितःध्वनिहेतोः क्रमशः सन्निहितत्वात् ध्वनिः क्रमेण पुष्ट इत्यर्थः तथाच रथः क्रमशः सन्निहितो भवतीत्याशयः।

---

* यद्देव आज्ञापयति।

Digitized by Google

सूत । एष खलु तातो ऽम्बा च सङ्गये(१)नाधिरूढौ देवदर्शनमनुप्राप्तौ ।

दुर्यो । कष्टमतिबीभत्स(२)माचरितं दैवेन, सूत ! गच्छ त्वं, स्यन्दनं तूर्णमुपपहर, अहमपि तातदर्शनं परिहरन्नेकान्ते तिष्ठामि ।

सूत । देव, त्वदेकशेषबान्धवावेतौ कथमिव न समाश्वासयसि ।

दुर्यो । सूत, कथमिव समाश्वासयामि विमुखभागधेयः, पश्य,

(३) अद्यैवावां रणमुपगतौ तातमम्बां च दृष्ट्वा,
भ्रातस्ताभ्यां शिरसि विनतो ऽहञ्च दुःशासनञ्च ।
तस्मिन् बाले प्रसभमरिणा प्राणिते तामवस्थां
पार्श्वं पित्रोरहमुपगतः किन्नु वक्ष्यामि ताभ्याम् ॥
तथाप्यवश्यं वन्दनीयौ गुरू । इति निष्क्रान्तौ ।

इति चतुर्थोऽङ्कः ।

---

(६) सङ्गयेन सह रथमधिरूढौ अम्बातातौ ।

(७) अतिबीभत्समतिनिन्दितमनभीप्सितमिति यावत् ।

(८) प्राणिते जीविते तस्मिन् दुःशासने तथाविधां शोणित मानर्थवत्तः विदारणरूपाम् ।

इति श्रीतारानाथतर्कवाचस्पति भट्टाचार्य विरचिते वेणीसंहारनाटक व्याख्याने सुन्दराख्यचतुर्थाङ्कव्याख्या ।

Digitized by Google

पञ्चमोऽङ्कः ।

ततः प्रविशति रथयानेन गान्धारी सञ्जयो धृतराष्ट्रश्च ।

धृत । वत्स! सञ्जय! कुरुकुलकाननैकशेषप्रवालो मे वत्सो दुर्योधनः कच्चित् जीवति वा, न वा ।

गान्धा । जाद! ज्जइ सच्चं जीवदि वच्छो, ता कत्थि, कधेहि तं उद्देसं । *

सञ्ज । नन्वेष महाराज एक एव न्यग्रोधच्छायायामुपविष्टस्तिष्ठति।

गान्धा । जाद! एआइ त्ति भणासि, किं णु क्खु सम्पदं तस्स भादुसदं पास्से णत्थि । *

सञ्ज । तात ! अम्ब ! अवतरतं स्वैरं रथात् ।

उ भौ । अवतरणं नाटयतः ।

ततः प्रतिशति सव्रीड़ोपविष्टो दुर्योधनः ।

---

*जात! यदि सत्यं जीवति वत्सः, तत्कस्मिन् कथय तमुद्देशम् ।

† जात! एकाकीति भणसि किन्नु खलु सांप्रतं तस्य भ्रातृशतं पार्श्वे नास्ति ।

Digitized by Google

सञ्ज। उपस्थित। विजयतां महाराजः, नन्वेष तातो ऽम्बया सह प्राप्तः, किं न पश्यसि महाराज!।

दुर्यो। वैलक्ष्यं नाटयति।

भृत।

(१) शल्यानि व्यपनीय कङ्कवदनैरुन्मोचिते कङ्कटे
बद्धेषु व्रणपट्टकेषु शनकैः कर्णे कृतापाश्रयः।
दूरान्निर्जितशात्रवान् नरपतीनालोकयन् लीलया
सह्या पुत्रक वेदनेति न मया पापेन पृष्टो भवान्॥

---

(१) कङ्कटे कवचे उन्मोचिते देहादपसारिते कङ्कस्य पक्षि विशेषस्य वदनमिव वदनं येषां तैः कुटिलाग्रैः शल्योद्धारणायत्नभेदैः शल्यानि शल्याग्रफलकानि शनैर्व्यपनीय अपसार्य तत्तत्क्षतशोषणार्थं व्रणपट्टकेषु व्रणशोषकौषधद्रव्यलिप्तपटखण्डेषु पट्टीति प्रसिद्धेषु बद्धेषु सत्सु हे पुत्रक दुःखितत्वादनुकम्पार्थे कः अनुकम्पिततस्तत, वेदना शल्योद्धारणजता पीड़ा सह्या सोढुं शक्या त्वयेतिशेषः इति पापेन शत्रुकृतपुत्रनाशात् दुर्भाग्यवता मया भवान् न दृष्टः पापेन मयेत्यनेन चात्मनः पुत्रशतनाशजन्यदुःखशल्यानि अधुनापि हृदयेऽवस्थितानि तानि च सह्यानीति मन्निदर्शनेन उद्धृतशल्यवेदनासहनं सुकरमिति ध्वनितम्। तस्य दुःखासहनाभावे हेतुं वदन् विशिनष्टि निर्जितशात्रवान् पराभूतरिपून् नरपतीन् लीलया अवज्ञयैव दूरादालोकयन् तथाच यदि वेदना न सह्या तदा कृतोऽद्यापि हिष्टावनिपतौ अवज्ञेतिभावः कर्णे कर्णमात्रे व्यपाश्रयः अनेन च सहायान्तराभावेऽपि नोत्साहहानिरिति सूचितम्।

Digitized by Google

धृतराष्ट्रो गान्धारी च सर्वतोभद्रेण आलिङ्गतः ।

गान्धा । वच्छ! अदिगाढ़प्पहारवेअणापज्जाउलस्स अम्हेसु वि ण दे पसरदि वाणी । *

धृत । वत्स दुर्योधन! किमकृतपूर्वैः(१)सम्प्रति मय्यपयमव्याहारः ।

गान्धा । वच्छ! जइ तुमं वि अम्हे णालवसि किं दानीं दुस्सासणो दुम्मरिसणो अण्णो वा आलविस्सदि† इति रोदिति ।

दुर्यो ।

(२) पापोऽहमप्रतिकृतानुजनाशदर्शी
तातस्य बाष्पपयसां तव चाम्ब! हेतुः ।
दुर्जातमत्र विमले भरतान्वयेऽपि
किं मां सुतक्षयकरं सुतदूत्यवैषि ॥

---

(१) पूर्वं न कृतः अकृतपूर्वः अव्याहारः मौनमितेति यावत् ।

(२) अप्रतिकृतस्य अनुजनाशस्य दर्शी हे अम्ब ! हे मातस्तव तातस्य चाश्रुजलानां हेतुः ।

---

* वत्स! अतिगाढ़प्रहारवेदनापर्य्याकुलस्य अस्मास्वपि न ते प्रसरति वाणी ।

† वत्स! यदि त्वमप्यस्मान् नालपसि किमिदानीं दुःशासनो दुर्म्मर्षणोऽन्यो वापलपिष्यति । तेषामभावाच्च कः पुनरालपिष्यतीत्यर्थः ।

Digitized by Google

गान्धा। जाद! अलं परिदेविदेण तुमं वि दाव एक्को अन्धजुअलस्स मग्गोवदेसओ चिरं जीव, किं मे रज्जेण वैरेण वा। *

दुर्यो। मातः किमप्यसदृशं विकृतं वचस्ते,
सुचरित्रिया क्व भवती क्व च दीनतैषा।
निर्वर्त्यसे सुतशतस्य विपत्तिमेतां,
त्वं नानुचिन्तयसि रक्षसि मामयोग्यम्।
नूनं विचेष्टितमिदं सुतशोकस्य।

सञ्ज। महाराज! किं वा अयं लोकवादो वितथः, न घटस्य कूपपाते रज्जुरपि तत्र प्रक्षेप्तव्येति।

दुर्यो। अपुष्कलमिदम् ननु उपक्रियमाणाभावे किमुपकरणेन। इति रोदिति।

धृत। दुर्योधनं परिष्वज्य। वत्स! समाश्वसिहि, समाश्वासय चास्मान् इमामतिदीनां मातरञ्च।

दुर्यो। तात! दुर्लभः समाश्वास इदानीं युष्माकं, किन्तु

---

* जात! अलं परिदेवितेन त्वमपि तावदेकोऽन्धयुगलस्य मार्गोपदेशकश्चिरं जीव, किं मे राज्येन वैरेण वा।

Digitized by Google

(१)कुन्त्या सह युवामद्य मया निहतपुत्रया।
विराजमानौ शोकेऽपि तनयाननुशोचतम्॥

गच्छ। जाद! एदं एव्व सम्पदं पभूदं तुमं वि दाव एक्को जीवसि कं अणं अणुसोइस्सं ता जाद! अकालो दे समरस्स पसीद एसो दे अञ्जली, णिवट्टेहि समरव्वावारादो,(२) अपच्छिमं करेहि वअणं।*

इत। वत्स! शृणु वचनं तवाम्बायाः मम च निहतापुषबन्धुवर्गस्य, पश्य,

---

(१) मया निहताः पुत्रा यस्यास्तादृश्या कुन्त्या सह विराजमानौ तुल्यदुःखतया स्पर्द्धया वा प्रकाशमानौ युवां सुतान् अनुशोचतम्। तथाच युवयोः पुत्रा यथा तत्पुत्रेण निहता एवं तत्पुत्रा अपि युवयोः पुत्रेण मया निहता इति विचिन्त्य शोकेऽपि चित्तस्थैर्यमाधत्तामिति भावः।

(२) वचनम् अपश्चिममपृष्ठगतं पुरोगतं पूज्यमिति यावत् कुरु।

---

* जात! एतदेव सांप्रतं प्रभुतं यत्त्वमपि तावदेको जीवसि, कमन्यमनुशोचिष्यामि, तज्जात! अकालस्ते समरस्य, प्रसीद एषते अञ्जलिः, निवर्त्तस्व समरव्यापारात्, अपश्चिमं कुरु वचनम्।

Digitized by Google

(१) दायादा न ययो र्बलेन गणिता स्तौ द्रोणभीष्मौ हतौ
कर्णस्यात्मजमग्रतः शमयतो भीतं जगत् फाल्गुनात्।
वत्सानां निधनेन मे त्वयि रिपुः शेषप्रतिज्ञोऽधुना
मानं वैरिषु मुञ्च तात ! पितरावन्धाविमौ पालय ॥

दुर्यो। समरात् प्रतिनिवृत्य किं मया कर्त्तव्यम् ।

गान्धा। जं पिदा दे विदुरो वा भणिस्सदि तं अणुचिट्ठ । *

सञ्ज। राजन्! एवमिदम् ।

दुर्यो । सञ्जय ! अद्याणुपदेष्टव्यमस्ति ?

---

(१) ययोर्बलेन दायादाः ज्ञातयो न गणिता अवज्ञाताः तौ । कर्णस्येत्यत्रापि यस्येति विपरिणमय्यान्वयितव्यम् यस्य कर्णस्य बलेन न गणिता इत्यर्थः । तस्य कर्णस्यात्मजं पुत्रं वृषसेनं तदग्रतएव शमयतः नाशयतः ततश्च येन तत् तत् स्वपुत्ररक्षणमेव कर्त्तुं नशक्तं तत्र जयाशा वृथेति भावः।मम शतपुत्रनाशने प्रतिज्ञावान् रिपुःअन्येषां मम वत्सानां निधनेन नाशनेन हेतुना त्वयि तद्विषयएवावशिष्टप्रतिज्ञः । अतः वैरिषु मानं गर्वम् "अहमेव तेभ्यः सर्वथा गरीयान् इति" बुद्धिं मुञ्च तत्त्यागे फलमाह इमौ आवां पालय वाक्यपालनेन युद्धाकरणेन आत्मरक्षणेन च पालयेत्यर्थः ।

---

* यत् पिता ते विदुरो वा भणिष्यति तदनुतिष्ठ ।

Digitized by Google

रङ्ग । राजन्! यावत् [प्राणितव्यं तावदुपदेष्टव्य भूमयो विजिगीषवः] प्रज्ञावताम् ।

दुर्यो । सक्रोधम् । शृणुमस्तावत् प्रज्ञावतः संप्रत्यनुरूपमुपदेशम् ।

धृत । वत्स ! युक्तवादिनि रङ्गये किमत्र क्रोधेन, यदि प्रकृतिमापद्यसे तदहमेव [कथयामि, श्रूयताम् ।]

दुर्यो । कथयतु तातः ।

धृत । वत्स ! किं विस्तरेण, सन्धत्तां भवानिदानीं युधिष्ठिरस्य समीप्सितेन पणेन ।

दुर्यो । तात ! तनयस्नेहवैक्लव्यादम्बा, बालिशत्वात् रङ्गयश्च, काममेवं ब्रवीतु, युष्माकमप्येवं व्यामोहः । अथवा प्रभवति पुत्रनाशजन्मा हृदयज्वरः, तात ! अस्खलितभ्रातृशतस्तदावधीरितवासुदेवशमोपन्यासः संप्रति दृष्टपितामहाचार्यानुजराजचक्रविपत्तिः शरीरमात्रस्नेहात्उदात्त(१)-

(४) उदात्तानामुत्तमानां पुरुषाणां व्रीड़ावहं लज्जाकरम् ।

[प्राणानाशास्तावदुपदेष्टव्याश्चपतयः]

[भवन्तं ब्रवीमि]

Digitized by Google

पुरुषव्रीड़ावहं असुखावसानञ्च कथमिव करिष्यति दुर्योधनः सह पाण्डवैः सन्धिम् । अन्यच्च नयवेदिन् सञ्जय !

हीयमानान् किल रिपून् नृपाः सन्दधते कथम् ।
दुःशासनेन हीनोऽहं सानुजः पाण्डवोऽधुना ॥

धृत । वत्स ! एवं गतेऽपि मत्प्रार्थनया किं न करोति युधिष्ठिरः । अन्यच्च [सर्वं दैवापकृष्टं(१)मन्यते] युधिष्ठिरः ।

दुर्यो । कथमिव ।

धृत । श्रूयतां प्रतिज्ञा युधिष्ठिरस्य, नाहमेकस्यापि भ्रातुर्निपत्तौ प्राणान् संधारयामीति, बङ्च्छलत्वात् संग्रामस्यानुजनाशं शङ्कमानो यथैव भवते(२)रोचते तथैवासौ शक्रः सन्धातुम् ।

सञ्ज । एवमिदम् ।

---

(१) सर्वं दैवापकृष्टं दैवाधीनम् सर्वदैवापकृष्टमिति पाठे भवद्भ्यइति शेषः तथाच तस्याहङ्कारित्वाभावात् सर्वतएवात्मापकर्षज्ञानं किं पुनर्भवद्भ्यः । पाठान्तरे सर्वमेवापकृतं भवद्भ्यः भवतां कृतमपकारं न मन्यते नानुस्मरतीत्यर्थः ।

(२) भवतइति रुच्यर्थानां प्रीयमाणः (पा० १, ४, ३३, सू०) संप्रदानसंज्ञायां चतुर्थी ।

[सर्वमेवापकृतं न मन्यते भवद्भ्यः ।]

Digitized by Google

गान्धा। उपपत्तियुत्तं पडिवज्जस्सु पिदुणो वअणं।*

दुर्यो। तात! अम्ब! सञ्जय!

एकेनापि विनाऽनुजेन मरणं पार्थैः प्रतिज्ञातवान्
भ्रातॄणां निहते शते विशहते दुर्य्योधनो जीवितुम्।
तं दुःशासनशोणिताशनमरिं भिन्दन् गदाकोटिभि
र्भीमं हिंसु न विक्षिपामि कृपणःसन्धिं विधास्यामहम्।

गान्धा। हा जाद दुस्सासण! हा दुम्मरिसण! हा विकण्ण! हा [वीरसदप्पसवणी गान्धारी दुक्ख-सदं पसूदा न सुदसदं।] †

सर्वे रुदन्ति।

सञ्ज। बाष्पमुत्सृज्य। तात! प्रतिबोधयितुं महाराजमिमां भूमिं युवामागतौ, तदालमपि तावत् संरभ्यताम्।

धृत। वत्स! एवं विमुखेषु भागधेयेषु त्वयि चामुष्मिन् मानबन्धमरिषु त्वदेकशेषजीवितावलम्ब-

---

* उपपत्तियुक्तं प्रतिपद्यस्व पितुर्व्वचनम्।

† हा जात दुःशासन! हा दुर्म्मर्षण! हा विकर्ण! वीरशतप्रसविनी गान्धारी दुःखशतं प्रसूता, न सुतशतम्।

[अस्सुदपूव्वा कस्स वि लोए ईदिसी विपत्ती।]

अश्रुतपूर्व्वा कस्यापिलोके ईदृशी विपत्तिः।

Digitized by Google

नेयं तपस्विनी गान्धारी कमवलम्बतां शरणम-
स्मान्।

दुर्यो। श्रूयताम्।

कलितभुवना भुक्तैश्वर्यास्थिरस्कृतविद्विषः
प्रणतशिरसां राज्ञां चूड़ासहस्रशतार्चिताः।
अभिमुखमरीन् प्रान्तः संख्ये हताः शतमात्मजा
वहतु सगरेणोढ़ां तातो धुरं सहितोऽनया॥
विपर्य्यये त्वस्याधिपतेरुल्लङ्घितः क्षात्रधर्म्मः स्यात्।

नेपथ्ये महान् कलकलः।

गान्धारी। आकर्ण्य सभयम्। सञ्जअ! किं एदं हाहा-
कारमिस्सं तूररसिदं सुणीअदि। *

सञ्ज। अभूमिरियमेवंविधानां भीरुजनानाम्।

धृत। वत्स सञ्जय! ज्ञायतामतिभैरवः खलु
विस्तारी हाहारवः, कारणेनास्य महता भवि-
तव्यम्।

दुर्यो। तात! प्रसीद, पराङ्मुखं खलु दैवम-
स्माकं यावदपरमपि किञ्चिदत्याहितं न आवयति
तावदेवाज्ञापय मां संग्रामावतरणाय।

---

* सञ्जय! किमेतत् हाहाकारमिश्रं तूर्यरसितं श्रूयते।

Digitized by Google

गान्धा । जाद ! मुहुत्तअं दाव मं मन्दभाइणीं समस्सासेहि । *

धृत । वत्स ! यद्यपि भवान् समराय कृतनिश्चयस्तथापि रहःपरप्रतीघातोपायश्चिन्त्यताम् ।

दुर्यो ।

(१)प्रत्यक्षं हतबान्धवा मम परे हन्तुं न योग्या रहः
किं वा तेन कृतेन तैरिह कृतं यन्न प्रकाश्यं रणे ॥

गान्धा । जाद ! एआइ तुमं को दे सहाअत्तणं करिस्सदि । †

दुर्यो । एकोऽहं भवतीसुतक्षयकरो मातःकियन्तोऽरयः
शाम्यं केवलमेतु दैवमधुना निष्प्राण्डवा मेदिनी ॥

---

(१) प्रत्यक्षमक्षिसमीपे हता बान्धवायैस्तादृशाः परे शत्रवः रहो गुप्ता हन्तुं न योग्याः प्रत्यक्षकृतापकाराणां प्रत्यक्षमेवापकारः कर्त्तुं योग्यः अन्यथा अयशः स्यादिति भावः । इह जगति रणे यत् कर्म्म तैरपि परैरपि प्रकाश्यं प्रशंसनीयं न भवति तेन कर्म्मणा कृतेन किं प्रयोजनमपि तु किमपि नास्तीत्यर्थः । दैवं भाग्यमेव शाम्यं शान्तिमनुकूलतामेतु भजताम् भाग्य शान्त्यैव मेदिनी निष्प्राण्डवा भवेत् "पौरुषं दैवसम्पत्त्या काले

---

* जात ! मुहूर्त्तं तावत् मां मन्दभाग्यां समाश्वासय ।

† जात! एकाकी त्वं, कस्ते सहायत्वं (साहाय्यं) करिष्यति ।

Digitized by Google

नेपथ्ये । कलकलानन्तरम् : भो भो योधा निवेदयन्तु भवन्तः कौरवेश्वराय, इदं महत् कदनं प्रवृत्तम् । अलमप्रियश्रवणपराङ्मुखतया, यतः कालानुरूपं प्रतिविधातव्यमिदानीम् । तथाहि,

(१)त्यक्तप्राजनरश्मिरङ्किततनुः पार्थाङ्कितै र्मार्गणै
र्वाहैः स्यन्दनवर्त्मनां परिचयादाक्षिप्यमाणः शनैः ।
वार्त्तामङ्कपते र्विलोचनजलैरावेदयन् पृच्छतां
शून्येनैव रथेन याति शिविरं शल्यः कुरून् कम्पयन्॥

फलति पार्थिवः । त्वयैतन्मनुष्यस्य पिण्डितं स्यात् फलावह मिति" स्मृत्या सर्वेषां कर्म्मणां दैवायत्तत्वस्य प्रतिपादनात् तदानु कूल्यमेव मार्गये नान्यसहायापेक्षेति भावः ।

(१) त्यक्तौ शोकवशात् मुक्तौ प्राजनरश्मि अश्वादि-चालन तोदनवल्गे "प्राजनं तोदनं तोत्र"मित्यमर प्रसिद्धः येन ताडयः पार्थाङ्कितैः पार्थनामाङ्कितैः संकुलयुद्धे हि कस्येमे शरा इति ज्ञापनाय योद्धृभिः शराः स्वस्व नामाङ्किताः क्रियन्तेइति युद्धमर्यादा । स्यन्दनवर्त्मनां वाहैः परिचयात् तेन अचालिता अपि अश्वाः संस्कारवशात् येन पथा गता स्तेनैव पथा प्रत्यागच्छन्तीत्यश्वानां स्वभावः । विलोचनजलै रश्रुजलैः पृच्छतां कर्णस्य वार्त्तां संवादमावेदयन् शून्येन रथिर हितेन कर्णस्य रथेन शिविरं सेनासन्निवेशस्थानं छावनीति प्रसि द्धस्थानं याति।

Digitized by Google

दुर्यो । श्रुत्वा । साशङ्कम् । सूत ! केनेदमविस्पष्ट-मशनिपातदारुणमुद्घोषितं, ज्ञायतां, कः कोऽत्र भोः ?

प्रविश्य संभ्रान्तः सूतः । हा हताः स्म । इत्यात्मानमपातयत् ।

दुर्यो । कथय कथय ।

सूत । आयुष्मन् ! किमन्यत्,

१)खल्वेन यथा शल्येन मूर्च्छितःप्रविशता जनौघोऽयम्
शून्यं कर्णस्य रथं मनोरथमिवाधिरूढेन ॥

दुर्यो । हा वयस्यकर्ण ! इति मोहमुपागत ।

गान्धा । जाद! समस्सासिहि समस्सासिहि ।*

सञ्ज । समाश्वसिहि समाश्वसिहि महाराज !

धृत । भोः कष्टं कष्टम् ।

भीष्मे द्रोणे च निहते य आसीद्बलखण्डनम् ।
पुत्रस्य मे सुहृत् प्रेयान् राधेयः सोऽप्ययं हतः ॥

---

(१) खल्वेनापि प्रविशता शल्येन यथा जनौघः मूर्च्छितो भवति तथा मनोरथमिव शून्यं कर्णशून्यं कर्णस्य रथमधि रूढेन शल्येन प्रविशता लोकौघः कुरुबलस्यजनौघो मूर्च्छितः ।

---

* जात ! समाश्वसिहि समाश्वसिहि ।

Digitized by Google

वत्स ! समाश्वासिहि समाश्वासिहि, भो हतविधे!
अन्धोऽनुभूतशतपुत्रविपत्तिदुःखः
शोच्यां दशामुपगतः सह भार्य्ययाहम् ।
अस्मिन्नशेषितसुहृद्गुरुबन्धुवर्गे
दुर्य्योधनेऽपि हि कृतो भवता निराशः ॥
वत्स! दुर्य्योधन! समाश्वासय तपस्विनीं मातरम् ।

दुर्यो । लब्धसंज्ञः ।

(१)अयि कर्ण! कर्णसुखदां प्रयच्छ मे
गिरमुद्विरन्निव मुदं मयि स्थिराम् ।
सततावियुक्तमकृताप्रियं प्रियं
वृषसेनवत्सल! विहाय यासि माम् ॥

इति पुनर्मोहमुपागतः ।
सर्वे समाश्वासयन्ति ।
दुर्यो समाश्वस्य ।

ममप्राणाधिके तस्मिन्नङ्गानामीश्वरे हते ।
उच्छ्वसन्नपि लज्जेऽहमाश्वासे तात ! का कथा ॥

---

(१) सततमवियुक्तमेकत्र स्थितत्वात् विरहाभावः एकत्रस्थितस्याप्रियकरणे लज्जता स्यात्तदपि नास्तीत्याह अकृताप्रियम् एवंभूतमित्रपरित्यागे कारणं विवक्षुः संबोधयति वृषसेनवत्सलइति न च पुत्र मम स्नेह इत्युक्तेः पुत्रवात्सल्यस्य सर्वतः प्रधानत्वात् तदनुरोधेनैव मां परित्यज्य वृषसेनं गतइति भावः ।

Digitized by Google

अपिच।

(१)शोचामि शोच्यमपि शत्रुकृतं न वत्सं
दुःशासनं तमधुना न च बन्धुवर्गम्।
येनातिदुःश्रवमसाधु कृतन्तु कर्णे
कर्त्ताऽस्मि तस्य निधनं समरे कुलस्य॥

गान्धा। जाद! सिढिलेहि दाव क्खणमेत्तं बाष्पमोक्खं। *

धृत। वत्स! क्षणमात्रं परिमार्जयाश्रूणि।

दुर्यो। मामुद्दिश्य त्यजन् प्राणान् केनचिन्न निवारितः।
तत्कृते त्यजतो बाष्पं किं मे दीनस्य वार्य्यते॥

धृत! केनेदमसम्भावितमसत्कुलान्तकरं कर्म्म कृतं स्यात्।

(२)धृत। आयुष्मन् एवं किल जनः कथयति।

भूमौ निमग्नचक्रश्चक्रायुधसारथेः शरैस्तस्य।

---

(१)शोच्यमपि अवश्यशोचनार्हं वत्समनुजं न शोचामि तदपेक्षयापि अतिस्नेहपात्रत्वात् अधिकशोच्ये कर्णे असाधु येन कृतं तस्य कुलस्य निधनं कर्त्तास्मि।

(२) भूमौ निमग्नं चक्रं यस्य। आसन्नकाले तस्य रथचक्रं "भूमिश्चक्रं पतत्वामिति ब्राह्मणेनाभिशापोदत्त" स्तेन भूमि निमग्नचक्रः साच कथा कर्णपर्वणि ४६ अध्यायेऽनुसन्धेया।

---

* जात! शिथिलय तावत् क्षणमात्रं बाष्पमोक्षम्।

Digitized by Google

छिनतः किलेन्द्रसूनोरस्मात्सेनाकृतान्तस्य ॥

दुर्यो । कर्णाननेन्दुस्मरणात् क्षुभितः शोकसागरः ।
वाड़वेनेव शिखिना पीयते क्रोधजेन मे ॥

अम्ब! तात! प्रसीदतम् ।

ज्वलनः शोकजन्मा मामयं दहति दुःसहः ।
समानायां विपत्तौ मे वरं संशयितुं रणे ॥

भृत । दुर्योधनं परिष्वज्य,

(१)भवति तनय! सत्यं संशयः साहसेषु
द्रवति हृदयमेतद्भीममुत्प्रेक्ष्य भीमम् ।
अनिकृतिनिपुणं ते चेष्टितं मानशौण्ड!
च्छलबहलमरीणां सङ्गरं हा हतोऽस्मि ।

---

(१) भीमं भीमसेनं भीमं भीषणकर्म्माणमुत्प्रेक्ष्य उद्भाव्य । एतद् हृदयं द्रवति त्रस्यतीत्यर्थः । ते तव चेष्टितं रणव्यापारः अनिकृतिनिपुणम् निकृतौ माठे अनिपुणमच्छलानुबन्धीत्यर्थः अरीणाञ्च सङ्गरं समरं बहुच्छलम् । न्यस्तशस्त्रस्य द्रोणस्य तैर्हिंसनात् छलबाहुल्यमित्येवं पराभवाशंसया हतोऽस्मि बहुच्छल पाण्डवकर्त्तृकभवन्नाशस्याशंसनेनाहमपि नष्ट इत्यर्थः जयो रन्ध्रप्रहारिणामित्युक्तेस्तेषां छलप्रहारित्वेन जयावश्यम्भावात् भवतश्च तन्नास्तीति विशेषणेनाह मानशौण्ड! हे मानप्रधान! छलयुद्धे लोकेऽपयशः स्यादिति तद्भीरुणा मानवता त्वया तत् न क्रियतेऽति समुदितार्थः ।

Digitized by Google

गत्वा । आर्य ! तेण एव्व सुदसदकदन्तेण विम्भो दरेण समं समलं मग्गसि । *

दुर्यो । अम्ब तिष्ठतु तावत् दुकोदरः ।

(१) पापेन येन हृदयस्य मनोरथो मे
सर्व्वाङ्गचन्दनरसो नयनामलेन्दुः ।
पुत्रस्त्वाम्ब! तव तात! नयैकशिष्यः
कर्णो हतः सपदि तत्र शराः पतन्तु ॥

सूत ! अलमिदानीं कालातिपातेन, सज्जं मे रथमुपहर । त्वच्चेद्विभेषि पाण्डवेभ्यः तिष्ठ गदामात्रसहाय एव समरभुवमवतरामि ।

सूत । अलमन्यथासम्भावितेन अयमहमागत एवेति निष्क्रान्तः।

---

(१) हृदयस्य मनोरथः अत्यन्ताभिलषणीयरूपः प्रेमास्पदत्वात् । सर्वाङ्गेषु चन्दनरसरूपः आह्लादनकरत्वात् नयनस्य इन्दुरूप तृप्तिसाधनत्वात् हे अम्ब ! मातस्तव पुत्रः पुत्रतुल्यः वात्सल्यास्पदत्वात् हे तात ! तव नयैकशिष्यः नये नीतौ एकशिष्यः प्रधानशिष्यः । एतादृशः कर्णो येन पापेन हतः निहतस्तस्मिन् शराः पतन्तु । तेनैव सह योत्स्येऽहमित्यर्थः ।

---

* तेनैव सुतशतक्षतान्तेन दुकोदरेण समं समरं मार्गयसे ।

Digitized by Google

धृत । वत्स दुर्योधन ! यदि स्थिर एवास्मान् दग्धुमयं ते व्यवसायस्तत् सन्निहितेषु वीरेषु सेनापतिः कश्चिदभिषिच्यताम् ॥

दुर्यो । नन्वभिषिक्त एव ।

गान्धा । कतरो उण सो जहिं एदं हदासं ओलम्बिअ ।*

धृत । किं वा शल्यः उत वा अश्वत्थामा ?

दुर्यो । (१) कर्णालिङ्गनदायी वा पार्थप्राणहरोऽपि वा ।
अनिवारितसम्पातैरयमात्माऽश्रुवारिभिः ॥

नेपथ्ये । कलकलं कृत्वा । भो भोः कौरवबलप्रधानयोधाः अलमस्मानवलोक्य भयादितस्ततो गन्तुम् कथयन्तु भवन्तः कस्मिन्नुद्देशे सुयोधनस्तिष्ठतीति ।

सर्वे ससंभ्रममाकर्षयन्ति ।

प्रविश्य संभ्रान्तः सूतः । आयुष्मन् !
प्राप्तावेकरथारूढौ पृच्छन्तौ त्वामितस्ततः ।

सर्वे । कश्च कश्च ?

---

(१) अभिषिक्तइति पूर्वोक्तानुकर्षेण आत्माभिषिक्तइत्यर्थः । हृहउद्देगाख्यं नाटकाङ्गं "नटपादिजनिता भीतिरुद्वेगःपरिकीर्त्तित" इति दर्पणे क्तेः ।

---

* कतरः पुनः स यत्रेमां हताशामवलम्बिष्ये ।

Digitized by Google

धृत ।

स कर्णारिः स च क्रूरो दृककर्म्मा(१)दृकोदरः ।

गान्धा । सभयम् । जाद ! किं एत्थ सम्पदं पडिपज्जिदव्वं । *

दुर्यो । ननु सन्निहितैवेयं गदा ।

गान्ध । हा हदल्हि अहं मन्दभाइणी । †

दुर्यो । अलमिदानीं कार्पण्येन । सञ्जय! सञ्जय! रथमारोप्य पितरौ शिविरं प्रवेशय । प्राप्तोऽस्म्यच्छोकापनोदप्रणयी जनः ।

धृत । वत्स ! क्षणमेकं प्रतीक्षस्व यावदनयो र्भीवसुपलभे ।

दुर्यो । तात ! किमनेनोपलम्भेन तद्गम्यताम् ।

धृतराष्ट्रो गान्धारी च किञ्चिद्गत्वा तिष्ठतः ।

ततः प्रविशतो रथारूढौ भीमार्ज्जुनौ ।

भीम । भो भोः सुयोधनानुजीविनः किमिति ससम्भ्रममयथातथं सञ्चरन्ति भवन्तः अलमावयोः शङ्कया ।

---

(२) दृकस्य व्याघ्रविशेषस्य कर्म्मेव कर्म यस्य क्रूरकर्मेत्यर्थः ।

---

*जात ! किमत्र प्रतिपत्तव्यम् ।

† हा हताऽस्म्यहं मन्दभाग्या ।

Digitized by Google

१)कर्त्ता द्यूतच्छलानां जतुमयशरणोद्दीपनः सोऽभिमानी
कृष्णाकेशोत्तरीयव्यपनयनमरुत् पाण्डवा यस्य दासाः
राजा दुःशासनादेर्गुरुरनुजशतस्याङ्गराजस्य मित्रं
क्षात्रे दुर्योधनोऽसौ कथयत न कृपा द्रष्टुमभ्यागतौ स्वः॥

धृत। सञ्जय! दारुणः खलु उपक्षेपः पापस्य।

सञ्ज। तात! कर्म्मणा कृतनिःशेषविप्रियाः संप्रति वाचा व्यवस्यन्ति।

दुर्यो। सूत! ब्रूहि गत्वोभयोः अयं तिष्ठतीति।

सूत। यथाज्ञापयति देवः। तावुपसृत्य। भो भो दृकोदरार्ज्जुनौ! एष महाराजस्तातेन अम्बया च सह न्यग्रोधच्छायायामुपविष्टस्तिष्ठति॥

अर्ज्जु। आर्य्य! प्रसीद, न युक्तं पुनश्शोकोपपीडितौ पितरौ पुनरस्माद्दर्शनेनोद्वेजयितुं, तद्गच्छावः।

भीम। मूढ! अनुल्लङ्घनीयः सदाचारः न युक्त-

---

(१) द्यूतमेव छलानि तेषां कर्त्ता जतुमयं जतुप्रचुरं प्राचुर्यार्थे मयट्शरणं गृहम् "शरणं गृहरक्षित्रो"रित्यमरः। तस्योद्दीपनः विरोचनद्वारा दाहकः। कृष्णायाः द्रौपद्याः केशस्य उत्तरीयस्य च व्यपनयने उपसारणं मरुदिव वायुरिव, पटुरिति दर्पणधृतपाठः। पाण्डवाः यस्य दासा द्यूतजयेन दासत्वेन संभाविताः। इह छलाख्यं सभाङ्गं "प्रियाप्रियैर्वाक्यैर्विलोभ्य छलनाच्छल"मितिदर्पणोक्तेः।

Digitized by Google

अनभिवाद्य गुरून् गन्तुम्। उपसृत्य। सञ्जय! पित्रो र्नमस्कृतिं श्रावय। अथवा तिष्ठ, स्वयमेव श्रावयावः। इति रथादवतरतः।

भीम। विस्मार्य स्वकर्म्म नाम च वन्दनीया गुरवः।

अर्ज्जु। उपगम्य। तात! अम्ब!

सकलरिपुजयाशा यत्र बद्धा सुतैस्ते
तृणमिव परिभूतो यस्य गर्व्वेण लोकः।
रणशिरसि निहन्ता तस्य राधासुतस्य
प्रणमति पितरौ वां मध्यमः पाण्डवोऽयम्॥

भीम।

(१)[चूर्णिताशेष]कौरव्यःक्षीवो दुःशासनासृजा॥
भङ्क्ता सुयोधनस्योर्व्वो र्भीमोऽयं शिरसाऽऽनति॥

धृत। दुरात्मन् वृकोदर! न खल्विदं भवतैव केवलं सपत्नानामपकृतं, यावत् क्षत्रं तावत् समर-

(१) निहता अशेषाः कौरवा यैः। दुःशासनासृजा तद्वक्षःस्थरुधिरपानेन क्षीवोमत्तःभङ्क्ता भाविभञ्जनकारी भविष्यदर्थे लृट्। इह व्यवसायनामकं नाटकाङ्गं "व्यवसायश्च विज्ञेयःप्रतिज्ञा हेतुसम्भव" इति दर्पणोक्तेः। इह निरुक्तिरलङ्कारः। "पूर्वसिद्धार्थ कथनं निरुक्तिरिति कीर्त्तित" मिति दर्पणोक्तेः।

[निहताशेष] दर्पणसम्मतपाठः।

विजयिनो जिता हताश्च वीराः, तत् किमेवं विक्ल-
त्वनाभिरस्मानुद्वेजयसि ॥

भीम। तात! अलमलं मन्युना।

(१)कृष्णा केशेषु कृष्टा तव सदसि वधूः पाण्डवानां दृपैर्ये
सर्वे ते क्रोधवह्नौ कृशशलभकुलावत्तया येन दग्धाः॥
एतस्मात् श्रावयेऽहं न खलु भुजबलश्लाघया नापि दर्पात्
पुत्रैः पौत्रैश्च कर्म्मण्यतिगुरुणि कृते तात! साक्षी त्वमेव

दुर्यो। अरे रे मरुत्तनय! किमेवं वृद्धस्य राज्ञः
पुरतो निन्दितव्यमात्मकर्म्म श्लाघसे। अपिच।

२)कृष्टा केशेषु भार्य्या तव तव च पशोरस्य राज्ञस्तयोर्वा
प्रत्यक्षं क्ष्मापतीनां मम भुवनपतेराज्ञया द्यूतदासी।
अस्मिन् वैरानुबन्धे वद किमपकृतं तैर्हता ये नरेन्द्रा
बाह्वोर्वीर्य्यातिभारद्रविणगुरुमदं मामजित्वैव दर्पः॥

---

(१) ये पापकारिणः ये च पापदृष्टारोऽनुमन्तारो वा ते सर्वेएव कृपाः येन खलतापराधेनैव हेतुना क्रोधवह्नौ कृष्णाक्रोधाग्नौ कृशं क्षुद्रं यत् शलभकुलं तदवत्तयैव तत्तुल्यानादरेणैव अनायासे नैवेत्यर्थः दग्धाइत्यस्मात् कारणात् श्रावये न तु, दर्पादिप्रकाशनाय यतः हे तात! त्वमति गुरुणि पुत्रपौत्रादिकृते कर्मणि साक्षी उदासीनः मध्यस्थः न तु तत्कर्मणि कर्त्तेत्यर्थः।

(२) तव तव च भीमार्जुनयोरुभयोः सम्बोध्यत्वात् तस्य

Digitized by Google

आः दुरात्मन्! एष न भवसि इति सक्रोधमुत्थाय हन्तुमिच्छति।

धृत। धृत्वोपवेशयति।

भीम। क्रोधं नाटयति।

अर्जुन! आर्य! किमत्र क्रोधेन।

(१)अप्रियाणि करोत्येष वाचा शक्तो न कर्म्मणा।
कृतभ्रातृवधो दुःखी प्रलापैरस्य का व्यथा।

भीम। अरे रे भरतकुलकलङ्क!

राज्ञः युधिष्ठिरस्य तयोः नकुलसहदेवयोर्वैलक्ष्येऽनादरे वा व्यापतीनां व्यापाराणाञ्च प्रत्यलं द्यूतदासी द्यूतेन जितत्वात् दासीव अपमानयष्टेराचरणयोग्यत्वात् क्रोशेषु क्षेपा। अस्मिन् वैरानुबन्धे विद्वेषजनके कर्मणि तैः तदृदृष्टभिर्दृष्टैः किमपक्षतमपराद्धं मदाज्ञयैव कृतत्वात् मामेव जित्वा गर्व्वायुक्तो नार्व्वागित्यर्थः। इह संफेटनामकं नाटकाङ्गं "संफेटो रोषभाषण"मिति दर्पणोक्तेः। दर्पणकृता तु अरे रे मरुत्तनयेत्यादिवाक्यमादावुद्भृत्येदं पद्यमुदाहृतं तेन गद्यपद्यसमुदायः संफेटः।

(१) यथा विकाररोगवतः प्रलापा एवंगतभ्रातृवधव्यसन विकारवतस्तस्यास्य कार्य्यासामर्थ्यं ध्वनितम्। इह क्षादनं नाटकाङ्गं "तदाक्षिप्तस्य क्षादनं पुनः। कार्य्यार्थमपमानादेः सहनं खलु बन्धने" दितिदर्पणोक्तेः।

Digitized by Google

(१) अतैव किं न विश्लेषयमहं भवन्तं
दुःशासनानुगमनाय कटुप्रलापिन्!
विघ्नं गुरुर्न कुरुते यदि मद्गदाग्र
निर्भिद्यमानरणितास्थनि ते शरीरे।

अन्यच्च मूढ!

(२) शोकं स्त्रीवन्नयनसलिलं यत् परित्याजितोऽसि
भ्रातुर्वक्षःस्थलविघटने यच्च साक्षीकृतोऽसि।
आसीदेतत् तव कुहृदयतेः कारणा जीवितस्य
क्रुद्धे युष्मत्कुलकमलिनीकुञ्जरे भीमसेने॥

---

(१) विश्लेषयं नाशयेयं मद्गदाग्रेण निर्भिद्यमानानि अतएव रणितानि शब्दायमानानि अस्थीनि यत्र ताडने शरीरे तथा करणे यदि गुरुस्तातोविघ्नं न कुर्यादित्यर्थः। अस्थिशब्दस्य मुख्य गौणपरत्वेऽपि अनङ् तेन पक्षे ऽनोऽल्लोपात् रूपसिद्धिः रणिता स्थनीति पाठस्तु प्रामादिकः अनङादेशस्य नित्यत्वात्।

(२) युष्मत्कुलं कमलिनीव सुखच्छेद्यत्वात् तव कुञ्जरे इस्ति सदृशे भीमसेने क्रुद्धे सति यत् स्त्रीवत् चक्षुर्जलं त्याजितोऽसि न पुनः प्रतिकर्त्तुं समर्थइति भावः। यच्च भ्रातृवक्षोविदारणे साक्षी कृतोऽसि जीवितस्य तवैतत्कारणा तीव्रवेदना "कारणातीव्रवेदने" त्यमरः।

Digitized by Google

दुर्यो। दुरात्मन्! भरतकुलाधम! द्यूतदास! पाण्डवपशो! नाहं भवानिव विकत्थनाप्रगल्भः। किन्तु,

(१)द्रक्ष्यन्ति न चिरात् सुप्तं पाण्डवास्त्वां रणाजिरे।
मद्गदाभिन्नवक्षोऽस्रिवेणिकाभीमभूषणम्॥

भीम। विहस्य। यद्येवं नाश्रद्धेयो(२)भवान्, तथापि प्रत्यासन्नमेव कथयामि।

(३)पीनाभ्यां मङ्गुजाभ्यां भ्रमितगुरुगदाघातसञ्चूर्णितोरोः
क्रूरस्याधाय पादं तव शिरसि रणां पश्यतां खः प्रभाते।
त्वन्मुख्यभ्रातृचक्रोद्वलनगलदसृक्चन्दनेनानखाग्रं
स्थानेनार्द्रेण चाक्तः स्वयमनुभविता भूषणं भीममस्मि॥

---

(१) मद्गदया भिन्नानि यानि यक्षोऽस्रीणि तेषां वेणिका प्रवाहः रुधिरप्रवाहः सैव भीमं भयानकं भूषणं यस्य तथाभूतम् "वेणी तु केशवेण्योः स्यात् प्रवाहेऽपि निगद्यते" इति धरणिः। ततः स्वार्थे कः।

(२) नाश्रद्धेयो न अश्रद्धेयो विश्वसनीयवचन इत्यर्थः।

(३) पश्यतां रणां पुरइति शेषः स्थानेन पिण्डीभूतेन घनेनेत्यर्थः। अक्तः लिप्तः सन् त्वमेव मुख्यो यस्य तादृशं यद्भ्रातृचक्रं भ्रातृवृतं तस्योद्वलनेन उन्मूलनेन गलन्ति यानि असृञ्जि रक्तानि तानि चन्दनवत् तेन भीमं भयानकं भूषणं श्वः परदिने स्वयमनुभविताऽस्मि। तथाच त्वां श्वो हन्तास्मीति भावः।

नेपथ्ये। भो भो भीमसेनार्जुनौ! एष खलु निहताशेषारातिचक्र आक्रान्तपरशुरामाभिरामयशाः (१) प्रतापतापितदिङ्मण्डलस्थापितस्वजनः श्रीमानजातशत्रुर्देवो युधिष्ठिरः समाज्ञापयति।

उभौ। किमाज्ञापयत्यार्यः।

पुनर्नेपथ्ये।

(२) कुर्वन्त्वाप्ता हतानां रणशिरसि जनावह्निसाद्देहभारान्
अश्रून्मिश्रं कथञ्चित् ददतु जलममी बान्धवा बान्धवेभ्यः।
मार्गन्तां ज्ञातिदेहान् हतनरगहने खण्डितान् गृध्रकङ्कै-
रस्तंभास्वान् प्रयातः सह रिपुभिरयं संहियन्तां बलानि॥

उभौ। यदाज्ञापयत्यार्य इति निष्क्रान्तौ।

नेपथ्ये। अरे रे गाण्डीवाकर्षणबाहुशालिन् अर्जुन! अर्जुन! क्वेदानीं गम्यते।

---

(१) निहताशेषेत्यादिविशेषणेन परशुरामतुल्यत्वसूचनम्।

(२) आप्ता बान्धवा देहभारान् देहसंघान् वह्निसात् कात्स्न्र्येन वह्निदेयान् कुर्वन्तु कात्स्न्र्येन न देयेऽर्थे सातिप्रत्ययः। तस्य करोतेर्व्यवधानेऽपि साधुत्वमिष्यते। अश्रून्मिश्रं रोदनजलमिलितं जलं ददतु। हतनरैर्गहने गहनतां दुर्गमतां प्राप्ते रणशिरसीत्यनुषङ्गः। रिपुभिर्दुर्योधनपक्षीयैः समं भास्वान् अस्तं प्रयातः प्रयातुमारब्धः तथाच राज्ञः शत्रवो यथा अस्तं नाशं गतः एवं रविरस्तमदर्शनम् गन्तुमारब्धस्त्यर्थः। अतोबलानि संहियन्ताम् नानास्थानस्थानि रणनिवारणपूर्वकमेकस्थीक्रियन्ताम्। दूतभक्तिर्नाटकाङ्कं "भक्तिःपुनर्भवेत् विरोधस्य प्रयमन" मिति दर्पणोक्तेः।

Digitized by Google

(१) कर्णक्रोधेन युष्मद्विजयि धनुरिदं त्यक्तमेतान्यहानि प्रौढं विक्रान्तमासीद्वन इव भवता शूरशून्ये रणेऽस्मिन्। स्पर्शं स्मृत्वोत्तमाङ्गे पितुरनवजितन्यस्तहेतेरुपेतः कल्पाग्निः पाण्डवानां द्रुपदसुतचमूधक्षरो द्रौणिरस्मि॥

धृत। आकर्ण्य सहर्षम्। वत्स दुर्योधन! द्रोणपरिभवोद्दीपितक्रोधपावकः पितुरपि समधिकबलः शिक्षावानमरोपमश्चायमश्वत्थामा प्राप्तः, तत्प्रत्युगमनेन तावदयं सम्भाव्यतां वीरः।

गाय्वा। जाद! पच्चुग्गच्छ एदं महाभागं। *

दुर्यो। तात! अम्ब! किमनेन अङ्गराजवधार्थंसिना वृथायौवनबलशस्त्रभरेण।

---

(१) एतान्यहानि व्याप्य कर्णक्रोधेन धनुस्त्यक्तमिदानीं तस्य नाशेन पुनर्गृहीतमिति भावः। मया धनुष्त्यागात् शूरशून्येऽस्मिन् वनइव रणे प्रौढं प्रगल्भमुत्कटमित्यर्थः। विक्रान्तं विक्रमः भावे क्तः। अनवजिता केनाप्यपराभूता न्यस्ता शौर्येण परित्यक्ता हेतिरस्त्रं येन तादृशस्य पितुरुत्तमाङ्गे स्पर्शं स्मृत्वा उत्तमाङ्गस्पर्शरूपापकारमनुचिन्त्य पाण्डवानां कल्पाग्निरिव द्रुपदचमूनां धक्षरो नाशको द्रौणिः अस्मि अहं उपेतः प्राप्तः।

---

* जात! प्रत्युद्गच्छ एतं महाभागम्।

Digitized by Google

धृत० । वत्स ! न खल्वस्मिन् काले पराक्रमवतामेवंविधानां वचनमात्रेणैवं विरागमुत्पादयितुमर्हसि ।

प्रविश्यात्मत्राणा विजयतां कौरवाधिपतिः ।

दुर्यो० । उत्थाय । गुरुपुत्रादूतमास्यतामिति स्वयमेवाभ्येति ।

अश्व० । राजन् दुर्योधन ।

(१) कर्णेन कर्णसुभगं बद्धं यत्तदुक्तं
यत् सङ्गरेषु विहितं विदितं त्वया तत् ।
द्रौणिस्त्वधिज्यधनुरापतितोऽभ्यमित्र
मेषोऽधुना त्यज नृपाप्रतिकारदुःखम् ॥

दुर्यो० । साध्वसूयम् । आचार्यपुत्र !

अवसाने ऽङ्गराजस्य योद्धव्यं भवता किल ।
ममाप्यन्तं प्रतीक्षस्व कः कर्णः कः सुयोधनः ॥

---

(१) कर्णेन कर्णसुभगं सुश्राव्यं न तु सफलमित्यर्थः । तदेव स्पष्टयति सङ्गरेषु युद्धेषु यत् कृतं तत्त्वयैव विदितं न कथनापेक्षेत्यर्थः । इदानीमभ्यमित्रमभित्रं शत्रुमभिमुखीकृत्य अधिज्य धनुर्ज्यामधिगतं धनुर्यस्य तादृशः सन् आपतितः आगतः अतः हे नृप ! अप्रतिकारदुःखं शत्रुकृतापकाराप्रतिकारकृतं दुःखं त्यज ।

(२) धनुर्ग्रहणे कर्णबधप्रतीक्षावत् ममापि बधः प्रतीक्ष्यतां कर्णस्य मम च एकत्वात् तदाह कः कर्णः कः सुयोधनः आवयोरभिन्नहृदयत्वादिति भावः ।

Digitized by Google

अश्व। कथमद्यापि सएव कर्णपक्षपातः अस्मासु च परिभवः, राजन् कौरवेश्वर! एवं भवतु इति निष्क्रान्तः।

धृत। वत्स! क एष ते व्यामोहः, अस्मिन् काले एवंविधस्य अश्वत्थाम्नः वाक्पारुष्येण अप-(१) रागमुत्पादयसि?

दुर्यो। किमस्याप्रियमनृतं (२)मयोक्तं किं वा नेदं क्रोधस्थानम्! ? पश्य,

(३)अकलितमहिमानं क्षत्रियैरक्षतारैः
समरशिरसि युष्मद्भाग्यदोषादिपन्नम्।
परिवदति समक्षं मित्रमङ्गाधिराजं
मम खलु कथयास्मिन् को विशेषोऽर्जुने वा॥

---

(१) अपरागमसन्तोषम्।

(२) किं मया अनृतं मिथ्या अथ चाप्रियमुक्तं येनायं क्रुद्धः स्यात् किन्तु सत्यवचनेनैवायं क्रुद्धइति भावः। इदं कर्णाधिक्षेपरूपं वचनं क्रोधस्थानं मम क्रोधावहं न अपि तु क्रोधावहमेव।

(३) क्षत्रियैः अकलितमहिमानं अविज्ञातमाहात्म्यं युष्मद्भाग्यदोषादिपन्नं विनष्टं मम मित्रमङ्गाधिराजं मम समक्षं परिवदति निन्दति अस्मिन् मित्रनिन्दके अर्जुने वा तद्घातके मम को विशेषः को भेदबोध उभयोरपि मित्रद्वेष्टृत्वात्तुल्यत्वमित्यस्मिन् क्रोधस्थानत्वं युक्तमेवेति भावः।

धृत। अथवा वत्स! तवापि कोऽत्र दोषः, अवसानमिदानीं भरतकुलस्य, गान्धारि! किमिदानीं करोमि मन्दभाग्यः। विचिन्त्य। भवत्वेवं तावत्, सञ्जय! मद्वचनात् ब्रूहि भारद्वाजमश्वत्थामानम्।

(१)स्मरति न भवान् प्रीतं स्तन्यं चिराय सहामुना
मम च रुदितं क्षौमं बाल्ये त्वदङ्गविवर्त्तनैः।
अनुजनिधनक्षीताच्छोकादतिप्रणयाच्च यद्
विकृतवचने माऽस्मिन् क्रोधश्चिरं क्रियतां त्वया॥

सञ्ज। यदाज्ञापयति तातः। इत्युत्तिष्ठति।

धृत। (२) अपि चेदमन्यत्त्वया वक्तव्यम्।
यन्नोचितस्तव पिता विदितेन पुत्र
यत्तादृशः परिभवः स तथाविधोऽभूत्।

---

(१) अमुना सुयोधनेन सह स्तन्यं गान्धारीस्तनभवं पयः प्रीतं बाल्ये त्वदङ्गविवर्त्तनैः तवाङ्गचालनैः मम क्षौमं वासः यत् रुदितम् एतन्न भवान् स्मरति अधुना अनुजशतबधक्षीतात् शोकात् किञ्च अतिप्रणयात् विकृतवचनेऽस्मिन् दुर्योधने क्रोधश्चिरं न क्रियताम् यदिति पूर्वार्द्धेऽन्वितम्।

२) तादृशः तादृशस्यात्यन्तमहिमार्णवस्य पितुः तथाविधः धृष्टद्युम्नकृतनैशिसुप्तादिरूपः सः श्रूयमाणः परिभवस्तिरस्कारः

एतद्विचिन्त्य बलमात्मनि पौरुषञ्च
दुर्योधनोक्तमपहाय विधास्यसीति ॥

वज्र । यदाज्ञापयति तात :। इति निष्क्रान्तः ।

दुर्यो । सूत ! सांग्रामिकं मे रथमुपकल्पय ।

सूत । यदाज्ञापयत्यायुष्मान् इति निष्क्रान्तः ।

धृत । गान्धारि! इतोवयं कट्टाधिपतेः शल्यस्य शिविरमेव (१) गच्छावः वत्स ! त्वमप्येवं कुरु,

इति परिक्रम्य निष्क्रान्ताः सर्वे ।

इति पञ्चमोऽङ्कः ।

एतद्विचिन्त्य अनुस्मृत्य बलपौरुषाभावेऽसमर्थस्य चेष्टा न भवतीत्याशङ्क्य तद्द्वयमपि तवास्तीत्याह बलं देहजा शक्तिः पौरुषं उत्साहातिशयः । विधास्यसि प्रतिविधास्यसीत्यर्थः ।

(१) सैनापत्ये तस्य वरणाय तत्र गमनमिति बोध्यम् ।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यविरचिते वेणीसंहार नाटकव्याख्याने दुर्योधननामपञ्चमाङ्कव्याख्या ।

Digitized by Google

षष्ठोऽङ्कः ।



ततः प्रविशति आसनस्थो युधिष्ठिरो द्रौपदी चेटी पुरुषश्च ।

युधि । विचिन्त्य निश्चित्य च ।

(१)तीर्णे भीष्ममहार्णवे कथमपि द्रोणानले निर्वृते
कर्णाशीविषभोगिनि प्रशमिते शल्ये च याते दिवम्।
भीमेन प्रियसाहसेन रभसाद्दुर्योधनावशिष्टे जये
सर्वे जीवितसंशयं वयममी वाचा समारोपिताः ॥

---

(१) भीष्मएव महार्णवस्तस्मिन् तीर्णे गतपारे सति द्रोणएवानलस्तस्मिन् कथमपि कैनापि रूपेण निर्वृते स्वयमस्त्यागेन शान्ते न तु जयादिना अतएव कथमपीत्युक्तम् । आस्यां दंष्ट्रायां विषं यस्य तादृशः भोगोदेहोविद्यते यस्य विषयुक्तसर्प इत्यर्थः । भोगः सुखे "स्यादिभृतावहेश्च फणकाययो" रित्यमरः । कर्णएवाशीविषभोगी महासर्पस्तस्मिन् प्रशमिते विनाशिते सति जये स्वल्पावशिष्टे दुर्योधनमात्रजयापेक्षणात् । साहसं बलेन क्रियमाणं युद्धादिकं साहसं प्रियं साहसं यस्य तेन भीमेन वाचा "अद्यैव सुयोधनं हनिष्यामि अद्याहनने स्वयं मरिष्यामीत्येवंरूप" प्रतिज्ञावाक्येन वयं सर्वे संशयं विजयसंशयं मरणसम्भावनां वा समारोपिताः गमिताः तत्प्रतिज्ञावश्रवणेन अदर्शनं गतस्य दुर्योधनस्यादर्शने युद्धाभावेन भीममरणसम्भावनया वयमपि सर्वे

Digitized by Google

द्रौप । सबाष्पम् । महाराज ! पञ्चालिए(१)त्ति किं ण भणिदं । *

युधि । कृष्णे ? ननु मया(२) पुरुषमवलोक्य । बुधक ।

पुरु । देव ! आज्ञापय ।

युधि । उच्यतां सहदेवः, क्रुद्धस्य वृकोदरस्यापर्युषितदारुणां(३)प्रतिज्ञामुपलभ्य प्रनष्टस्य मानिनः

तन्मरणेन मरिष्यामीति भावः । ड इह विरोधनं नाटकाङ्गं "कार्य्यान्तरयोपगमनं विरोधनमिति स्मृतमिति दर्पणोक्तेः । महार्णवद्रव्यत्व महोदधाविति दर्पणसम्मतः पाठः ।

(१) पाञ्चाल्या मया सर्वे संशयमारोपिता इति किं न भणितं भीमेन तदूरुभङ्गप्रतिज्ञाया मत्केशाम्बराकर्षणाजातकोपेनैव कृतत्वात् मया चासङ्गदुक्तेजनात् ममैव तद्दोषभागित्वं न तु भीमस्येति द्रौपद्याशयः ।

(२) प्रयोजकत्वेन द्रौपद्या आत्मनः कर्तृत्वे प्रतिपादिते ततोऽपि प्रयोजकतया राज्ञा आत्मनएव सर्व्वानर्थहेतुभूतद्यूतकर्तृत्वेनात्मनः प्रयोजकत्वेन कर्तृत्वमुररीक्रियते ननु मयेति ।

(३) अपर्य्युषिता अपरदिनगामिनी "अद्यैव हनिष्यामि अद्याहनने स्वयं मरिष्यामीत्येवंरूपा" अतएव दारुणा अद्याहनने स्वमरणफलकत्वात् प्रतिज्ञा तामुपलभ्य श्रुत्वा प्रनष्टस्य अदर्शनं गतस्य रुग्नस्येत्यर्थः ।

---

* महाराज ! पाञ्चाल्येति किं न भणितम् ।

Digitized by Google

कौरवराजस्य पदवीमन्वेष्टुमतिनिपुणमतयस्तेषु-तेषु स्थानान्तरेषु यथार्थाभिज्ञाः सुसचिवाश्च भक्तिमन्तः पटुपटहरवव्यक्तघोषणाः (१) सुयोधनपदसञ्चारवेदिनःप्रतिश्रुतधनपूजाप्रत्युपक्रियाश्चरन्तु समन्तात् समन्तपञ्चकम् । अपिच ।

(२)पङ्के वा सैकते वा सुनिश्चितपदवीवेदिनोयान्तु दाशाः [कुच्छेष्वा]क्रान्तवीरुन्निचयपरिचया वल्लवाः सञ्चरन्तु। व्याधा व्याघ्राटवीषु स्वपरपदविदो ये च रन्ध्रेष्वभिज्ञा ये सिद्धव्यञ्जना वा प्रतिमुनिनिलयं ते च चाराश्चरन्तु॥

---

(१) पटुना पटहरवेण ढक्काशब्देन व्यक्तं यथा तथा घोषयन्ति इति घोषणाः नन्द्यादित्वात्ल्युः सर्व्वत्र प्रसिद्धार्थं ढक्यामुच्चैर्वादयन्तः । "स्याद्यशः पटहोढक्के"त्यमरः ।

(२) ये चारा यत्र योग्यास्ते तत्र नियोज्या इत्युपदिशति । दाशाः कैवर्त्ताः "कैवर्त्ते दाशवीवरा"वित्यमरः । पङ्के पङ्किले जलादौ सैकते सिकतामयदेशे च नियोज्यास्तेषां जलप्रायदेशेष्वेव दक्षत्वात् । वल्लवा गोपाःकच्छेषु शुष्कतृणयुक्तस्थानेषु गोप्रचारस्यौपयोगितया तेषां तत्रैवाभिज्ञत्वात् कुच्छे विदर्जिते वीरुन्निचये लतासंघे परिचयो येषां तथाभूताःकुच्छेष्विति पाठे लतावेष्टितस्थानेष्वित्यर्थः। आक्रान्ते स्वयमावरणरूपेण परिष्कृते वीरुन्निचये परिचयो येषामिति वाक्यार्थः । व्याधाः व्याघ्रप्रधानाटवीषु नियो-

[कच्छेषु क्वचुं] क्वचित्पाठः ।

पुरु । यदाज्ञापयति देवः ।

बुधि । एवं वक्तव्यः सहदेवः ।

(१)
श्लेयाऽरहःशङ्कितमालपन्तःसुप्ताऽरुगार्त्ताश्च वने विज्ञेयाः
त्रासोऽरुगाणां वयसां विरावो नृपाङ्गपादप्रतिमाश्च यत्र॥

पुरु । यथाज्ञापयति देवः इति निष्क्रम्य पुनः प्रविश्य ।

सहदेवम् । देव, पाञ्चालकः प्राप्तः ।

बुधि । त्वरितं प्रवेशय ।

पुरु । निष्क्रम्य पाञ्चालकेन सह प्रविश्य । एष देवः उपसर्पतु पाञ्चालकः

पाञ्चा । जयतु जयतु देवः, प्रियमावेदयामि महाराजाय देव्यै च ।

बुधि । भद्र ! पाञ्चालक ! कच्चिदासादिता तस्य दुरात्मनः कौरवाधमस्य पदवी ।

ख्या यान्त रन्ध्रेषु। गर्त्तेषु सिद्धानां व्यञ्जनं लक्षणमिव व्यञ्जनं येषां ते सिद्धपुरुषचिह्नधारिणः प्रतिमुनिनिलयं सर्वमुनिस्थाने चरन्त तद्रूपाणामेव तत्र प्रवेशौचित्यात् ।

(१) नियुक्तचराणामन्वेषणप्रकारमुपदिशति श्लेयाइति रहसि निर्जने शङ्कितं सशङ्कं यथा स्यात्तथा आलपन्तः जनाः,अयं दुर्यो धनो नवेति अनुसन्धेयाः रुगार्त्ता रोगेण पीड़िताः सुप्ताजना-अपि तथा तद्बुद्ध्यानुसन्धेयाः । एवं निश्चेयमुक्ता २न्वेषणस्था-नमाह त्रासइत्यादि नृपाणां अङ्काश्चिह्नानि पद्मादीनि यत्र ता-दृशस्य पादस्य प्रतिमाः प्रतिप्रमूर्त्तयो यत्र तत्रान्वेष्टव्यइत्यर्थः ।

Digitized by Google

पाञ्च । देव ! न केवलं पदवी, सोऽपि दुरात्मा देवीकेशाम्बराकर्षणमहापातकप्रधानहेतुरुपलब्धः ।

युधि । सहर्षं पाञ्चालकं परिष्वज्य । साधु भद्र ! प्रियमावेदितम्, अथ दर्शनगोचरं गतः ?

पाञ्चा । देव ! समरगोचरं पृच्छ ।

द्रौपी सभयम् । कहं समरगोअरो वट्टइ मे णाहो । *

युधि । साशङ्कम् । सत्यं समरगोचरो मे वत्सः ?

पाञ्चा । सत्यं, किमन्यथा वक्ष्यते महाराजाय ।

युधि ।

(१)त्वत्तं विनापि विषयादुरुविक्रमस्य
चेतो विवेकपरिमन्थरतां प्रयाति ।
जानामि चोद्वतगदस्य वृकोदरस्य
सारं रणेषु [विजये] परिशङ्कितश्च ॥

(८) विषयात् त्वासहेतोर्विनापि त्वत्तं प्रहृत्या भीतं मे चेतो विवेकमन्थरतां भीमो जयी स्यात् नवेति निश्चयविषये मान्द्यं प्रयाति उरुविक्रमस्य महापराक्रमस्य भीमस्य रणेषु सारं बलं जानामि तथापि स्नेहवशादेव विजये परिशङ्कितः । भुजयोरिति पाठे भुजयोः सारमित्यन्वयः ।

* कथं समरगोचरो वर्त्तते मे नाथः ?

[भुजयोः] क्वचित् पाठः ।

द्रौपदीमवलोक्य मुखादस्रा बाष्पं नयति। अयि सुचरित्रिये!

(१) गुरूणां बन्धूनां क्षितिपतिसदस्यस्य च पुरः
पुराऽभूदस्माकं नृपसदसि योऽयं परिभवः ।
प्रिये प्रायस्तस्य द्वितयमपि पारं गमयतु
क्षयः प्राणानां वा कुरुपतिपशोस्तस्य निधनम् ।

अथवा कृतं सन्देहेन ।

(२) न्यूनं तेनाद्य वीरेण प्रतिज्ञाभङ्गभीरुणा ।
बध्यते केशपाशस्ते स चास्याकर्षणे प्रभुः ॥

पाञ्चालक! कथय कथय कथमुपलब्धः स दुरात्मा कस्मिन्नुद्देशे किमधुना प्रवर्त्तत इति ।

द्रौप। भद्द कहेहि कहेहि ।*

पाञ्चा। शृणोतु देवो देवी च, अस्मीह (३) देवेन

---

(१) हे प्रिये द्वितयमपि वक्ष्यमाणमुभयमेव प्रायः बाहुल्येन तस्य परिभवस्य पारमन्तं गमयतु आशंसायां लोट्। तदुभयमाह प्राणानां क्षयः तस्य वा निधनमेतदुभयमन्यतरं विना न तस्य परिभवस्य ग्लानिरित्यर्थः ।

(२) ते तव केशपाशः । केशसमूहः "पाशः पक्षस्य हस्तस्य कलापार्थाः कचात्परे इत्यमरः । अद्य तेन बध्यते संयम्यते बन्ध बन्धने इत्यस्य रूपम् अस्य केशपाशस्याकर्षणे प्रभुःप्रयोजकः सुयोधनश्च बध्यते बध हिंसायामित्यस्य रूपम् ।

(३) इह अस्मिन् विषये इदं वक्ष्यमाणवाक्यं तदर्थो वास्तीत्यर्थः।

---

* भद्रे कथय कथय ।

Digitized by Google

हते मद्राधिपतौ शल्ये गान्धारराजशकुनिभकुले सहदेवानलं प्रविष्टे सेनापतिनिधननराक्रन्दविरलयोधोज्झितासु समरभूमिषु रिपुपराजयोद्धतचलितविचित्तपराक्रमासादितविमुखारातिचक्रासु धृष्टद्युम्नाधिष्ठितासु च युष्मत्सेनासु प्रनष्टेषु कृपकृतवर्म्माश्वत्थामसु तथा दारुणां प्रतिज्ञामुपलभ्य कुमारवृकोदरस्य न ज्ञायते क्वापि प्रलीनः स दुरात्मा कौरवाधमः।

युधि। ततस्ततः।

द्रौप। अग्गदो कहेहि *।

पाञ्चा। अथवक्तां देवो देवी च। ततश्च भगवता वासुदेवेनाधिष्ठितमेकरथमारूढौ कुमारभीमार्জ্জुनौ समन्तात् समन्तपञ्चकं पर्य्यटितुमारब्धौ तमनासादितवन्तौ च। अवन्तरं देवमनुशोचति भाद्रशे भृत्यवर्गे दीर्घसुप्तञ्च निश्वसति कुमारवीभत्सौ, जलधरसमयनिश्वासञ्चारितविद्युत्प्रकरपिङ्गलैः कटाक्षैरादीपयति गदां वृकोदरे, यत्किञ्चनकारितामधिच्छिपति विधेर्भगवति नारायणे, कश्चित् संविदितः(४)

(४) सःविदितवृत्तान्तःसंविदितं विद्यतेऽस्येति अर्शआदित्वादच्।

* अयतः कथय।

कुमारस्य मारतेरुल्लिखितमांसभारः प्रत्यग्रविश्लसित मृगलोहितचरणनिवसनस्खरमाणोऽन्तिकमुपेत्य पुरुषः परुषश्वासग्रस्तार्द्धश्रुतवर्णानुमेयपदया वाचा कथितवान्, देव कुमार! अस्मिन् महतोऽस्य सरस्तीरे द्वे पदवती समवतीर्णपदप्रतिबिम्बे (१) तयोरेका जलोत्तीर्णा न द्वितीया, परत्र कुमारः प्रमाणमिति। ततः ससम्भ्रमं प्रस्थिताः सर्व्वे वयं तमेव पुरस्कृत्य गत्वा च सरस्तीरं परिज्ञाय सुयोधनपदलाञ्छितां पदवीमासाद्य भगवता वासुदेवेनोक्तं वृकोदर! जानाति किल सुयोधनः सलिलस्तम्भनीं विद्यां, नूनं तेन त्वद्भयात् सरसीमेनामधिशायितेन भवितव्यम्, एतच्च वचनमुपश्रुत्य बलानुजस्य सकलादक्प्रपूरितातिरिक्तमुद्भ्रान्तसकलसलिलचारिचक्रं त्रासोद्वेजनक्रमालोड़ितं सरः सलिलं भैरवञ्च गार्জ्जत्वा कुमारवृकोदरेणाभिहतम्, अरे रे वृथाप्रख्यातपातालोकपौरुषाभिमानिन् पञ्चालराजतनयाकेशाम्बराकर्षणमहापातकान् धार्त्तराष्ट्रापसद!।

(१) समवतीर्णं विन्यस्तं पदप्रतिबिम्बं पदप्रतिकृतिर्मोक्षाद ख्यौ।

(१)जन्मेन्दोर्विमले कुले व्यपदिशस्यद्यापि धत्से गदां
मां दुःशासनकोष्णशोणित[सुराक्लीवं रिपुं भाषसे]।
दर्पान्धो मधुकैटवद्विष हरावप्युद्वतं चेष्टसे,
मत्तात्सात् नपशो विहाय समरं पङ्केऽधुना लीयसे ॥
अपिच । भो मानान्ध! कौरवाधम !
२पाञ्चाल्याः क्रोधवह्निः स्फुटमुपशमितप्राय एष प्रसह्य
प्रोन्मुक्तः केशपाशैर्हृतपतिषु मया कौरवान्तःपुरेषु ।

(१) इन्दोश्चन्द्रस्य विमले कुले जन्म व्यपदिशसि । चन्द्रवंशे जातोऽसीत्येवं कथयसि ननु सहायाभावात् कथं योत्स्ये इत्याशङ्क्याह अद्यापि गदां धत्से गदासहायस्यान्यसहायापेक्षा नेति भावः । अथवा भ्रात्रादिबधेन निर्वेदे गदात्याग एवोचितः स च न कृत इत्यतोऽद्यापि युद्धश्रद्धास्तीति गम्यते इति भावः । मां दुःशासनस्य यत् कोष्णमीषदुष्णं प्रत्यग्रहृतत्वात् शोणितं तदेव मधु पाठान्तरे सुरा तेन क्लीवं मत्तं भाषसे मन्यसे वा मत्ततयावज्ञायसे इत्यर्थः । हे नपशो नराधम ! मत्तात्सात् मद्भीतितः पङ्केऽधुना लीयसे । इह द्युतिर्नाटकाङ्कं तर्ज्जनोद्वेजने प्रोक्ता द्युतिरिति दर्पणोक्तेः ।

(२) मया प्रसह्य बलात् हृतपतिषु कौरवाणामन्तःपुरेषु तद्वासिवामाजनेष्वित्यर्थः । प्रोन्मुक्तैः हृतपतिकत्वात् निर्बन्धने। केशपाशैः हेतुभिः पाञ्चाल्याः क्रोधवह्निः उपशमितप्रायः ।

[मधुक्लीवं रिपुं मन्यसे] क्वचित् पाठः ।

भ्रातु र्दुश्शासनस्य रुधिरमुरसः पीयमानं निरीक्ष्य क्रोधात्किं भीमसेने विहितमसमये यत्त्वयाऽस्तोऽभिमानः ; द्रौप। । णाह! अवणीदो मे मन्यु जइ पुणोवि सुलहं दंसणं भविस्सदि। १

युधि। कृष्णे नामङ्गलानि व्याहर्तुमर्हसि अस्मिन् काले। भद्रे! ततस्ततः।

पाञ्चा। देव! ततश्चैवं भाषमाणेन वृकोदरेण वीर्य्यक्रोधोद्वतभ्रमितभीषणगदापाणिना सहसैवोल्लङ्घिततीरसुत्सन्ननलिनमाविद्धमूर्च्छितग्राहमुद्भ्रान्तसमस्तशकुन्तमतिभैरवं वेगभ्रमितवारिसञ्चयमायतमपि सरः समन्ताद्वलोड़ितम्।

भ्रातुरुरसः रुधिरं पीयमानं निरीक्ष्य क्रोधात् भीमसेने मयि किं विहितं न किमपीत्यर्थः। असमये मया सह युद्धकरणस्येवायं समयः न तु पलायनस्य युद्धसमयेऽपि तदकृत्वा त्वया यत् यस्मात् अभिमानोऽहङ्कारः अस्तः त्यक्तः अतः न किमपि कर्त्तुं समर्थइत्यर्थः।

---

* नाथ! अपनीतो मे मन्यु र्यदि पुत्ररपि सुलभं दर्शनं भविष्यति।

Digitized by Google

(१)जन्मेन्दोर्विमले कुले व्यपदिशस्यद्यापि धत्से गदां
मां दुःशासनकोष्णशोणित[सुरास्त्रीवं रिपुं भाषसे]।
दर्पान्धो मधुकैटवद्विष हरावप्युद्वतं चेष्टसे,
मत्तासात् पशो विहाय समरं पङ्केऽधुना लीयसे ॥
अपिच । भो मानान्ध! कौरवाधम !
२पाञ्चाल्याः क्रोधवह्निः स्फुटमुपशमितप्राय एष प्रसह्य
प्रोन्मुक्तः केशपाशैर्हृतपतिषु मया कौरवान्तःपुरेषु ।

(१) इन्दोश्चन्द्रस्य विमले कुले जन्म व्यपदिशसि । चन्द्रवंशे जातोऽसीत्येवं कथयसि ननु सहायाभावात् कथं योत्स्ये इत्याशङ्क्याह अद्यापि गदां धत्से गदासहायस्यान्यसहायापेक्षा नेति भावः । अथवा भ्रात्रादिबधेन निर्वेदे गदात्याग एवोचितः स च न कृत इत्यतोऽद्यापि युद्धश्रद्धास्तीति गम्यते इति भावः । मां दुःशासनस्य यत् कोष्णमीषदुष्णं प्रत्यग्रहतत्वात् शोणितं तदेव मधु पाठान्तरे सुरा तेन स्त्रीवं मत्तं भाषसे मन्यसे वा मत्ततयावज्ञायसे इत्यर्थः । हे पशो नराधम ! मत्तासात् मद्भीतितः पङ्केऽधुना लीयसे । इह द्युतिर्नाटकाङ्गं तर्ज्जनोद्वेजने प्रोक्ता द्युतिरिति दर्पणोक्तेः ।

(२) मया प्रसह्य बलात् हृतपतिषु कौरवाणामन्तःपुरेषु तद्वासिनामाजनेष्वित्यर्थः । प्रोन्मुक्तैः हृतपतिकत्वात् निर्बन्धने। केशपाशैः हेतुभिः पाञ्चाल्याः क्रोधवह्निः उपशमितप्रायः ।

[मधुस्त्रीवं रिपुं मन्यसे] क्वचित् पाठः ।

Digitized by Google

भ्रातु दुश्शासनस्य रुधिरमसमये यत्त्वयाऽस्रोऽभिमानः
द्रौप। । णाह! अवणीदो मे मन्यु जइ पुणोवि सुलहं दंसणं भविस्सदि। १

युधि। कृष्णे नामङ्गलानि व्याहर्तुमर्हसि अस्मिन् काले। भद्रे! ततस्ततः।

पाञ्चा। देव! ततश्चैवं भाषमाणेन वृकोदरेण वीर्यक्रोधोद्वतभ्रमितभीषणगदापाणिना सहसैवोल्लङ्घिततीरमुत्सन्ननलिनमाविद्धमूर्च्छितग्राहमुद्भ्रान्तसमस्तशकुन्तमतिभैरवं वेगभ्रमितवारिसञ्चयमायतमपि सरः समन्तादवलोड़ितम्।

भ्रातुरुरसः रुधिरं पीयमानं निरीक्ष्य क्रोधात् भीमसेने मयि किं विहितं न किमपीत्यर्थः। असमये मया सह युद्धकरणस्येवायं समयः न तु पलायनस्य युद्धसमयेऽपि तदकृत्वा त्वया यत् यस्मात् अभिमानोऽहङ्कारः अस्तः त्यक्तः अतः न किमपि कर्त्तुं समर्थोऽस्यर्थः।

---

* नाथ! अपनीतो मे मन्युर्यदि पुनरपि सुलभं दर्शनं भविष्यति।

Digitized by Google

युधि । भद्र ! तथापि किं नोत्थितः ?

पाञ्चा । देव । कथं नोत्थितः ?

(१)त्यक्तोत्थितः सरभसं सरसः स मूल
मुद्भ्रान्तकोपदहनोग्रविषस्फुलङ्गः ।
आयस्तभीमभुजमन्दरवेल्लनाभिः
क्षीराम्बुधेः सुमथितादिव कालकूटः ॥

युधि । साधु सुक्षत्रिय ! साधु !

द्रौप । पडिवन्नो समलो ण वा । *

पाञ्चा । उत्थाय चास्मात् सलिलाशयात् कर-युगलोत्क्षिप्ततोरणीकृतभीमगदः कथयात्म, मा-कृते ! किं भवतो भयेन प्रलीनं दुर्योधनं कथयसि ? मूढ ! अनभिहतपाण्डुपुत्रः प्रकाशं लज्जमानो विश्रमितुमध्यवसितवानस्मि पातालम्, एव चोक्त वासुदेवकिरीटिभ्यां ह्रावयन्तः सलिलं निषिद्धसमर-

(१) स राजा सरसः सरोवरस्य मूलं समीपमाश्रयं सरभसं सवेगं त्यक्त्वा आयस्तौ आस्फोटितौ भीमभुजावेव मन्दरस्तेन वेल्लनाभिः आलनाभिः सुमथितात् आलोडितात् क्षीराम्बुधेरिव सरसः कालकूटइव उत्थितः ।

* प्रतिपन्नं समरं न वा ?

Digitized by Google

[समारब्धौ] भीमसुयोधनौ । आसीनश्च कौरवराजः क्षितितले गदां निक्षिप्य निहतकुरुप्रतगजवाजिनरप्रतकलेवरसंमर्दसंपतितगृध्रकङ्कजम्बूकमुत्पन्नसुयोधनबलमस्मद्वीरमुक्तसिंहनादसंबलितसमरतूर्यमबान्धवमभिबान्धवं कौरवसंग्रामस्थानमवलोक्य आयतमुष्णञ्च निश्वसितवान् । ततश्च दृकोदरेणाभिहितम्, अयि भोः कौरवराज ! कृतं बन्धुजनमन्युना मैवं विषादं कृथाः, पर्य्याप्ताः पाण्डवाः, सोऽहमसहाय इति, किञ्च,

(१)पञ्चानां मन्यसे ऽस्माकं यं सुयोधं सुयोधन !
[दंशितस्या]क्तशस्त्रस्य तेन तेऽस्तु रणोत्सवः ॥

इत्यञ्च श्रुत्वा किञ्चिदश्रुपातान्वितां दृष्टिं कुमारयोर्निक्षिप्योक्तवान् ।

कर्णदुःशासनबधात्तुल्यावेव युवां मम ।
अप्रियोऽपि प्रियो योद्धुं त्वमेकः प्रियसाहसः ॥

इत्युत्थाय परस्परक्रोधाच्चेपपरुषवाक्कलहप्रसारितघोरसंग्रामौ चित्रगदापरिघभासुरभुजभरौ म-

(१) दंशितस्य धृतवर्म्मणः आक्तशस्त्रस्य गृहीतायुधस्य ते तव संग्रामोऽस्तु ।

[स्थलमुत्तारितौ] क्वचित् पाठः ।
[वर्म्मितस्य] क्वचित् पाठः ।

खड्गैर्विहर्तुमारब्धौ भीमदुर्य्योधनौ । अहञ्च देवेन चक्रपाणिना देवसकाश मनुप्रेषितः । आह च देवो देवकीनन्दनः । अपर्य्युषितप्रतिज्ञे च भारतौ प्रनष्टे कौरवराजे महानासीन्मे विषादः । सम्प्रति पुनर्भीमसेनेनासादिते सुयोधने निष्कण्टकीभूतं भुवनतलं परिकलयतु भवान् । अभ्युदयोचिताश्च प्रवर्त्यन्तामनवरतमङ्गलसमारम्भाः । कृतं सन्देहेन ।

(१)पूर्य्यन्तां सलिलेन रत्नकलसा राज्याभिषेकाय ते,
क्षणात्यन्तचिरोञ्झिते च कबरीबन्धे करोतु क्षणम् ।
रामे घोरकुठारभासुरकरे क्षत्रद्रुमच्छेदिनि
क्रोधान्धे च वृकोदरे परिपतत्याजौ कुतः संशयः ॥

द्रौप । सवाष्पम् । जं देवो त्तिऊअणाहो आणवेदि तं कहं असहा भविस्सदि ॥ *

भाखा । न केवलमियमाज्ञाः असुरनिसूदनस्यादेशोऽपि ।

(१) क्षणमुत्सवम् इह प्ररोचना नाटकाङ्गम् "प्ररोचना तु विज्ञेया संहारार्थप्रदर्शिनी"ति दर्पणोक्तेः ।

*यत् देवस्त्रिभुवननाथ आज्ञापयति तत् कथमन्यथा भविष्यति ।

युधि । कोऽहि नाम भगवतां सन्दिष्टं विकल्पयति, कः कोऽत्र भोः ?

प्रविश्य कञ्चुकी । आज्ञापयतु देवः ।

युधि । देवस्य देवकीनन्दनस्य वक्ष्यमाणात् वत्सस्य विजयमङ्गलाशंसया प्रवर्त्यन्तां तदुचिताः समारम्भाः ।

कञ्चु । सोत्साहं परिक्रम्य । भो भोः संविधातॄणां पुरःसराः यथाप्रधानमन्तर्वेश्मनि दौवारिकाश्च एष खलु भुजबलपरिक्षेपोत्तीर्णकौरवपरिभवसागरस्य निर्व्यूढदुर्द्धरप्रतिज्ञाभारस्य सुयोधनानुजघ्नतोङ्गूननप्रभञ्जनस्य [ ]बलिनः प्राभञ्जने दुश्शासनोरःस्थलविदलननरसिंहस्य स्नेहपक्षपातिना मनसा मङ्गलानि कर्त्तुमाज्ञापयति देवो युधिष्ठिरः ।

आकाशे । किं ब्रूथ सर्व्वतोऽधिकतरमपि प्रदत्तं किं वा नालोकयसीति, साधु पुत्रकाः साधु, अनुक्तहितकारिता हि प्रकाशयति मनोगतां स्वामिभक्तिम् ।

[दुर्य्योधनोरुस्तम्भभङ्गविनिश्चितविजयस्य वृकोदरस्य] क्वचिदधिकःपाठः ।

Digitized by Google

युधि। आर्य्य जयद्रथ !

कर्ण। आज्ञापयतु देवः ।

युधि। गच्छ प्रियख्यापकं पाञ्चालकं पारितोषिकेण परितोषय ।

कर्ण। यदाज्ञापयति देवः ।

इति पाञ्चालकेन सह निष्क्रान्तः ।

द्रौप। महाराअ ! किं निमित्तं उण णाह भीमसेणेण सो दुराआरो भणिदो पञ्चाणं वि अम्हाणं जेण दे रोअदि तेण सह संगामो होदु त्ति, कहं णाम एदाणं महीसुदाणं एकदरेण पत्थिदो तेण संगामो भवे तदो अम्हाहिदं भवे । *

युधि। कृष्णे ! एवं मन्यते जरासन्धघाती, हतसकलबन्धुवीरानुजराजन्यासु कृपकृतवर्म्माश्वत्थामशेषासु एकादशसु अक्षौहिणीषु अबान्धवः शरीरमात्रविभवः कदाचिदुत्सृष्टनिजाभिमानो

---

* महाराज ! किं निमित्तं पुनर्नाथभीमसेनेन स दुराचारो भणितः पञ्चानामप्यस्माकं येन ते रोचते तेन सह संग्रामो भवत्विति । कथं नामैतयोः माद्रीसुतयोरेकतरेण प्रार्थितस्तेन संग्रामोभवेत् ततोऽस्माकहितं भवेत् ।

Digitized by Google

धार्त्तराष्ट्रः परित्यजेदायुधं, तपोवनं वा व्रजेत्, सन्धिं वा मिष्टमुखेन याचेत । एवं सति सुदूरमतिक्रान्तः प्रतिज्ञाभारो भवेत् सकलरिपुजयस्येति । समरं प्रतिपत्तुं पञ्चानामपि पाण्डवानामेकस्यापि नैव क्षमः सुयोधनः । अङ्के चाहं गदायुद्धं वृकोदरस्यैवानेन । अयि सुचविये ! पश्य ।

(१)क्रोधोद्भूर्णगदस्य नास्ति सदृशः सत्यं रणे मारुतेः
कौरव्येऽतिहस्तता पुनरियं देवे यथा सीरिणि ।
स्वस्त्यस्त्युद्धतधार्त्तराष्ट्रनलिनीनागाय वत्साय मे
अङ्के तस्य सुयोधनेन समरं नैवेतरेषामहम् ॥

नेपथ्ये । भोस्तृषितोऽस्मि, सम्भावयत कश्चित् सलिलच्छायासम्प्रदानेन माम् ।

युधि । आकर्ण्य । कः कोऽत्र भोः ?

प्रविश्य कञ्चुकी । आज्ञापयतु देवः !

युधि । ज्ञायतां किमेतत् ।

कञ्चु । यदाज्ञापयति देवः । इति निष्क्रम्य पुनः प्रविश्य । देव ! क्षुत्क्षामान् अतिथिरुपस्थितः ।

युधि । शीघ्रं प्रवेशय ।

कञ्चु । यदाज्ञापयति देवः । इति निष्क्रान्तः ।

---

(१) क्रोधेन उद्भूर्णा उद्धृता गदा येन गुरौ उद्यमने हस्तलाघात् कर्म्मणि क्तः । अतिहस्तता शीघ्रहस्तता शिक्षाकौशलमित्यर्थः उद्धत उत्कटः धार्त्तराष्ट्रएव नलिनी पद्मसंघातस्तस्य नाग रूपावयव ध्वंसाय स्वस्ति कुशलमस्तु ।

Digitized by Google

ततः प्रविशति मुनिवेशधारी चार्वाको नाम राक्षसः ।

राक्ष । आत्मगतम् । एषोऽस्मि सुयोधनस्य मिष्टं पाण्डवान् वञ्चयितुं भ्रमामि । प्रकाशम् । तृषितोऽस्मि सम्भावयतु मां कश्चित् जलच्छायाप्रदानेन इति राक्षसः समीपमुपसर्पति ।

सर्वे । उत्तिष्ठन्ति ।

युधि । मुने ! अभिवादये ।

राक्ष । अकालोऽयं समुदाचारस्य जलप्रदानेन सम्भावयतु माम् ।

युधि । मुने ! उपविश्यतामासने ।

राक्ष । उपविश्य । ननु भवतापि क्रियतामासन परिग्रहः ।

युधि । कः कोऽत्र भोः ।

प्रविश्य गृहीतभृङ्गारः कञ्चुकी । उपसृत्य । महाराज! शिशिरसुरभिसलिलसंपूर्णोऽयं भृङ्गारः पानभाजनं चेदम् ।

युधि । मुने ! निर्वर्त्यतामुदन्याप्रतीकारः ।

राक्ष । पादौ प्रक्षाल्य उपस्पृशन् । भोः भोः क्षत्रियस्वमिति मन्ये ।

Digitized by Google

युधि । सम्यग् वेत्ति भवान्, क्षत्रिय एवासि ।

राज्ञ । प्रतिदिनसुलभस्वजनविनाशनेषु संग्रामेषु युष्मत्तो नादेयं सलिलादिकम् । भवतु क्षायथैवानया सरस्वतीग्रिशिरतरङ्गस्पृशा मरुतानेन विगतक्लमो भविष्यामि ।

द्रौप । बुद्धिमदिए वीएहि महेसिं तालबिन्तेण ।*

चेटी । तथा करोति ।

राज्ञ । भवति ! अनुचितोऽयमस्मासु समुदाचारः ।

युधि । मुने ! कथं पुनरेवं भवान् परिश्रान्तः ।

राज्ञ । मुनिजनसुलभेन कौतूहलेन तत्रभवतां महाक्षत्रियाणां द्वन्द्वयुद्धमवलोकयितुं पर्य्यटामि समन्तपञ्चकम्, अद्य तु बलवत्तया भूरदातपस्य अपर्य्याप्तमेवावलोक्य गदायुद्धमर्ज्जुनसुयोधनयोरागतोऽस्मि ।

कञ्चु । मुने न खल्वेवं भीमसुयोधनयोरिति कथय ।

राज्ञ । आः ! अविदितवृत्तान्त एव कथं मामाक्षिपसि ।

---

* बुद्धिमतिके ! वीजयैनं महर्षिं तालवृन्तेन (व्यजनेन) ।

Digitized by Google

युधि । महर्षे कथय ।

राज्ञ । क्षणमात्रं विश्रम्य सर्व्वं कथयामि भवतो न पुनरस्य वृत्तस्य ।

युधि । कथय किमर्ज्जुनसुयोधनयोरिति ।

राज्ञ । पूर्व्वमेव कथितं मया प्रवृत्तं गदायुद्धं मर्ज्जुनसुयोधनयोरिति ।

युधि । न भीमसुयोधनयोरिति ।

राज्ञ । वृत्तं तत् ।

युधिष्ठिरो द्रौपदी च मोहमुपगतौ ।

कञ्चु । को सलिलमासिच्य । समाश्वसितु देवो देवी च ।

चेटी । समस्सासिदु समस्सासिदु देवी ।*

उभौ । संज्ञां लभेते ।

युधि । किं कथयसि मुने ! वृत्तं भीमसुयोधनयोर्गदायुद्धमिति ।

द्रौप । भअवं कहेहि किं वुत्तं त्ति । †

राज्ञ । कञ्चुकिन् ! कौ पुनरेतौ ।

कञ्चु । ब्रह्मन् ! एष देवो युधिष्ठिरः, एषा पञ्चालराजतनया ।

---

* समाश्वसितु समाश्वसितु देवी ।

† भगवन् ! कथय किं वृत्तमिति ।

Digitized by Google

राज्ञ । आः दारुणमुपक्रान्तं मया दृष्टांसेन ।

द्रौप । हा णाह ! भीम ! । इति मोहमुपगता । *

कञ्चु । किं नाम कथितम् ।

चेटी । समस्सासिदु समस्सासिदु देवी । †

युधि । साधु । ब्रह्मन् !

(१) पदे सन्दिग्ध एवास्मिन् दुःखमास्ते युधिष्ठिरः ।
वत्सस्य निश्चिते तत्त्वे प्राणत्यागादहं सुखी ॥

राज्ञ । सानन्दमात्मगतम् । अयं मे यत्नः । प्रकाशम् ।
यद्येवमवश्यकथनीयं संक्षेपेण कथयामि, न युक्तं बन्धुव्यसनं विस्तरेणावेदयितुम् ।

युधि । अश्रूणि मुञ्चन् ।
सर्व्वथा कथय ब्रह्मन् ! संक्षेपाद्विस्तरेण वा ।
वत्सस्य किमपि श्रोतुमेष दत्तः क्षणो मया ॥

राज्ञ । श्रूयताम् ।

---

(१) सन्दिग्धे संशयितेऽस्मिन् पदे विषये भीमोजीवति नवेत्येवंरूपे युधिष्ठिरः दुःखमास्ते वत्सस्य सोमस्य तत्त्वे जीवनाभावे निश्चिते सति अहं प्राणत्यागात् सुखी तन्मरणदुःखात् मरणं श्रेयस्करं मन्यमानः मरिष्यामीत्यर्थः ।

---

* हा नाथ ! भीम !

† समाश्वसितु समाश्वसितु देवी ।

Digitized by Google

तस्मिन् कौरवभीमयोर्गुरुगदाघोरध्वनौ संयुगे,

द्रौप। सहसोत्थाय। तदो तदो। *

राज। स्वगतम्। कथं पुनरनयोर्लब्धसंज्ञता मपनयामि। प्रकाशम्।

(१)सीरी सत्वरमागत स्त्विरमभूत्तस्याग्रतः सङ्गरः।
आलम्ब्य प्रियशिष्यतां तु हलिना संज्ञा रहस्याहिता
यामासाद्य कुरूत्तमः प्रतिकृतिं दुःशासनारौ गतः॥

बुधि। हा वत्स! वृकोदर! इति मोहमुपगतः।

द्रौप। हा णाह भीमसेण; हा मह परिभवपडिआरपरिच्चत्तजीविअ! जडासुरबअहिडिम्बकिम्मीरकीचअजरासन्धणिसूदण! सोअन्धिआहरणचाडुआर देहि मे पडिवअणं। इति मोहमुपगता। †

(१) सीरी बलरामस्तीर्थयात्राप्रक्रमात् तत्प्रसङ्गेन कुरुक्षेत्रे तद्दिवसे आगत इति गदापर्व्वस्थिता कथानुसन्धेया हलिना बलरामेण प्रियशिष्यतामालम्ब्य कौरवे संज्ञा संकेतविशेषः शक्तिरितिपाठे शक्तिःकौशलरूपा आहिता यां शक्तिमासाद्य कुरूत्तमः दुःशासनारौ भीमे प्रतिकृतिं प्रतीकारं गतः स्वात्मरणजन्यदुःखप्रतीकाररूपं तद्धननं कृतवानित्यर्थः।

* ततस्ततः।

† हा नाथ भीमसेन! हा मम परिभवप्रतीकारपरित्यक्तजीवित! जटासुरबकहिडिम्बकिर्म्मीरकीचकजरासन्धनिसूदन! सौगन्धिकाहरणचाटुकार! देहि मे प्रतिवचनम्।

Digitized by Google

कञ्चु। शास्त्रम्। हा कुमार भीमसेन! धार्त्तराष्ट्र-कुलकमलिनीप्रालेयवर्ष। महाराज! समाश्वासिहि समाश्वसिहि, भट्टे! समाश्वासय अत्रभवतीम्, महर्षे त्वमपि आश्वासय महाराजम्।

राज्ञ। स्वगतम्। आश्वासयामि प्राणांस्त्याजयितुम्। प्रकाशम्। अयि भोः भीमात्मज! क्षणमेकमाधीयतामाश्वासः कथाशेषोऽस्ति।

युधि। समाश्वस्य। महर्षे! किमस्ति कथाशेषः

राज्ञ। ततश्च हते तस्मिन् सुचरिते वीरसुलभां गतिमुपगते समग्रसङ्कलितं भ्रातृवधशोकजं बाष्पमुत्सृज्य भ्रातृवधशोकात् अपहाय गाण्डीवं प्रत्यग्रचतजच्छटाचर्चितां तामेव गदां भ्रातृहस्ताद् यत्नादाक्रम्य निवार्य्यमाणः सन्वित्सुना वासुदेवेन, आगच्छागच्छेति सोपहासं भ्रमितगदाभ्रूकारमूर्च्छितं गम्भीरवचनध्वनिना आह्वयमानः कौरवराजेन तृतीयोऽनुजस्ते किरीटी योद्धुमारब्धः। तथाकृतिनस्तस्य गदाघातान्निधनमुत्प्रेक्षमाणेन कामपालेन अर्जुनपक्षपाती देवकीसूनुः प्रयत्नात् स्वरथमारोप्य द्वारकां नीतः।

युधि। साधु भो अर्जुन! तदैव प्रतिपन्ना वृको

Digitized by Google

दरपदवी गाण्डीवं परित्यजता, अहं पुनः केनोपा येन प्राणापगमनमहोत्सवमुत्सहिष्ये ।

द्रौप । हा णाह! भादुवच्छल ! ण जुत्तं भादरं अच्चिक्खिदं गदाए अत्तुणो मुहं गच्छन्तं उवेक्खिदुं। *

इति मोहमुपगता ।

राज । ततश्चाहम्

युधि । भवतु मुने ! किमतःपरं श्रुतेन? हा तात भीमसेन! जतुगृहसमुद्रतरणयानपोत्र ! हा किर्म्मीरहिडिम्बासुरजरासन्धजयमल्ल ! हा कीचक-सुयोधनानुजकमलिनीकुञ्जर! हा द्यूतपणप्रणयिन्! मम शरीरस्थितिपरिखेदशङ्कासूदन ! हा मदाज्ञा-सम्पादक ! हा कौरवजनदावानल !

निर्लज्जस्य दुरोदरव्यसनिनो वृत्त! त्वया सेवता
भक्त्या मे समदद्विपायुतबलेनाङ्गीकृता दामता ।
किं नामापकृतं मया तदधिकं त्वय्यद्य निर्वत्स्यलं
त्यक्त्वाऽनाथमबान्धवं सपदि मां येनासि दूरं गतः ॥

द्रौप । उत्थाय । महाराज किं एदं वट्टइ ।†

* हा नाथ! भ्रातृवत्सल! न युक्तं भ्रातरम् अर्जुनं गदायां शत्रोर्मुखं गच्छन्तम् उपेक्षितुम् ।

† महाराज ! किमेतद्वर्त्तते ।

युधि। कृष्णे किमन्यत्।

स कीचकनिसूदनो वकबिडिम्बकिर्मीरहा
मदान्धमगधाधिपद्विरदसन्धिभेदाशनिः।
मदापरिघबाहिना भुजयुगेन तेनान्वितः
प्रियस्तव ममानुजो ऽर्जुनगुरुर्गतोऽसं किल॥

द्रौप। आकाशे दत्तदृष्टिः।णाह! भीमसेण! तुए किल मे केसा संजमिदव्वा, ण उण्णं वीरस्स खत्तियस्स पडिण्णादं मिढिलेदुं, ता पडिवालेहि मं जाव उवसप्पामि।* इति पुनर्मोहमुपगता।

युधि। आकाशे दत्तदृष्टिः। अम्ब पृथे! श्रुतोऽयं तव पुत्रस्य समुदाचारः, मामेकमनाथं विलपन्तमुत्सृज्य क्वापि गतः। तात! जरासन्धशत्रो! किं नाम वैपरीत्यमेतावता कालेन अल्पायुषि [ ] समालोकितं जनेन। अथवा भयैव बहूपलब्धम्।

---

* नाथ! भीमसेन! त्वया किल मे केशाः संयमयितव्याः, न पुनः वीरस्य क्षत्रियस्य प्रतिज्ञातं शिथिलयितुं, तत् प्रतिपालय मां यावदुपसर्पामि।

[त्वयि] अधिकः पाठः।

Digitized by Google

(१)दत्त्वा मे करदीकृताखिलनृपां यन्मेदिनीं लज्जसे
द्यूते यच्च पणीकृतोऽपि हि मया न क्रुध्यसि प्रीयसे।
स्थित्यर्थं मम मत्स्यराजभवने प्राप्तोऽसि यत् क्लृप्तता
न्येतानि विनश्वरस्य सहसा दृष्टानि चिह्नानि ते॥

मुने ! किं कथयसि तस्मिन् कौरवभीमयोः इति पठति ।

राज्ञ। एवमेतत् ।

युधि । धिङ्मम भाग्यानि ! आकाशमवलोकयन् ।

भगवन् कामपाल ! कृष्णाग्रज ! [ ]

(२)ज्ञातिप्रीतिर्मनसि न कृता क्षत्रियाणां न धर्म्यो
रूढं सख्यं तदपि गणितं नानुजस्यानुजे मे ।

---

(१) करदीकृता अखिला नृपा यस्यां तथाविधां मेदिनीं मे मह्यं दत्त्वा समर्प्य यत् लज्जसे लज्जितवानसि भूतसामीप्ये लट् । एवमुत्तरत्र । द्यूते मया पणीकृतोऽपि ग्लहत्वेन कल्पितोऽपि यच्च क्रुध्यसि क्रुद्धवान् किन्तु प्रीयसे प्रीतोऽसि । यच्च क्लृप्तता-पाचकत्वं प्राप्तोऽसि तानि कृतानि एतानि पूर्वोक्तानि कर्माणि सहसा विनश्वरस्य तव चिह्नानि लिङ्गानि दृष्टानि भविष्यतो विनयादिगुणाधिक्यं भवतीति लोकप्रसिद्धिः तथाच एतानि कार्याणि तवाचिरमरणानुमापकानीति भावः ।

(२) ज्ञातिः सपिण्डः पितृष्वस्रेयतया समानदेहावयवत्वेन

[सुभद्रात्रातः] दर्पणधृतः अधिकः पाठः ।

तुल्यः कामं भवतु भवतः शिष्ययोः स्नेहबन्धः
कोऽयं पत्या यदसि विमुखो मन्दभाग्ये मयि त्वम्॥

द्रौपदीमुपगम्य। अयि पाञ्चालि! उत्तिष्ठ उत्तिष्ठ समा नदुःखावेव आवां भवावः, मूर्च्छया किं मामेवमभिसन्धत्से।

द्रौप। लज्जसंज्ञा। बम्भेदु णाहो दुज्जोहणरुधिलाद्देण हत्थेण दुःसासणमोद्दं मे केसहत्थं। हञ्जे बुद्धिमदिए तव पञ्चक्खं एव्व णाहेण पडिस्सादं। कञ्चुकिनमुपेत्य। सन्दिट्ठं दाव मे देवकीणन्दणेण केस-

---

भीमादेस्तत्सपिण्डत्वम्। तस्मिन् या प्रीतिरनुरागः सा न गणिता नादता त्वयेतिशेषः। क्षात्रधर्मोऽपि न गणितः युद्धदृष्टिभिरपक्षपातिभिर्भवितव्यमिति हि क्षात्रधर्मः। तवानुजस्य वासुदेवस्य ममानुजे ऽर्जुने चिरं बहुकालं व्याप्य सख्यं मैत्री यत् रूढं तदपि न गणितं तदादरे हि तद्भ्रातृनाशनमनुचितमिति भावः। भवतः शिष्ययोः गदायुद्धेऽन्तेवासिनोः भीमसुयोधनयोरुल्लंघ्यैव स्नेहबन्धः। काममित्यवधारणे। स्नेहतुल्यत्वेऽपि एकस्य साहाय्यकरणमनुचितमिति भावः। वृह द्रवो नाटकाङ्क "द्रवोगुरुव्यतिक्रान्तिः शोकावेगादिसम्भवेति" दर्पणोक्तेः।

---

* बम्भ्रातु नाथो दुर्योधनरुधिरार्द्रेण हस्तेन दुःशासनमोचितं मे केशहस्तम्। हञ्जे बुद्धिमतिके तव प्रत्यक्षमेव नाथेन प्रतिज्ञातम्। सन्दिष्टं तावन्मे देवकीनन्दनेन केशरचना आरभ्य-

Digitized by Google

रअणा आरम्भीअदु त्ति ता उवणेहि मे फुल्लदामा-
इं, विरएहि दाव कबरीं, करेहि भअवदो पुरि-
सोत्तमस्स वअणं, णहि अलीअं मन्तेदि सो, अहवा
किं मए अदि संतप्ताए भणिदं अदूरगदं अज्जउत्तं
अणुगमिस्सं। युधिष्ठिरमुपगम्य। महाराअ आदीपअ
मे चिदां, तुमं बि खत्तधम्मं अणुवट्टन्तो एअ णाहस्स
जीविदहरस्स अभिमुहो होहि।*

युधि। युक्तमाह पाञ्चाली। कञ्चुकिन्! क्रिय-
तामियं तपस्विनी चितासंविधानेन सज्जवेदना,
ममापि सज्जं धनुरुपनय अलमथवा धनुषा।

तस्यैव देहरुधिरोक्षितपाटलाङ्गी
मादाय संयति गदामपविद्धचापः।
भ्रातप्रियेण कृतमद्य यदर्जुनेन
श्रेयो ममापि हि तदेव कृतं जयेन॥

---

*तामिति तदुपनय मे फुल्लदामानि, विरचय तावत् कबरीम्, कु-
रुष्व भगवतःपुरुषोत्तमस्य वचनम्, नह्यलीकं मन्त्रयते सः। अथवा
किं मया अतिसन्तप्तया भणितमदूरगतमार्यपुत्रमनुगमिष्यामि।
महाराज! आदीपय मे चितां, त्वमपि स्वधर्ममनुवर्त्तमान एव
नाथस्य जीवितहरस्याभिमुखो भव।

Digitized by Google

राज्ञ। राजन्! रिपुजयविमुखं ते यदि चेतः, तदा यत्र तत्र वा प्राणत्यागं कुरु, वृथा तत्र गमनम्।

कञ्चु। सरोषम्। धिङ् मुनिजनासहृद्यं राज्ञसस्य सहृद्यं भवता व्याहृतम्।

राज्ञ। सगतम्। किं ज्ञातोऽहमनेन। प्रकाशम्। भोः कञ्चुकिन् एतद्ब्रवीमि॥ तयोर्गदया खलु युद्धं प्रवृत्तमर्जुनदुर्योधनयोः। जानामि तयोर्गदाया भुजसारं, दुःखितस्य राजर्षेरपरमनिष्टश्रवणं परिहरन् एवं ब्रवीमि।

बुधि। बाढं विदूजन्। साधु महर्षे साधु! सुहृन्मधमभिहितम्।

कञ्चु। महाराज! किं नाम शोकान्धतया देवकल्पेनापि देवेन त्वया प्राकृतेनेव त्यज्यते स्वधर्मः।

बुधि। आर्य्य जयन्धर!

शृण्यामि नो परिघमीवरबाहुदण्डौ
वित्तेशशक्रवरुणाधिकवीर्यवन्तौ।
भीमार्जुनौ क्षितितले प्रविचेष्टमानौ
द्रष्टुं तयोश्च निधनेन रिपुं कृतार्थम्।

Digitized by Google

अयि पञ्चालराजतनये! मद्दुर्नयप्रोत्प्रणोदितदृशे! यथा संदीप्यते पावकस्तथा सहितावेव बन्धुजनं सम्भावयावः ।

द्रौप । अज्ज ! करेहि दारुसञ्चयं, कहं ण कोवि महाराअस्स वअणं करेदि, हा णाह ! अज्ज तुए विणा महाराओ परिअणेण वि परिहवीअदि ।*

राज्ञ । सदृशमिदं भरतकुलवधूनां पत्यनुमरणम् ।

युधि । महर्षे ! न कश्चित् शृणोति तावदावयो र्वचनं तदिन्धनप्रहानेन प्रसादः क्रियताम् ।

राज्ञ । सुनिजनविरुद्धमिदम् । स्वगतम् । पूर्णा मे मनोरथाः यावदनुपलक्षितः समीपेऽहमिन्धनमा दीपयामि । प्रकाशम् । राजन् ! न शक्नुमो वय-मवस्थातुमिति । निष्क्रान्तः ।

युधि । कृष्णे ! न कश्चिदस्मद्वचनं करोति, भवतु स्वयमेवाहं दारुसञ्चयं कृत्वा चितामादीपयामि ।

द्रौप । तुवरदु तुवरदु महाराओ ।

नेपथ्ये । कलकलः ।

---

*आर्य्य कुरु दारुसञ्चयम्, कथं न कोऽपि महाराजस्य वचनं करोति, हा नाथ ! अद्य त्वया विना महाराजः परिजनेनापि परिभूयते ।

Digitized by Google

द्वौ । सभयमाकर्ण्य । महाराज ! कस्स वि एसो तेजोबलदप्पिदस्स णिग्घोसो सुणीअदि अवरं वि अप्पियं सुणिदुं अत्थि निब्बन्धो तदो विलम्बीअदि । *

युधि । न खलु विलम्बते उत्तिष्ठ । इति सर्वे परिक्रामन्ति ।

युधि । अयि पाञ्चालि ! अम्बायाः समतीजनस्य च किञ्चित् सन्दिश्य निवार्यतां परिजनः ।

द्वौप । महाराज ! अम्बाए एवं सन्दिसिअं जो सो वअहिडिम्बकिम्मीरजरासन्धजअमल्लो वि ते मज्झमपुत्तो मम हदासाए पक्खवादेण परलोअं गदो त्ति । †

युधि । भद्रे बुद्धिमतिके! उच्यतामस्माद्वचनादम्बा ।

---

* महाराज ! कस्यापि एष तेजोबलदर्पितस्य निर्घोषः श्रूयते अपरमप्यप्रियं श्रोतुमस्ति निर्बन्धस्ततो विलम्बते ।

† महाराज ! अम्बायै एवं संदेक्ष्यामि यः स बकहिडिम्बकिर्मीरजरासन्धजयमल्लोऽपि ते मध्यमपुत्रो मम हतागायाः पक्षपातेन परलोकं गत इति ।

Digitized by Google

येनासि तत्र जतुवेश्मनि दीप्यमाने
निर्वासिता सह सुतै र्भुजयोर्बलेन ।
तस्य प्रियस्य बलिनस्तनयस्य पापं
कोऽन्यस्तवाम्ब कथयेत् कथमीदृशस्य ॥

आर्य्य जयन्धर ! त्वमपि सहदेवसकाशं गच्छ, (१)वक्तव्यश्च तत्रभवान् पाण्डुकुलबृहस्पतिर्वैमात्रेयः सकलकुरुकुलकमलाकरवाड़वानलो युधिष्ठिरः परलोकमभिप्रस्थितः प्रियमनुजमनुकूलं सततमार्यसंनीयम् असम्मूढं व्यसने ऽभ्युदये च धृतिमन्तं भवन्तमचिरमालिङ्ग्य शिरसि चाघ्राय चेदं प्रार्थयते ।

---

(१) तत्रेत्यादि रचनीयं शरीरमितिपद्यान्तं वचनं वक्तव्यइत्यर्थः । पाण्डुकुले बृहस्पतिरूपः प्रशस्तबुद्धिमत्त्वात् अतएव प्रशस्तबुद्धिशालितया प्रशंसनीयत्वात् तत्रभवानितिविशेषणम् । कुरुकुलमेव कमलानां जलानामाकरः समुद्रस्तत्र वाड़वानलरूपः अनिवार्यत्वात् । दावानलइति पाठे कमलानामाकरः समूहस्तत्र दावानलरूपःअनायासेन दाहादिनेव नाशकत्वात्। परलोकमभिप्रस्थितःप्रस्थातुमारब्धःउक्तविशेषणविशिष्टं भवन्तमालिङ्ग्य प्रणयेन शिरसि आघ्राय चेदं प्रार्थयते ।

Digitized by Google

(१)मम हि वयसा दूरेण त्वं श्रुतेन समोभवान्
कृतसहजया बुद्ध्या ज्येष्ठो मनीषितया गुरुः ।
शिरसि मुकुलौ पाणी कृत्वा भवन्तमतोऽर्थये,
मयि विरलतां नेयः स्नेहः पितुर्भव वारिदः ॥
अपिच, बाल्ये संवर्द्धितस्य नित्यमभिमानिनो ऽस्मत्सहग्रहृदयसारस्यापि नकुलस्य ममाज्ञया वचने स्थातव्यं नानुगन्तव्याऽस्मत्पदवी त्वयाहि वत्स !
(२)विस्मृत्यास्मान् श्रुतिविशदया स्वाग्रजौ चात्मबुद्ध्या
क्षीणे पाण्डावुदकपृषतानश्रुगर्भान् प्रदातुम् ।
दायादानामपि तु भवने यादवानां कुले वा
कान्तारे वा कृतवसतिना रक्षणीय शरीरम् ॥

---

(१) प्रार्थनीयमाह मम वयसा दूरेण हीन इत्यर्थः । भवान् श्रुतेन ज्ञानेन मम समस्तुल्यः। कृतसहजया बुद्ध्या सहजबुद्ध्या स्वाभाविकबुद्ध्येत्यर्थः। अहं ज्येष्ठत्वं पुनः मनीषितया बुद्धिमत्त्वेन गुरुर्ममाधिकः मान्यश्च । अतः कारणात् त्वयि गुरुत्वादित्यर्थः । शिरसि अञ्जलिं बद्धा अहमभ्यर्थये पितुर्वारिदोभव अस्माकं सर्वेषां मरणात् अन्यतर्पणकारकविरहेण तर्पणाभावो मा भूदिति तथाच त्वया ऽस्मत्पदवी नानुगन्तव्येत्यर्थः ।

(२) श्रुतिविशदया शास्त्रज्ञानेन निर्मलया आत्मबुद्ध्या स्वधिया विवेकधिषेत्यर्थः । अस्मान् माम् अस्मदेकत्वेऽपि विभा-

Digitized by Google

गच्छ जयन्धर ! अस्मच्छरीरस्पृष्टिकया(१)ग्रा-
पितेन भवताऽकालहीनमिदमवश्य मावेदनीयम्।

द्रौप। हला बुद्धिमदिए भणाहि मह वअ-
णेण पिअसखीं सुभद्दां बच्छाए उत्तराए चउट्ठो
मासो पडिवण्णस्स गब्भस्स, तुमं एव्व कुलपडिट्ठावअं
सावहाणं रक्खे त्ति। कदाबि दुहो लोअगदस्स सासु-
रकुलस्स अम्हाणं अ सलिलबिन्दुदो भविस्सदि त्ति।*

युधि। साधम्। भोः कष्टम्।

मयया वक्तव्यानुशासनात्। स्नाय्वजौ भीमार्जुनौ च विस्मृत्य शो-
कविमोचनेनाननुचिन्येत्यर्थः। पाण्डौ क्षीणे अस्मत्क्षयेण
तद्वंशक्षयात् क्षीणतां प्राप्ते सतीत्यर्थः। अस्मगर्भान् चक्षुर्जल
सहितान् उदकदृषतान् जलविन्दून् प्रदातुं दायादानां भवने
यादवानां यदुवंश्यस्त्रियाणां वा कुले तत्समीपे इत्यर्थः। अत्यन्त-
निर्वेदे कान्तारे दुर्गमवने वा कृतवसतिना कृतावासेन भवता
शरीरं रक्षणीयं न तु अस्माभिरिव त्याज्यमित्यर्थः।

(१) स्पृष्टिका स्पर्शः भावे क्तिन् ततः स्वार्थे कः शरीरस्य
स्पृष्टिकया देहस्पर्शेन ग्रापितेन दत्तशपथेनेत्यर्थः। अकालहीनम्
उचितकालेन न हीनम् अश्राद्धभोजीत्यादिवत् असमर्थसमासः।
अस्मन्मरणश्रवणे तेनाप्यनुमरणं यथा न विधेयं तथा ततः प्राग-
वावेदनीयमिति भावः।

---

*हला बुद्धिमतिके भण मम वचनेन प्रियसखीं सुभद्राम्, वत्-
साया उत्तरायाश्चतुर्थो मासः प्रतिपन्नस्य गर्भस्य, त्वमेव कुल-
प्रतिष्ठापकं सावधानं रक्षेति। कदापीतोलोकाद्गतस्य श्वशुर-
कुलस्यास्माकञ्च सलिलबिन्दवो भविष्यति।

Digitized by Google

(१)शाखारोधस्थगितवसुधामण्डले मण्डिताग्रे
पीनस्कन्धे सुसदृशमहामूलपर्य्यङ्कबन्धे ।
दग्धे दैवात् सुमहति तरौ तस्य सूक्ष्माङ्कुरेऽस्मिन्
आशाबन्धं कमपि कुरुते छायया ऽर्थी जनोऽयम् ॥

कञ्चुकिनमवलोक्य । जयन्धर ! अस्मच्छरीरेण शापितोऽसि तथापि न गम्यते ।

कञ्चु । साक्रन्दम् । हा देव पाण्डो ! तव सुतानामजातशत्रुभीमार्জ্জুननकुलसहदेवानामयं दारुणः परिणामः । हा देवि कुन्ति ! भोजराजभवनपताके !

---

(१) शाखारोधेन शाखावरणेन तद्व्याप्तेत्यर्थः । स्थगितमाच्छादितं वसुधामण्डलं यस्य, मण्डिता भूषिता आशा दिशो येन, सुसदृशः स्वरूपानुरूपः महामूलस्य पर्य्यङ्कबन्धः परितोऽङ्कबन्धवालवालरूपो यस्य ईदृशे तरौ पाण्डुवंशरूपवृक्षे दैवात् भाग्यवशात् दग्धे सति छायया अज्ञातत्वेन दुःखाभावेनेत्यर्थः । अर्थी अभिलाषी अयं मादृशः द्रौपदीरूपो जनोऽत्रा अस्मिन् उत्तरागर्भरूपे सूक्ष्माङ्कुरे कमपि आशाबन्धं कुरुते अनष्टसर्वसम्पत्तिकस्य इदानीमङ्कुरमात्रे आशालम्बनमतीवानित्यफलकमिति भावः ।

(२१)

Digitized by Google

(१)भ्रातुस्ते तनयेन शौरिगुरुणा म्लेच्छेन गाण्डीविन
स्तस्यैवाखिलधार्त्तराष्ट्रनलिनव्यालोलने दन्तिनः ।
आचार्य्येण दृकोदरस्य हलिनोन्मत्तेन मत्तेन वा
दग्धं तत् सुतकाननं तव मही यस्याश्रयाच्छीतला॥

इति रुदन्निष्क्रान्तः ।

युधि । जयन्धर ! जयन्धर !

प्रविश्य कञ्चुकी । आज्ञापयतु देवः ।

युधि । वक्तुमिच्छामि पुनरेतावन्ति भागधेयानि युष्माकं, यदि कदाचिद्विजयी स्याद्वत्सोऽर्ज्जुनस्तद्वक्तव्यो ऽस्मद्वचनाद्भवता ।

---

(१)ते तव भ्रातुस्तनयेन शौरेःकृष्णस्य गुरुणाऽग्रजेन गाण्डीविनोऽर्जुनस्य म्लेच्छेन तस्य सुभद्रापतितया तद्भ्रातेत्यर्थः। अखिला धार्त्तराष्ट्राएव नलिनानि सुखच्छेद्यत्वात् तेषां व्यालोलने उन्मूलने दन्तिनः हलिरूपस्य तस्यैव दृकोदरस्यैवाचार्य्येण गुरुणा हलिना तत् तव सुतकाननं भीमनाशनेनैवस्वर्वैषामपि नाशनादित्यर्थः । दग्धं यस्याश्रयान्मही शीतला । एवं जन्मादि संबन्धिनामप्येषां तेन हननमत्यन्तानुचितमेवेति ध्वनयन् विशिनष्टि मत्तेन मद्यादिना श्रीवेण उन्मत्तेन स्वाभाविकोन्मादरोगवता तत्राच मत्तोन्मत्तयोर्न कृत्याकृत्य विवेकइति भावः ।

Digitized by Google

(१)इयं हेतुः सत्यं भवति मम वत्सस्य निधने
तथाप्येष भ्राता सह जसुहृदस्ते मधुरिपोः ।
अतः क्रोधः कार्यो न खलु मयि च प्रेम भवता
वनं गच्छे मागाः पुनरकरुणां क्षात्रपदवीम् ॥

कञ्चु । यदाज्ञापयति देव । इति निष्क्रान्तः ।

बुधि । अग्निं दृष्ट्वा सहर्षम् । ननूद्भूतग्निशिखाहस्ताङ्ग-
तास्मद्विधव्यसनिजन (२)मिन्द्रो भगवान् कृताग्न-
स्त्वेन्धनमात्मानं करिष्ये ।

---

(१)सहजसुहृदः स्वाभाविकबान्धवस्य "आत्मपितृःस्वसृःपुत्रा आत्ममातृःस्वसृःसुताः । आत्ममातुलपुत्रास्तु विज्ञेया ह्यात्मबान्धवा" इति स्मृत्युक्तेः।तथाच पितृःष्वस्रेयादीनां सहजमित्रत्वेऽपि कृष्णस्येव बलभद्रस्यापि तथात्वात् तदनुक्त्वा कृष्णभ्रातृत्वेनेह कथनं तस्य स्वाभिमित्रत्वद्योतनार्थमथवा नरनारायणरूपयो-स्तयोः सहजमित्रत्वम् अनलानिलयोरिव पुराणे प्रसिद्धम् तदेवेह याच्ञां तेन जन्मावधि सुहृदः भवान्तरेऽपि सुहृदस्त्वर्थः । क्रोधः कृत्तिनीति शेषः । त्वया न कार्यः यदि मयि प्रेम स्नेहः तदा वनं गच्छेःअकरुणां दयाशून्यां क्षात्रपदवीं क्षत्रियधर्म्यं युद्धा-दिकं मागाः नावलम्बस्व तथाच वैराग्यमेवालम्बस्वेत्याशयः ।

(२)उद्भूतग्निरेव हस्तस्थेनाहतोऽस्मद्विधो व्यसनिजनो दुःखि-जनो येन ।

Digitized by Google

द्रौप। पसीददु महाराओ मम दुस्सिणा अवच्छिमेण पणाएण, अहं एव्व अग्गदो गमिस्सं *

युधि। यद्येवं सहितावेवाभ्युदयमपि मोक्षावहे।

भेटी। हा भगवन्तो लोअवाला परित्तायह सोमवंसराएसिं अयं खलु राआ राअसूअसंतप्पिदुड्डवहो खण्डवसंतप्पिदुड्डवहस्स किरीडिणो जेट्ठो भादा सुगहीदणामधेओ महाराअजुहिट्ठिरो, एसा देवी पञ्चालराअकुलदेवदा वेदिमज्झा संभवा जण्णसेणी, दुवे वि सरीरेण णिक्करुणस्स कालाणलस्स दुज्झणीहोन्ति, परित्तायह परित्तायह। उभयोरुभतः पतित्वा। किं ववसिदं देवीए देवेण अ। †

---

* प्रसीदतु महाराजः! ममानेनापश्चिमेन प्रणयेन अहमेवाग्रतो गमिष्यामि।

† हा! भगवन्तो लोकपालाः! परित्रायध्वं, सोमवंशराजर्षिम् अयं, खलु राजा राजसूयसंतर्पितद्विजवरः खाण्डवसंतर्पितद्विजवरस्य किरीटिनो ज्येष्ठो भ्राता सुगृहीतनामधेयो महाराजयुधिष्ठिरः, एषा देवी पाञ्चालकुलदेवता यज्ञवेदिमध्यसम्भवा याज्ञसेनी द्वावपि शरीरेण निष्करुणस्य कालानलस्य दुर्धर्षणीभवतः, परित्रायध्वं परित्रायध्वम्। किं व्यवसितं देव्या देवेन च।

Digitized by Google

युधि । अयि बुद्धिमतिके यन्नाथेन(१)प्रियानुजेन विना सदृशं तत् । उत्तिष्ठ उत्तिष्ठ सलिलमुपानय ।

चेटी । जं देवो आणवेदि । इति निष्क्रम्य पुनः प्रविश्य च । जेदु जेदु महाराओ । *

युधि । पाञ्चालि ! त्वमपि तावत् स्वपक्षपातिनो वृकोदरस्य प्रियस्यार्जुनस्योदकक्रियां कुरु ।

द्रौप । महाराअ एव्व करेदु अहं उण जलणं पविसिस्सं । †

युधि । अनतिक्रमणीयं लोकवृत्तं, भद्रे ! उदकमुपानय ।

चेटी । तथा करोति ।

युधि । पादौ प्रक्षाल्योपस्पृश्य च । एष तावत् सलिलाञ्जलिर्गाङ्गेयाय भीष्माय गुरवे प्रपितामहाय(२) प्राक्तनवे पितामहाय चित्रवीर्याय । साक्षम् ।

---

(१) द्रौपद्या नाथेन, मम च प्रियानुजेन विना यत् सदृशं तत् व्यवसितमित्यर्थः ।

(२) पितामहस्य चित्रवीर्यस्य ज्येष्ठभ्रातृत्वेन पितृतुल्यत्वात् भीष्मे प्रपितामहत्वकथनं द्रष्टव्यम् ।

---

* यद्देव आज्ञापयति । जयति जयति महाराजः ।

† महाराज एव करोतु, अहं पुनर्ज्वलनं प्रवेक्ष्यामि ।

Digitized by Google

तात तवाधुनाऽवसरः । अयमपि तत्रभवते स्वर्ग-स्थाय गुरवे सुष्टहीतनाम्ने (१)पित्रे पाण्डवे ।

अद्य प्रभृति वां दत्तमक्षय्यो दुर्लभं पुनः ।
तात त्वयाऽम्बया सार्द्धमेतद्दत्तं निपीयताम् ॥

एतज्जलं जलजनीलविलोचनाय
भीमाय भोस्तव ममाप्यविभक्तमस्तु ।
एकं क्षणन्तु विषहस्व पिपासितोऽपि
पातुं त्वया सह जवादयमागतोऽस्मि ॥

अथवा सुचरितयाणां गतिमुपगतं वत्स(२)महं मृतोऽप्यकृती द्रष्टुम् । वत्स भीमसेन !

(३)मया पीतं पीतं तदनु भवताऽस्वास्तनयुगं
मदुच्छिष्टैर्तृप्तिं जनयसि रसैर्वत्सलतया ।
वितानेष्वेवं तव मम च सोमे विधिरभूत्
निवापाम्भः पूर्वं पिबसि कथमेवं त्वमधुना ॥

कृष्णे ! देहि जलाञ्जलिं तत्रभवते भीमाय ।

---

(१) सुष्टहीतनाम्ने प्रातःस्मरणीयाभिधेयाय "स सुष्टहीतनामा स्यात् यः प्रातरनुचिन्त्यते" इत्युक्तेः ।

(२) अहं मृतोऽपि तन्मरणादनुमृतोऽपि युद्धमृतं वत्सं द्रष्टुमक्षती न समर्थः तस्य युद्धमरणेन ब्रह्मलोकावाप्तेर्मम चातथा मरणेन न तत्स्थानप्राप्तेरिति भावः ।

(३) वितानेषु अग्न्याधानादिषु सोमे सोमयोगे एवं सर्वत्र

द्रौप । हञ्जे बुड्ढिमदिए देहि मे उदअं । *

चेटी । तथा करोति ।

द्रौप । उपहत्थ । जलाञ्जलिं पूरयित्वा । कस्स जलं देस्सि । †

युधि । तस्मै देहि जलं पूर्व्वं सहसा गच्छते दिवम् ।
अद्यापि येन गान्धार्य्या रुदितेन समीकृता ॥

द्रौप । णाह! परिजणोवणीदं सग्गगदस्स पादोदअं भविस्सदि एदं । ‡

युधि । फाल्गुनाग्रज !
असमाप्तप्रतिज्ञोऽपि याते त्वयि ममानुजे ।
मुक्तकेश्यैव ते दत्तः प्रियया सलिलाञ्जलिः ॥

द्रौप । उट्ठेहि महराअ! दूरं गच्छदि दे भादा । **

युधि । दक्षिणाक्षिस्पन्दनं सूचयित्वा । पाञ्चालि ! निमित्तानि मे कथयन्ति सम्भावयसि दृकोदरमिति, भवतु शीघ्रं दर्शनमुपसर्पावः ।

आवयोः पूर्व्वापरीभूतो विधिरभूत् अधुना त्वं निवापाम्भः तर्पणजलं पूर्व्वं पिबसि मामतिक्रम्य तदृजलपानं तवानुचितमित्यर्थः ।

---

* हञ्जे बुद्धिमतिके देहि मे उदकम् ।
† कस्य जलं दास्यामि ।
‡ नाथ! परिजनोपनीतं स्वर्गगतस्य पादोदकं भविष्यत्येतत् ।
** उत्तिष्ठ महाराज ! दूरं गच्छति ते भ्राता ।

Digitized by Google

द्रौप। आः प्रज्वलितो भगवं हुदवहो। *

नेपथ्ये। कलकलः।

प्रविश्य संभ्रान्तः कञ्चुकी। परित्रायतां परित्रायतां महाराजः, एष खलु दुरात्मा कौरवाप्रसहः स्नातजाभिषेकपाटलीकृताम्बरो रक्तभीषणगदाग्रनिः उद्धतकालदण्ड इवान्तको ऽभवतीं मध्यालराजतनयामितस्ततः परिमार्गमाण इतएवाभिवर्त्तते।

युधि। हा देव! तेन निर्णयोजातः। हा गाण्डीवधन्वन्! इति मुह्यति।

द्रौप। हा अज्जउत्त मम सअम्बरसअंगहकुटुम्ब! धनञ्जअ! पिअं भादुअं सम्भावेसि ण उण महाराअं इमं दासजणं अ। † इति मोहमुपगता।

युधि। हा असदृशमल्ल! हा निवातकवचोद्धरणनिष्कण्टकीकृतामरलोक!(१)हा वदर्याश्रममुनिद्वितीय-

---

(१) इन्द्रलोकगतेनार्জ্জুनेन सुरारिनिवातकवचादेर्वधकथा वनपर्ব্বणि १७० अध्याये अनुसन्धेया।

---

* आः प्रज्वलितो भगवान् हुतवहः।

† हा आर्यपुत्र! मम स्वयम्बरस्वयंग्रहकुटुम्ब! धनञ्जय! प्रियं भ्रातरं सम्भावयसि न पुनर्महाराजमिमं दासजनञ्च।

Digitized by Google

तापस (१)! हा द्रोणाचार्यप्रियशिष्य! हा अस्त्रशिक्षाबलपरितोषितगाङ्गेय! हा राधेयकुलकमलिनीमालेयवर्ष! हा गन्धर्वनिर्वासितदुर्योधनः(२) हा पाण्डवकुलकमलिनीराजहंस!।

(३) तां वत्सलां जननिवन्द्य विनीतमध्यां
गाढं च मानमनुपास्य मयाप्यनुक्तः।
एतां स्वयम्बरवधूं सहशीमवेक्ष्य
दीर्घप्रवासमपि वत्स कथं गतोऽसि॥

इति मोहमुपागतः।

---

(१) द्वितीयतापस नरनारायणयोर्मध्ये तपश्चरणात् तयोर्द्वितीयः नरस्वरूपतपस्वी भूभारहरणाय तयोरेव क्षितितले कृष्णार्जुनरूपाभ्यामाविर्भावइति भारतीयाकथाऽनुसन्धेया।

(२) गन्धर्वात् चित्ररथात् निर्वासितः परिमोचितः दुर्योधनोयेन। गन्धर्वोत्तदुद्धरणकथा च वनपर्वणि घोषयात्रापर्वणि २४४ अध्यायेऽनुसन्धेया।

(३) वत्सलां स्निग्धां तामध्यां मातरं विनीतं यथा तथा नम्रवदित्यर्थः। अनभिवन्द्य मात्र वत्सलमिति विपरिणमय्यान्वयितव्यम्। गाढं तथा यथा अनुपरुध्य अनालिङ्ग्य मयानुक्तस्त्व ज्येष्ठाज्ञाप्रतिपालकतया मदाज्ञां विनापि नरस्वरूपं दीर्घप्रवासगमनमत्यन्तानुचितमित्यर्थः।

Digitized by Google

कञ्चु। भोः कष्टम् ! एष दुरात्मा सुयोधनो यथेष्टमित एवाभिवर्त्तते, सर्व्वथा सम्भ्रमत्रयमेव कालोचितः प्रतीकारः, भद्रे बुद्धिमतिके ! चितासमीपमुपनयात्मभवतीं पञ्चालराजतनयाम् । चेटीं प्रति। भद्रे त्वमपि देव्या भ्रातरं धृष्टद्युम्नं नकुलसहदेवौ वा ब्रूहि । अथवा एवमेव स्थिते महाराजे अस्मिन्नयो र्भीमार्জ্জुनयोः क्व नु परित्राणम्

नेपथ्ये । कलकलानन्तरम् । भोः भो समन्तपञ्चकसञ्चारिणः! क्षतजास्वादमत्तयक्षराक्षसपिशाचभूतवेतालकङ्कट भ्रजम्बूकोलूकवायसभूयिष्ठावशिष्टविरलाश्च योधाः! कृतं महार्णवसन्नाहेन कथय कस्मिन्नुद्देशे याज्ञसेनी संनिहिता । किं कथयामि तस्यालक्षणम् ।

(१)ऊरू करेण परिघट्टयतः सलीलं
दुर्य्योधनस्य पुरतोऽपहृताम्बरा या ।
दुःशासनस्य करकर्षणभिन्नमौलिः
सा द्रौपदी कथयत क्व पुनः प्रदेशे ॥

---

(१)सलीलम् "अलास्यतामिति दत्तसङ्केतं" यथा तथा करेण ऊरू प्रकिरणी परिघट्टयतः आस्फालयतः सुयोधनस्य पुरतो

कञ्चु। देवि याज्ञसेनि! परिभूयसे सम्प्रत्यनाथा कुरुकुलकलङ्केन।

युधि। सहसोत्थाय। पाञ्चालि! न भेतव्यं न भेतव्यम्, कः कोऽत्र भोः? उपनीयतां मे सज्जं धनुः दुरात्मन् दुर्य्योधनहतक! आगच्छ अपनयामि ते गदाकौशलसम्भूतं भुजदर्पं भिल्लीमुखासारेण। अन्यच्च रे कुरुकुलाङ्गार!

(१)प्रियमनुजमपश्यं जरासन्धशत्रुं
कुपितहरकिरातद्वेषिणं तञ्च वत्रुम्।
त्वमिव कठिनचेताः प्राणितुं नाशि शक्तो
न च पुनरपहर्त्तुं बाणवर्षैस्तवाहून्॥

याटपहृताम्बरा दुःशासनस्य करकर्षणेन हस्तार्कर्षेण भिन्नः विश्लेषितः मौलिः कवरीबन्धो यस्याः तादृशी द्रौपदी पुनः कुरुकुल प्रदेशे वर्त्तते तत्कथयत।

(१)कुपितहरएव किरातः व्याधरूपस्तस्य द्वेषिणं तेन सह कृतयुद्धं तपसा तोषितो हरोव्याधरूपेणार्জ্জুनेन सह द्वन्द्वयुद्धं कृत्वा तेनापि तुष्टःस्वरूपमुत्तरत्र दर्शितवानिति वनपर्व्वीया३९ अध्यायस्था कथावानुसन्धेया। त्वमिव भ्रातृदुःशासनमरणेऽपि भयान् जीवति नैवं प्राणितुमहं शक्ता, तव प्राणापरित्यागे हेतुगर्भविशेषणं क्रूरचेताः वात्सल्यरहितचित्तः तथात्वाच्चाहतस्त्वमिति भावः। एवं जीवनाशक्तोऽपि तवाहून् अपहर्त्तुमपसारयितुं न शक्ता किं न! किन्तु शक्तएवेत्यर्थः।

Digitized by Google

ततः प्रविशति गदापाणिः क्षतजसिक्तसर्वाङ्गो भीमसेनः ।

भीम । उद्धतं परिक्रामन् । भो भोः समन्तपञ्चकस्थारिणः सैनिकाः कोऽयमावेगः ।

(१)नाहं रक्षो न भूतो रिपुरुधिरजलक्षालिताङ्गः प्रकामं निर्लीर्णोरुप्रतिज्ञाजलनिधिगहनः क्रोधनः क्षत्रियोऽस्मि। भो भो राजन्यवीराः! समरशिखिशिखादग्धशेषाः कृतं व स्त्रासेनानेन लीनैर्हतकरितुरगान्तर्हितैरास्यते किम्। कथयन्तु भवन्तः कस्मिन्नुद्देशे पाञ्चाली तिष्ठति।

कञ्चु । देवि पाण्डुरक्षुषे! उत्तिष्ठोत्तिष्ठ सम्प्रति चिताप्रवेश एव श्रेयान् ।

---

(१) नाहं रक्षोराक्षसः नापि भूतः पिशाचः किन्तु प्रकामं यथेष्टं रिपुरुधिरमेव जलं तेनाक्षालिताङ्गः संसिक्तदेहो निर्लीर्णः पारंगतः उरुप्रतिज्ञैव गुरुप्रतिज्ञैव जलनिधिगहनः समुद्ररूपदुर्गमप्रदेशो येन तादृशः क्षत्रियोऽस्मि समरमेव शिखिशिखा वह्निशिखा सर्वभक्षकत्वात् तया दग्धेभ्यः नाशितेभ्यः शेषा अवशिष्टा हे राजन्यवीरा वो युष्माकमनेन त्रासेन भीत्या कृतं त्रासस्याध्यं नास्तीत्यर्थः । तेषां त्रासमेव द्योतयति किं कस्मात् हेतोः हतकरितुरगान्तर्हितैः युष्माभिरास्यते स्थीयते तथाच त्रासकारणाभावेन त्रासो न कर्त्तव्यइत्यर्थः ।

Digitized by Google

द्रौप । सहसोत्थाय । कहं ण सम्भावेमि अज्ज वि चिदासमीवम् ॥ *

युधि । कः कोऽत्र भोः ? सनिषङ्गं धनुरुपनय, कथं न कश्चित् परिजनः ? भवतु, बाहुयुद्धेनैव दुरात्मानं गाढमालिङ्ग्य ज्वलनमभिपातयामि । इति परिकरं बध्नाति ।

कञ्चु । संयम्यन्तामिदानीं नयनोपरोधिनो दुःशासनावकृष्टा मूर्द्धजाः, अस्खलिता सम्प्रति प्रतीकाराशा, चितासमीपमेव द्रुततरं सम्भावय ।

युधि । न खल्वनिहते तस्मिन् दुर्य्योधनहतके संहर्त्तव्याः केशाः ।

भीम । पाञ्चालि न खलु मयि जीवति संहर्त्तव्या दुःशासनविलुलिता वेणी आत्मपाणिभ्याम् ! [ ]

द्रौप । भयात् परिक्रामति ।

भीम । तिष्ठ तिष्ठ भीरु क्वाधुना गम्यते । इति केशेषु ग्रहीतुमिच्छति ।

---

* कथं न सम्भावयाम्यद्यापि चितासमीपम् ।

[तिष्ठ तिष्ठ [illegible] संहरामि] क्वचिदधिकः पाठः ।

बुधि। बलाद्भीममालिङ्ग्य। दुरात्मन् भीमार्जुनयोः दुर्योधनहतक! क्वेदानीं यास्यसि।

आशैशवादनुदिनं कृतापराधः
क्षीवो मदेन भुजयोर्हतराजपुत्र।
आसाद्य मेऽन्तरमिदं भुजपञ्जरस्थ
जीवन् प्रयासि न पदात् पदमद्य पाप! ॥

भीम। अये कथमार्यः सुयोधनशङ्कया निर्दयं मामालिङ्गति, आर्य! प्रसीद प्रसीद।

कञ्चु। निरूप्य सहर्षम्। कथं कुमारो भीमसेनः? दिष्ट्या वर्द्धसे महाराज! अयं खलु त्वामुपान् भीमसेनः सुयोधनरक्तजारुणितसकलशरीराम्बरो दुर्लक्ष्यव्यक्तिरलमधुना सन्देहेन।

चेटी। द्रौपदीमालिङ्ग्य। भट्टिणि एष क्खु पूरिदपइण्णाभरो णाहो देवीए वेणीसंहारं कादुं तुमं अण्णेसेदि। *

---

* भर्तृणि एष खलु पूरितप्रतिज्ञाभारो नाथो देव्या वेणीसंहारं कर्तुं त्वामन्वेषयति।

Digitized by Google

द्रौप। हञ्जे! किं मं अलीअवअणेहिं आसासेहि। *

युधि। जयन्धर! अपि सत्यं? नायं मम वैरी सुयोधनहतकः?

भीम। देव अजातशत्रो! भीमार्जुनगुरो! कुतोऽद्यापि सुयोधनहतकः? मया हि तस्य दुरात्मनः पाण्डुकुलपरिभाविणः।

(१)भूमौ क्षिप्तं शरीरं निहितमिदमहङ्कचन्दनं भीमगात्रे लक्ष्मीरार्ये निषण्णा चतुरुदधिपयःसीमया सार्द्धमूर्व्या। भृत्या मित्राणि योधाः कुरुकुलमखिलं दग्धमेतद्रणाग्नौ नामैकं यद्ब्रवीषि क्षितिप!तदधुना धार्त्तराष्ट्रस्य शेषम्॥

---

(१) धार्त्तराष्ट्रस्य शरीरं भूमौ क्षिप्तं भूमिसात् कृतमित्यर्थः। तस्य अहङ्कचन्दनं रक्तरूपानुलेपनं भीमगात्रे भयानकदेहे निहितं तस्य भृत्या दासा मित्राणि बान्धवा योधा भटाः निखिलं कुरुकुलञ्च एतत् एतानि रणाग्नौ युद्धवह्नौ दग्धं दग्धानि नपुंसमनपुंसकैनैकवच्चान्यतरस्यामिति(१,२, ६९ पा० सू०) नपुंसकैकशेषः। विभाषया एकवचनञ्च। नामैकं नामैव शेषं तेन मरणं सूचितमिति द्रष्टव्यम्।

---

* हञ्जे किं मामलीकवचनैराश्वासयसि?।

Digitized by Google

युधि। भीममवलोकयन् अश्रूणि प्रमार्ष्टि।

भीम। पादयोः पतित्वा। जयत्वार्य्यः॥

युधि। वत्स! बाष्पजलान्तरितनयनत्वान्न पश्यामि ते मुखचन्द्रम्। कथय कच्चिज्जीवति भवान् सभं किरीटिना?

भीम। निहतसकलरिपुपक्षे त्वयि नराधिपे जीवति भीमोऽर्जुनश्च।

युधि। सस्नेहं पुनर्गाढमालिङ्ग्य

रिपोरास्यां तावन्निधनमिदमाख्याहि सुतनुः
प्रियो भ्राता भीमो मम भवसि योऽसौ वकरिपुः॥

भीम। आर्य्य! सोऽहम्।

युधि। (१)जरासन्धस्योरःसरसि रुधिरासारसलिले
तटाघातक्रीड़ाललितमकरः संयति भवान्॥

भीम। आर्य्य! मुञ्चतु मां क्षणमेकं भवान्।

युधि। किमपरमवशिष्टम्।

---

(१) रुधिरासारसलिले रक्तप्रवाहरूपजले उरःसरसि उरःसरोवररूपायां संयति तटाघातक्रीड़ाललितमकरः तटाघातः हर्षहेतुकं हस्तिदन्तिभिर्भेदादुत्खननं सएव क्रीड़ा तत्र ललितोमनोहरः मकरः जलजन्तुविशेषरूपः भवान्।

Digitized by Google

भीम। आर्ये! सुमनहृदवगृह्यं, संयच्छामि तावदनेन दुर्योधनदुःशासनरुधिरोक्षितेन पाणिना पाञ्चाल्या दुःशासनावकृष्टं केशग्रहस्तम्।

युधि। सत्वरं गच्छतु भवान्, अनुभवतु तपस्विनी वेणीसंहारमहोत्सवम्।

भीम। भवति पञ्चालराजतनये! दिष्ट्या वर्द्धसे रिपुकुलक्षयेण।

द्रौपदी। उपसृत्य। जेदु जेदु णाहो। * इति भयादपसर्पति।

भीम। राजपुत्रि! अलमेवं मामालोक्य त्रासेन, पश्य। येनाकृष्टासि राज्ञां सदसि नृपशुना तेन दुःशासनेन स्त्यानान्येतानि तस्य स्पृश मम करयोः पीतशेषाण्यसृञ्जि कान्ते राज्ञः कुरूणामपि रुधिरमिदं मन्नदाचूर्णितोरो रङ्गेष्वङ्गेषु सक्तं तव परिभवजस्यानलस्योपशान्त्यै॥

बुद्धिमतिके क्व सम्प्रति भानुमती योपहसति पाण्डवदारान्? भवति वेदिसम्भवे याज्ञसेनि!

द्रौप। आणवेदु णाहो। †

---

* जयति जयति नाथः। जेस्तवन्तू तिवन्ती इत्युक्तेः स्तुतस्तिप्।

† आज्ञापयतु नाथः।

Digitized by Google

भीम । स्मरति भवती, यन्मयोक्तं पञ्चङ्गुलेति पूर्वोक्तमेव पठति ।

द्रौप । णाह ! सुमरामि अणुहवामि अ । *

भीम । भवति! संयम्यतामिदानीं धार्त्तराष्ट्रकुलकालरात्रि र्दुःशासनविलुलिता वेणी ।

द्रौप । णाह विसुमरिदाह्मि एदं वावारं णाहस्स पसादेण पुणोवि सिक्खिस्सं । †

चेटी । वेणीं बध्नाति

नेपथ्ये ।

(१)

क्रोधान्धै र्यस्य मोक्षात् कुरुनरपतिभिः पाण्डुपुत्रैः कृतानि
प्रत्याशं मुक्तकेशान्यतुलभुजबलैः पार्थिवान्तःपुराणि ।
कृष्णायाः केशपाशः कुपितयमसखो धूमकेतुःकुरूणां
सोऽयं बद्धःप्रजानां विरमतु निधनं स्वस्ति राज्ञां कुलेभ्यः

(१) यस्य कृष्णायाः केशपाशस्य मोक्षात् अतुलभुजबलैः कुरुपाण्डवनरपतिभिः प्रत्याशं सर्व्वासु दिक्षु नरपतीनामन्तःपुराणि तत्स्थाबलाजना इत्यर्थः । मुक्तकेशानि कृतानि कुपितस्यतुल्यः धूमकेतुर्निखिलोत्पातहेतुत्वात् कृष्णत्वाच्च सोऽयं कृष्णायाः केशपाशः बद्धः इदानीं प्रजानां निधनं विरमतु राज्ञां कुलेभ्यश्च स्वस्ति कुशलमस्तु ।

* नाथ ! स्मरामि, अनुभवामि च ।

† नाथ ! विस्मृताऽस्मि एतं व्यापारं, नाथस्य प्रसादेन पुनरपि शिक्षिष्यामि ।

Digitized by Google

युधि। देवि! एष ते वेणीसंहारोऽभिनन्द्यते नभस्थलसञ्चारिणा सिद्धजनेन ।

ततः प्रविशतो वासुदेवार्जुनौ ।

वासु । उपगम्य । विजयतां निहतसकलारातिमण्डलः सानुजः पाण्डवकुलचन्द्रमा महाराजो युधिष्ठिरः ।

अर्जु । जयत्वार्यः ।

युधि । विलोक्य । अये कथं भगवान् वासुदेवः, किरीटी च । भगवन्नभिवादये । किरीटिनं प्रति । एह्येहि वत्स परिष्वजस्व माम् ।

अर्जु । प्रणमति ।

युधि । वासुदेवं प्रति । देव! कुतस्तस्य विजयादन्यत् यस्य खलु भगवान् पुण्डरीकाक्षः स्वयं मङ्गलमाशास्ते ।

(१)कृतगुरु महदादिक्षोभसंभूतमूर्त्तिं
गुणिनमुदयनाशस्थानहेतुं प्रजानाम् ।
अजमजरमचिन्त्यं चिन्तयित्वा भवन्तं
भवति जगदुदासं किं पुन र्देव दृष्ट्वा ॥

---

(१) हे देव! सर्वप्रकाशक! कृताः स्वपरिणामेनोत्पादिताः

Digitized by Google

अर्जुनमालिङ्ग्य। वत्स! परिष्वजस्व मां।

वासु। एते खलु भगवन्तो व्यासवाल्मीकि-जामदग्न्यजावालिप्रभृतयो महर्षयः कल्पिताभिषेकमङ्गला नकुलसहदेवसात्यकिमुखाश्च सेनापतयो यादवमत्स्यमागधकुलसम्भवाश्च राजकुमाराः स्कन्धोत्क्षिप्ततीर्थवारिकलसास्त्वाभिषेकं धारयन्ति अहमपि चार्ज्जुनेन विप्रकृतं भवन्तमुपलभ्यार्ज्जुनेन सह सत्वरमागतः।

गुरवः स्थूलभूतानि पृथिव्यादीनि महदादयश्च येन तादृशस्याव्यक्तस्य प्रधानस्य क्षोभेण स्वाभाविकगुणप्रवृत्त्या संभूता मूर्त्तिर्यस्य तथाविधं गुणिनं सत्त्वरजस्तमोरूपगुणत्रयोपाधिकम्। गुणत्रयोपाधिकत्वे प्रयोजनमाह प्रजानां लोकानामुदयोद्भवः नाशः संहारः स्थानं स्थितिः पालनमित्यर्थः तेषां हेतुभूतं तथाच जन्मस्थितिप्रलयार्थमेव गुणत्रयोपाधिकत्वमिति भावः। न जायते स्वयमुत्पत्तिशून्यमजरं नाशशून्यं तथाच क्षयोदयरहितत्वात् नित्यमित्यर्थः। अचिन्त्यमविज्ञेयं निस्सेषमशक्यमतद्व्यावृत्तैरेव बोध्यमिति यावत्। एवम्भूतं भवन्तं चिन्तयित्वा ध्यानप्रवाहेण संस्मृत्यापि जगत् विश्वस्था जना अदुःखमाध्यात्मिकाधिभौतिकाधिदैविकदुःखत्रयरहितं भवति। अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत्। प्रवृत्तेः परं ध्रुवं निचाय्य तं मृत्युमुखात् प्रमुच्यते इति श्रुतेः। किं पुनर्दृष्ट्वा भवन्तं साक्षात्कृत्य।

युधि । किं नाम चार्वाकेण विप्रलब्धा वयम् ।

सरोषम् । क्वासौ धार्त्तराष्ट्रसखः पुण्यजनापसदः,
येन मे मङ्क्षांचित्तविभ्रमः कृतः ।

पात्र । गृहीतः स दुरात्मा नकुलेन । कथय महाराज ! किमस्मात् परं रुचीप्सितम् ।

युधि । भगवन् [पुण्डरीकाक्ष ! किं न ददासि प्रसन्नः] परमपि प्रियमस्ति अहन्तु पुरुषसाधारणया बुद्ध्या सन्तुष्यामि नखलुतः परमर्थयितुं क्षमः । पश्यतु देवः ।

क्रोधान्धैः सकलं हृतं रिपुकुलं पश्चाच्चतास्ते वयं,
पाञ्चाल्या मम दुर्नये पतितया तीर्णो निकारार्णवः ।
त्वं देवः पुरुषोत्तमः सुकृतिनं मामाहृतो भाषसे
किं नामान्यदतः परं प्रियतरं यत् प्रार्थये त्वामहम् ॥
तथापि प्रीतश्चेद्भगवांस्तदिदमस्तु ।

(१) अल्पपराक्रमतिः कामं जीव्याज्जनः पुरुषायुषं
भवतु च भवद्भक्तिर्द्वैधं विना पुरुषोत्तम ।

---

(१) पुरुषायुषं पुरुषस्यायुः कालं व्याप्य पुरुषायुः जीवित-

[एवं पुण्डरीकाक्ष! न किंचिन्ददाति भगवान् प्रसन्नः] इत्यपि पाठः।

Digitized by Google

दयितभुवनो विद्वद्बन्धुर्गुणेषु विशेषवित्
सततसुकृती भूयाद् भूपः प्रसाधितमण्डलः ॥

वासु । एवमस्तु ।

इति निष्क्रान्ताः सर्वे ।

इति षष्ठोऽङ्कः ।

इति महाकविश्रीभट्टनारायणविरचितं
वेणीसंहारनामनाटकं

सम्पूर्णम् ।

कालः शतायुर्वै पुरुषइति श्रुतेः शतवर्षमित्यर्थः । अचतुरेत्यादिना (५,४,७७ पा० सू०) विपातनात् सिद्धम् । हे पुरुषोत्तम द्वैधं संशयं विना भवद्भक्तिः भवति त्वयि भक्तिः परमप्रेमानुरागः भवतु गुणेषु विशेषवित् गुणविवेकी विद्वद्बन्धुर्भूयात् भूपः सततसुकृती सततशु कारी भूयादित्यर्थः ।

यद्दनागागभूमाने विक्रमादित्यवत्सरे ।
एतद्व्याख्यानसहितं मुद्रायन्त्रेन्य योजयत् ॥

इति महामहोपाध्यायकालिदाससार्वभौमभट्टाचार्यात्मसम्भव
श्रीतारानाथतर्कवाचस्पतिभट्टाचार्यविरचिते
वेणीसंहार व्याख्याने वेणीसंहारनामक
षष्ठाङ्कव्याख्या ।

Digitized by Google

GLOSSARY.

पत्र	पं		
२	२	कालिन्दी	Jumna. कलिन्द A mountain, part of Himalaya range and the seat of the river's source.
५	१५	कबरी	A braid or fillet of hair.
७	२	परिषद्	Audiance. Congregation.
८	२	मधुलिह्	A bee.
१०	३	शैलूष	An Actor. Derived from शिलूष one of the early teachers of the art of acting.
१०	४	आतोद्य	A musical instrument. (वीणा)
११	१०	क्रौञ्च	A kind of hiron or curlew.
११	११	सम्पच्छट	सम्पर्ण (छातिम् इति प्रसिद्ध: ।)
,,	,,	पुण्डरीक	A white lotus.
१७	८	उपालम्भ	Reviling. Chiding.
२३	१७	अक्ष	A die.
२४	७	वल्ली	A creeping plant, from वल्ल् to cover.
२५	६	शोणपाणि	Having hands of crimson colour.
४६	५	परशु	Axe.
६७	३	अरिष्ट	Some natural phenomenon indicating calamity.
६६	१५	पिङ्गल	Tawny.
,,	१७	सपर्य्या	Worship.
७०	१५	अम्बर	The sky.
,,	,,	सरसपत्र	Lotus.
७१	६	साध्वस	Fear.
,,	६	अपाङ्ग	The outer corner of the eye.
७२	८	विशिख	An arrow.

Digitized by Google

८५	२	कोदण्ड	Bow.
,,	,,	ज्या	Bow-string.
,,	,,	किण	A scar.
,,	,,	कङ्कट	Mail. Defensive armour.
९०	९	घटोत्कच	Son of Bhima, by Hirimba.
९१	११	भगदत्त	King of Bengal.
९२	२	सिन्धुराज	जयद्रथ King of Sindh.
,,	,,	मत्स्य	A country enumerated amonst the midland division of India in Manu.
,,	१	भूरिश्रवा	Son of Somadatta (deseneded from Kuroo's race.)
,,	,,	सोमदत्त	Father of भूरिश्रवा
,,	,,	वाह्लीक	King of Balk, a country to the north-west of Afganistan.
९४	७	धृष्टद्युम्न	Son of Droopada. (King of Panchàla or Conouj.)
१००	४	हार्दिक्य	कृतवर्म्मा। One of the descendants of Jadoo's race.
१०४	१०	धूर्जटी	Shiva.
१०५	५	आजि	Battle.
१०८	२	अजातशत्रु	युधिष्ठिर।
१११	६	भारद्वाज	Drona descendant of भरद्वाज।
११२	१०	द्रविण	Wealth.
११४	८	सात्यकि	A King of Yaduvansha.
११५	४	नरकरिपु	A Name of Krishna.
,,	८	सोमक	Princes of Lunar Race.
११७	१५	अङ्ग	A country, Bengal Proper including Bhagulpoor.
१२०	६	न्यग्रोध	अश्वत्थ The Indian fig-tree.

Digitized by Google

१२६	१०	राधासुत	Karna. Ràdha is the name of a charioteer's wife by whom the prince after exposure by his mother Kunti, was found and fostered.
१२८	१०	वैजयन्ती	Flag.
१२९	२	कृपाण	Sword.
,,	३	तोमर	Iron crown.
,,	,,	शक्ति	An iron spear or dart.
१४०	४	स्यन्दन	A war chariot.
,,	५	मातरिश्वा	Air. Wind. derived from मातृ heaven and श्वि to increase.
,,	,,	किसलय	A young shoot.
१४६	७	प्रास	A bearded dart.
१४७	३	भरत	Son of Dushmanta from whom comes the term भारतवर्ष।
१५०	४	गाङ्गेय	Bhìsma, son Gunga by Shantanu.
१५३	६	धौरेयक	A beast of burden.
१६५	१५	क्षुरप्र	A kind of arrow, one with a horse-shoe head.
१७२	३	शल्य	King of Madra. मद्र A conntry enumerated amongst those to the N. W. of Hindoostan Proper.
१८२	३	फाल्गुन	A name of Arjuna.
१८६	६	सगर	Great-great grandfather of Bhagiratha.
२२५	६	सरस्वती	A river, the Sarsooty which rises in the mountains bounding the north-east part of Delhi, whence it runs in a south-westerly direction, and is lost in the sands of the great desert in the country of Bhatti accoding to Hindus the river only disappears in this place and continuing its course under ground joins the Ganges and Jumuna at Allahabad.

Digitized by Google

Digitized by Google

वेणीसंहारस्य शुद्धिपत्रं ।

पत्रं		पं	अशु	शु
६	....	१८	र्त्तीय	वर्त्तु
११	....	६	लवै	लवै
२१	....	३	वि	वि
२४	....	८	मिव	मिव
२६	....	४	अष्टखम्	अष्टखन्
५८	....	५	बि	वि
६७	....	२	अवितथ	अवितथं
६८	....	१५	पर्युपस्थातु	पर्य्युस्थातु
७०	....	१५	पूर्ब्ब	पूर्व्वं
८८	....	१५	पिबामि	पिवामि
८६	....	२०	नत्	तत्
८८	....	४	प्रचण्ड	प्रचण्ड
११५	....	२	क्षन	क्षत
	....	५	वलि	वलिं

Digitized by Google

११५	....	७	वाह्न	बाह्न
८	....	१६	केशवेन	केशवेन
११८	....	८	मेवम्	मेवम्
१२०	....	४	सिन्धु	सिन्धु
१४३	....	१०	अवमार्थ	अपवार्थ
१४४	....	७	द्येवं	द्येवं
१६३	....	१४	सीम	भीम
१६४	....	१६	विसुक्ता	विसुक्ता
१६६	....	१७	र्वसु	र्धसु
१८२	....	३	हिनत	निहत
२३७	....	५	बि	वि

Digitized by Google